अपूर्णाः सप्त पूर्णः संज्ञी एकः चतुर्दश च द्वयोः क्रमेण ॥

भव्यजीवेऽभव्यजीवे च चतुर्दश जीवसमासा भवन्ति । दुण्णेगं खाइयादितिसु मिस्से—अत्र यथासंख्यं व्याख्येयं, क्षायिकादित्रिषु क्षायिकोपशमवेदकसम्यक्त्वेषु पंचेन्द्रियसंज्ञिपर्याप्तापर्याप्तजीवसमासौ द्वौ भवतः, मिश्रे सम्यक्त्वे पंचेन्द्रियसंज्ञिपर्याप्तक एक एव जीवसमासो भवति । मिश्रे मरणासंभवत्वादपर्याप्तत्वं तु न संभवति । अपुण्णा सग पुण्णा सण्णी इति चउदस य दोसु कमे—कमे इति—क्रमेण, दोसु—द्वयोः सासादनमिथ्यात्वसम्यक्त्वयोः[1], अपुण्णा सग—अपर्याप्ताः सप्त, सण्णी इगि—पर्याप्तसंज्ञी एकः, चतुर्दश च, । अथ व्यक्तिः[2]—सासादनसम्यक्त्वे एकेन्द्रियसूक्ष्मबादरद्वित्रिचतुरेन्द्रियपंचेन्द्रियसंज्ञ्यसंज्ञिन एते सप्त अपर्याप्ताः पंचेन्द्रियसंज्ञिपर्याप्त एक एव एवं अष्टौ जीवसमासाः (सासादनसम्यक्त्वे)[3] भवन्तीति भावः । मिथ्यात्वसम्यक्त्वे एकेन्द्रियादयश्चतुर्दश जीवसमासा भवन्तीति सूत्रार्थः ॥ १० ॥

**सण्णिअसण्णिसु दोण्णि य आहारअणाहारएसु विण्णेया ।**
**जीवसमासा चउदस अट्ठेव जिणेहिं णिद्दिट्ठा ॥ ११ ॥**

संज्ञ्यसंज्ञिनोः द्वौ च आहारानहारकयोः विज्ञेयाः ।
जीवसमासाश्चतुर्दश अष्टावेव जिनैः निर्दिष्टाः ॥

सण्णिअसण्णिसु दोण्णि य—संज्ञिजीवे पंचेन्द्रियसंज्ञिपर्याप्तापर्याप्तौ द्वौ जीवसमासौ भवतः । असंज्ञिजीवे असंज्ञिपर्याप्तापर्याप्तौ जीव-

---

१ सासादनं च मिथ्यात्वं च सासादनमिथ्यात्वे ते च ते सम्यक्त्वे तयोरिति विग्रहः । २ 'व्यक्तिसासादन' पुस्तके पाठः । ३ शब्दोऽयं द्विकोऽतः कोष्ठे निहितोऽस्माभिः ।

समासौ स्याताम् । आहारानाहारकेषु ज्ञेया जीवसमासाश्चतुर्दश अष्टावेव । को भावः? आहारकमार्गणायां चतुर्दशजीवसमासा विज्ञेयाः । अनाहारकमार्गणायामष्टावेव जीवसमासा बोद्धव्याः । ते के इति चेदुच्यते—एकेन्द्रियसूक्ष्मबादरद्वित्रिचतुरिन्द्रियपंचेन्द्रियसंज्ञ्यसंज्ञिन एते सप्त अपर्याप्ताः, एकः संज्ञिपंचेन्द्रियपर्याप्तक इत्यष्टौ जीवसमासाः । अनाहारे एतेऽष्टौ कथं संभवतीत्याशंकायामाह—क्वचिद्विग्रहगत्यपेक्षया क्वचित्केवलिसमुद्घातापेक्षया । तथा चोक्तं:—

**विग्गहगइमावण्णा समुग्घाइयकेवलिअजोगिजिणा ।**
**सिद्धा य अणाहारा सेसा आहारिया जीवा ॥ १ ॥**

जिणेहिं णिद्दिट्ठा—जिनैः कथिता मार्गणासु यथासंभवं जीवसमासा जिनैर्भणिता इत्युक्तिलेशः ॥ ११ ॥

इति चतुर्दशमार्गणासु जीवसमासाश्चतुर्दश संक्षेपेण कथिताः ।

---

अथ चतुर्दशमार्गणासु चतुर्दशगुणस्थानान्यवतारयन्नाह ग्रन्थकर्ता ( मार्गणासु गुणस्थाननिरूपणार्थं गाथामाह )—

**णारयतिरियणरामरगईसु चउपंचचउदसचयारि ।**
**इगिदुतिचउरक्खेसु य मिच्छं बिदियं च उववादे ॥१२॥**

नारकतिर्यङ्नरामरगतिषु चतुःपंचचतुर्दशचत्वारि ।
एकद्वित्रिचतुरक्षेषु च मिथ्यात्वं द्वितीयं चोपपादे ॥

इयं गाथा यथासंख्यं व्याख्येया । नारकतिर्यङ्नरामरगतिषु चतुःपंचचतुर्दशचत्वारि गुणस्थानानि यथासंख्यं भवन्ति । इति गतिमार्गणा

---

१ विग्रहगतिमापन्नाः समुद्घातकेवल्ययोगिजिनाः ।
सिद्धाश्चानाहारकाः शेषा आहारका जीवाः ॥

समाप्ता। इगिदुतिचउरक्खेसु य मिच्छं बिदियं च उववादे—एकद्वित्रिचतुरक्षेषु च एकेन्द्रियेषु द्वीन्द्रियेषु त्रीन्द्रियेषु चतुरिन्द्रियेषु चैकं मिथ्यात्वं। च पुनः एतेष्वेव द्वितीयं सासादनगुणस्थानं, उववादे—उत्पत्तिकाले अपर्याप्तसमये स्यात्। एकेन्द्रियादिषु चतुर्षु मिथ्यात्वसासादनगुणस्थानद्वयं भवतीत्यर्थः॥ १२॥

**चउदस पंचक्खतसे धरादितिसु दुगिगि तेयपवणेसु।**
**सच्चाणुभये तेरस मणवयणे बारसण्णेसु॥ १३॥**

चतुर्दश पंचाक्षत्रसयोः धरादित्रिषु द्वे एकं तेजःपवनयोः।
सत्यानुभययोः त्रयोदश मनोवचनयोः द्वादशान्येषु॥

चउदसेत्यादि। पंचक्खतसे—पंचाक्षेषु पंचेन्द्रियेषु मिथ्यात्वादिचतुर्दशगुणस्थानानि भवन्ति। इन्द्रियमार्गणा समाप्ता। 'तसे' इतः प्रारभ्य कायमार्गणा निरूप्यते—तसे—इति, त्रसकायेषु च मिथ्यात्वादिचतुर्दशगुणस्थानानि स्युः। धरादितिसु दुगि—धरादिषु त्रिषु पृथिव्यब्वनस्पतिकायेषु, दुगि—मिथ्यात्वसासादनगुणस्थानद्वयं भवति। इगि तेयपवणेसु—तेजःपवनकायेषु एकं मिथ्यात्वगुणस्थानं भवति। इति कायमार्गणा समाप्ता। सच्चाणुभये तेरस मणवयणे—सत्यानुभयमनोयोगे मिथ्यात्वादित्रयोदश, सत्यानुभयवचनयोगे त्रयोदश। बारसण्णेसु—अन्येषु असत्यमनोयोगोभयमनोयोगासत्यवचनयोगोभयवचनयोगेषु चतुर्षु प्रत्येकं बारस—(द्वादश) मिथ्यात्वादीनि क्षीणकषायान्तानि स्युः॥१३॥

**ओरालिए य तेरस मिस्से कम्मे य मिस्सतियजोगी।**
**वेउव्वियदुग चदुतिय पमत्तमाहारदुगे य॥ १४॥**

---

१ 'बारस चाण्णेसु' टीकापाठः पुस्तके।

औदारिके च त्रयोदश मिश्रे कार्मणे च मिश्रत्रिकयोगिनः।
वैगूर्विकद्विके चतुःत्रिकं प्रमत्तमाहारकद्विके च ॥

औदारिककाययोगे मिथ्यात्वादिसयोगकेवलिपर्यन्तानि त्रयोदश गुणस्थानानि भवन्ति। मिस्से कम्मे य मिस्सतियजोगी—मिस्से इति औदारिकमिश्रकाययोगे, कम्मे य—इति, कार्मणकाययोगे च, मिस्सतियजोगी—मिश्रत्रिकं सयोगिगुणस्थानं च भवति। मिश्रत्रिकमिति कोऽर्थः? मिथ्यात्वसासादनाविरतानीति मिश्रत्रयं भण्यते। औदारिकमिश्रकाययोगे कार्मणकाययोगे च मिथ्यात्वसासादनाविरतसयोगकेवलीनि नामानि चत्वारि गुणस्थानानि भवन्तीत्यर्थः। मिश्रकार्मणकाययोर्मिश्रगुणस्थानं कुतो न संभवति? मरणाभावात्। तथा चोक्तं;—

'मिश्रे क्षीणे सयोगे च मरणं नास्ति देहिनाम्'

इति वचनात्। वेउव्वियदुग चदुतिय—वैक्रियिकद्विके चत्वारि त्रीणि यथासंख्यं। वैक्रियिककाययोगे मिथ्यात्वसासादनमिश्राविरतगुणस्थानचतुष्टयं भवति। वैक्रियिकमिश्रकाययोगे मिथ्यात्वसासादनाविरतगुणस्थानत्रिकं भवति। पमत्तमाहारदुगे य—आहारकद्विके आहारककाययोगे आहारकमिश्रकाययोगे च प्रमत्ताख्यं एकं षष्ठं भवति। इति योगमार्गणा समाप्ता ॥ १४ ॥

**वेदतिए कोहतिए णवगुणठाणाणि दसय तह लोहे।**
**अण्णाणतिए दो मइतिए चउत्थादिणव चेव ॥ १५ ॥**

वेदत्रिके क्रोधत्रिके नवगुणस्थानानि दशकं तथा लोभे।
अज्ञानत्रिके द्वे मतित्रिके चतुर्थादिनव चैव ॥

वेदतिए—वेदत्रिके स्त्रीवेदपुंवेदनपुंसकवेदेषु त्रिषु मिथ्यात्वादीन्यनिवृत्तिकरणपर्यन्तानि नवगुणस्थानानि भवन्ति। इति वेदमार्गणा।

कोहतिए णव—क्रोधत्रिके क्रोधमानमायासु मिथ्यात्वादीन्यनिवृत्तिकरणपर्यन्तानि गुणस्थानानि भवन्ति । दसय तह लोहे—तथा लोभे मिथ्यात्वप्रभृतिसूक्ष्मसाम्परायपर्यन्तं गुणस्थानदशकं भवति । इति कषायमार्गणा पूर्णा । अण्णाणतिए दो—अज्ञानत्रिके द्वे गुणस्थाने, कुमतिकुश्रुतकुवधिषु त्रिषु प्रत्येकं मिथ्यात्वसासादनगुणस्थाने द्वे भवतः । मइतिए अउत्थादिणव चेव—मतित्रिके मतिश्रुतावधिज्ञानेषु चतुर्थादिनव चैव अविरतादिक्षीणकषायपर्यन्तानि नवगुणस्थानानि भवन्ति ॥ १५ ॥

**सग मणपज्जे केवलणाणे जोगदुगं पमत्तादी ।**
**चदु सामाइयजुयले पमत्तजुयलं च परिहारे ॥ १६ ॥**

सप्त मनःपर्यये केवलज्ञाने योगिद्विकं प्रमत्तादीनि ।
चत्वारि सामायिकयुगले प्रमत्तयुगलं च परिहारे ॥

सग मणपज्जे—मणपज्जे—इति, मनःपर्ययज्ञाने, सग—इति, सप्त गुणस्थानानि स्युः । तानि कानि चेदुच्यंते प्रमत्तादिक्षीणकषायपर्यन्तानि सप्त भवन्ति । केवलणाणे जोगदुगं—केवलज्ञाने योगद्विकं सयोगायोगकेवलिगुणस्थानद्वयं भवति । इति ज्ञानमार्गणा । पमत्तादी चदु सामाइयजुयले—सामायिकयुगले सामायिकच्छेदोपस्थापनद्वयोः प्रमत्ताद्यनिवृत्तिकरणगुणस्थानपर्यन्तानि चत्वारि भवन्ति । पमत्तजुयलं च परिहारे—परिहारविशुद्धिसंयमे तृतीये प्रमत्ताप्रमत्तगुणस्थानद्वयं भवति ॥ १६ ॥

**सुहमे सुहमं अंतिमचत्तारि हवंति जहखादे ।**
**चरियाचरिए इक्कं पंचमयं असंजमे चउरो ॥ १७ ॥**

सूक्ष्मे सूक्ष्मं अन्तिमचत्वारि भवन्ति यथाख्याते ।
चरिताचरिते एकं पंचमकं असंयमे चत्वारि ॥

सुहमे—इति, सूक्ष्मसाम्पराये चतुर्थे संयमे, सुहमं—इति, सूक्ष्मसाम्परायनाम दशमं एकं गुणस्थानं भवति । अंतिमचत्तारि जहखादे—इति, यथाख्याते पंचमसंयमे अन्तिमचत्वारि गुणस्थानानि भवन्ति । तानि कानि किंनामानि चेत् ? उपशान्तकषायक्षीणकषायसयोगायोगकेवलिनामानि ज्ञेयानि । चरियाचरिए ईक्कं पंचमयं—चरिताचरिते संयतासंयते षष्ठे संयमे, ईक्कं पंचमयं—इति, पंचमं देशविरताख्यं भवति । असंजमे चउरो—असंयते सप्तमे मिथ्यात्वादिचतुर्थगुणस्थानानि चत्वारि भवन्ति । इति संयममार्गणा पूर्णा ॥ १७ ॥

**बारस चक्खुदुगे णव अवहीए दुण्णि केवलालोए ।**
**किण्हादितिए चउरो तेजापउमासु सत्तगुणा ॥ १८ ॥**

द्वादश चक्षुर्द्विके नव अवधौ द्वे केवलालोके ।
कृष्णादित्रिके चत्वारि तेजःपद्मयोः सप्तगुणाः ॥

बारस चक्खुदुगे—इति, चक्षुर्द्वये चक्षुर्दर्शनेऽचक्षुर्दर्शने च मिथ्यात्वादीनि क्षीणकषायपर्यन्तानि द्वादश गुणस्थानानि स्युः । णव अवहीए—अवधिदर्शने अविरतप्रभृतिक्षीणकषायावसानानि नवगुणस्थानानि भवन्ति। दुण्णि केवलालोए—केवलालोके केवलदर्शने, दुण्णि—सयोगायोगकेवलिगुणस्थानद्वयं स्यात् । इति दर्शनमार्गणा । किण्हादितिए चउरो—कृष्णादित्रिके चउरो—मिथ्यात्वसासादनमिश्राविरताभिधानानि गुणस्थानानि चत्वारि भवन्ति । तेजापउमासु—पीतपद्मलेश्ययोर्द्वयोः, सत्तगुणा—मिथ्यात्वादीन्यप्रमत्तान्तानि सप्त भवन्ति ॥१८॥

**सियलेस्साए तेरस भव्वे सव्वे अभव्वए मिच्छं ।**
**इगिदह चदु अड खाइयतिए तहण्णेसु णियइक्कं ॥ १९ ॥**

१-२ 'एक्कं' इति पुस्तके पाठः ।

सितलेश्यायां त्रयोदश भव्ये सर्वाणि अभव्ये मिथ्यात्वं ।
एकादश चत्वारि अष्टौ क्षायिकत्रये तथान्येषु निजैकम् ।।

सियलेस्साए तेरस—सितलेश्यायां शुक्लेश्यायां मिथ्यात्वप्रभृतित्रयोदशगुणस्थानानि भवन्ति। इति लेश्यामार्गणा। भव्वे सव्वे—इति, भव्यजीवे, सव्वे—इति, मिथ्यात्वाद्ययोगकेवलिपर्यन्तानि चतुर्दशगुणस्थानानि सर्वाणि भवन्ति। अभव्वए—इति, अभव्यजीवे एकं मिथ्यात्वगुणस्थानं भवति । इति भव्यमार्गणा । इगिदह चदु अड खाइगतिगे—क्षायिकत्रिके अत्र यथासंख्येन व्याख्या वर्तते तथाहि—क्षायिकसम्यक्त्वे एकादश चतुर्थादिसिद्धपर्यन्तान्येकादशगुणस्थानानि विद्यन्ते । वेदकसम्यक्त्वे, चदु—अविरताद्यप्रमत्तान्तानि चत्वारि गुणस्थानानि प्रतिपत्तव्यानि । उपशमसम्यक्त्वे, अड—अविरताद्युपशान्तकषायान्तानि अष्टौ ज्ञेयानि । तहऽण्णेसु—तथान्येषु मिथ्यात्वसासादनमिश्रेषु, णियइक्कं—निजैकमिति । कोऽर्थः ? मिथ्यात्वसम्यक्त्वे मिथ्यात्वमेकं भवति । सासादनसम्यक्त्वे निजं सासादनगुणस्थानमस्ति । मिश्रनाम्नि सम्यक्त्वे स्वकीयं मिश्रनामगुणस्थानं भवेत् । इति सम्यक्त्वमार्गणा ।। १९ ।।

**सण्णिअसण्णिसु बारस दो पढमादितिदस पण गुणा कमसो ।**
**आहारअणाहारे एसु इदि मग्गणठाणएसु गुणा ।। २० ।।**

संज्ञ्यसंज्ञिषु द्वादश द्वे प्रथमादित्रयोदश पंच गुणाः क्रमशः ।
आहारकानाहारके एतेषु इति मार्गणस्थानेषु गुणाः ।।

सण्णिअसण्णिसु बारस दो—अत्र यथासंख्यालंकारः । संज्ञिजीवे प्रथमादिक्षीणकषायपर्यन्तानि द्वादशगुणस्थानि स्युः । असण्णिसु—असंज्ञिजीवेषु द्वौ गुणौ मिथ्यात्वसासादने भवत इत्यर्थः । इति संज्ञिमार्गणा । पढमादितिदसपणगुणा कमसो आहारअणाहारे—कमसो—इति, अनु-

क्रमेण यथासंख्यतया, आहारके प्रथममिथ्यात्वादिसयोगान्तानि त्रयोदश-गुणस्थानानि सन्ति । अनाहारके पण गुणा—पंचगुणस्थानानि भवन्ति मिथ्यात्वसासादनाविरतिसयोगकेवल्ययोगकेवलिनामानि पंचगुणस्थानानि स्युः । अनाहारके एतानि पंचगुणस्थानानि कथं संभवंतीत्यारेकायामाह—मिथ्यात्वसासादनाविरतेषु त्रिषु जीवानां विग्रहगत्यां सत्यां अनाहरकत्वं संभवति । सयोगकेवलिनि समुद्घातापेक्षया ज्ञेयं । तथा चोक्तं—

> **विग्गहगइमावण्णा समुग्घयकेवलिअजोगिजिणा ।**
> **सिद्धा य अणाहारा सेसा आहारिया जीवा ॥ १ ॥**

अयोगकेवलिनि तु स्वभावतोऽनाहरकत्वमस्ति । एसु इदि मग्गणठाणएसु गुणा—इत्यमुना प्रकारेण एतेषु मार्गणास्थानेषु गुणा गुणस्थानानि ज्ञेयाः ॥ २० ॥

इति मार्गणासु गुणा भणिताः ।

---

अथ चतुर्दशमार्गणासु पंचदशयोगान् प्रकटयन्नाह सूरिः—

> **आहारयओरालियदुगेहि हीणा हवंति णिरयसुरे ।**
> **आहारयवेउव्वियदुगजोगे इगिदस तिरियक्खे ॥ २१ ॥**
>
> आहारकौदारिकद्विकैः हीना भवन्ति नारकसुरेषु ।
> आहारकवैक्रियिकद्विकयोगेन एकादश तिरश्चि ॥

आहारय इत्यादि । णिरयसुरे—नरकगतौ देवगतौ च आहारकाहारकमिश्रकाययोगे इति द्वयं, औदारिकौदारिकमिश्रकाययोगद्वयं इति चतुर्योगैर्हीना अन्ये उद्धरिताः, इगिदस—एकादशयोगा भवन्ति । ते के इति चेत् ? मनोयोगचत्वारि वचनयोगचत्वारि वैक्रियिककाययोग-

वैक्रियिकमिश्रकाययोगकार्मणकाययोगा एवं एकादशयोगाः नरकगत्यां देवगत्यां भवन्तीति ज्ञेयं। आहारयवेउव्वियदुगजोगे इगिदस तिरियक्खे— तिर्यग्गतौ आहारकाहारकमिश्रवैक्रियिकतन्मिश्रकाययोगैर्हीना अन्ये एकादशयोगा भवन्ति। ते के? अष्टौ मनोवचनयोगा औदारिकतन्मिश्रकार्मणकाययोगाश्चेति त्रय एवं एकादश योगाः स्युः॥ २१॥

**वेगुव्वियदुगरहिया मणुए तेरस एयक्खकायेसु।**
**पंचसु ओरालदुगं कम्मइयं तिण्णि वियलेसु॥ २२॥**

वैगूर्विकद्विकरहिता मनुजे त्रयोदश एकाक्षकायेषु।
पंचसु औदारिकद्विकं कार्मणं त्रयो विकलेषु॥

वेगुव्वियरहिया मणुए तेरस—इति, मनुष्यगतौ वैक्रियिकवैक्रियिकमिश्रकाययोगद्वयरहिता अन्ये त्रयोदश योगा भवन्ति। इति गतिमार्गणा। एयक्खकायेसु पंचसु ओरालदुगं कम्मइयं तिण्णि इति, एकेन्द्रिये, कायेसु पंचसु—इति, पृथिव्यप्तेजोवायुवनस्पतिकायेषु च औदारिकौदारिकमिश्रकाययोगद्वयं, कम्मइयं—कार्मण काययोग इति त्रयो योगा भवन्ति। वियलेसु इति पदस्य व्याख्यानमुत्तरगाथायां वर्तते॥२२॥ तद्यथा;—

**अणुभयवयणेण जुआ चदु पंचक्खे दु पंचदस जोगा।**
**तसकाए विण्णेया पणदह जोगेसु णियइक्कं॥ २३॥**

अनुभयवचनेन युताः चत्वारः पंचाक्षे तु पंचदश योगाः।
त्रसकाये विज्ञेयाः पंचदश योगेषु निजैकः॥

वियलेसु अणुभयवयणेण जुआ चदु—इति, विकलेन्द्रियेषु द्वित्रिचतुरिन्द्रियेषु अनुभयवचनेन युक्ताः चत्वारो योगा भवन्ति। ते के? औदारिकौदारिकमिश्रकार्मणानुभयवचननामान एते चत्वारो योगाः। पंचक्खे दु पंचदस जोगा—तु पुनः पंचाक्षे पंचेन्द्रियेषु

पंचदश योगा भवन्ति। पंचेन्द्रियेषु नानाजीवापेक्षया यथासंभवमुत्प्रेक्षणीयाः। तसकाए णिण्णेया पणदह—इति, त्रसकायेषु सामान्यत्वेन पंचदशयोगाः सन्ति। इतीन्द्रियमार्गणाकायमार्गणाद्वयं जातं। जोगेसु णियइक्को—इति, पंचदशयोगेषु निजैकः स्वकीयः स्वकीयो योगो भवति। को भावः? सत्यमनोयोगे सत्यमनोयोगः, असत्यमनोयोगेऽसत्यमनोयोगः। एवं सर्वत्र ज्ञेयं। इति योगमार्गणा ॥ २३ ॥

**आहारयदुगरहिया तेरस इत्थीणउंसए पुंसे।**
**कोहचउक्के सव्वे अण्णाणदुगे तिदह हुंति ॥ २४ ॥**

आहारकद्विकरहिताः त्रयोदश स्त्रीनपुंसकयोः पुंसि।
क्रोधचतुष्के सर्वे अज्ञानद्विके त्रयोदश भवन्ति ॥

आहारय इत्यादि। स्त्रीवेदे नपुंसकवेदे च आहारकतन्मिश्रकाययोगद्वयरहिता अन्येऽवशिष्टास्त्रयोदश योगा भवन्ति। पुंसे—पुंवेदे, सव्वे—सर्वे पंचदश योगाः स्युः। इति वेदमार्गणा। कोहचउक्के सव्वे—क्रोधचतुष्के क्रोधमानमायालोभचतुष्टये सर्वे योगा भवन्ति। इति कषायमार्गणा। अण्णाणदुगे—अज्ञानद्विके कुमतिकुश्रुतज्ञाने आहारकद्वययोगवर्ज्यास्त्रयोदश योगा भवन्ति ॥ २४ ॥

**मिस्सदुगाहारदुगंकम्मइयविहीण हुंति वेभंगे।**
**दस सव्वे णाणतिए मणपज्जे पढमणवजोगा ॥ २५ ॥**

मिश्रद्विकाहारद्विककार्मणविहीना भवन्ति विभंगे।
दश सर्वे ज्ञानत्रिके मनःपर्यये प्रथमनवयोगाः ॥

मिस्सेत्यादि। विभंगज्ञाने कुअवधिज्ञाने, मिस्सेत्यादि—औदारिकमिश्रवैक्रियिकमिश्रकाययोगद्वयाहारकतन्मिश्रकाययोगद्वयकार्मणकाययोगविहीना उद्धरिता दशयोगा भवन्ति। ते के? अष्टौ मनोवचनयोगा औदारिकवैक्रियिककाययोगौ एवं दश योगाः कुअवधिज्ञाने भवन्तीत्यर्थः।

सव्वे णाणतिए—ज्ञानत्रिके मतिश्रुतावधिज्ञानत्रये सर्वे पंचदशयोगा भवन्ति। मणपज्जे पढमणवजोगा—मनःपर्ययज्ञाने प्रथमे 'अल्पादेर्वा' प्रथमा नवयोगा भवन्ति। ते के? अष्टौ मनोवचनयोगा एक औदारिकयोग एवं नवयोगाः ॥ २५ ॥

**ओरालिय तम्मिस्सं कम्मइयं सच्चअणुभयाणं च।**
**मणवयणाणं चउक्कं केवलणाणे सगिगिदसयं ॥ २६ ॥**

औदारिकः तन्मिश्रः कार्मणं सत्यानुभयानां च।
मनोवचनानां चतुष्कं केवलज्ञाने सप्त एकादशकं ॥

केवलणाणे—केवलज्ञाने, सग—सप्तयोगा भवन्ति। कितनामानः? ओरालियं तम्मिस्सं—औदारिककाययोगः, तन्मिश्र औदारिकमिश्रकाययोगः, कार्मणकाययोग एते त्रयो योगाः। सच्चेत्यादि—सत्यानुभयमनोवचनानां चतुष्कं सत्यमनोयोगानुभयमनोयोगौ, सत्यवचनयोगानुभयवचनयोगौ इति चत्वारो योगा एवं एकत्रीकृताः सप्तयोगाः केवलज्ञाने भवन्तीत्यर्थः। अत्र तटस्थेनोच्यते—औदारिकाययोग औदारिकमिश्रकाययोगः कार्मणकाययोगश्चैते त्रयः केवलज्ञाने कथं संभवन्तीति चेत्, तदुच्यते—समुद्घातापेक्षया संभावनीयाः। तथा चोक्तं आगमग्रन्थे—

**दंडदुगे ओरालं कवाडजुगले य पयरसंवरणे।**
**मिस्सोरालिय भणियं सेसतिए जाण कम्मइयं ॥ १ ॥**

अस्या अर्थः—दंडकपाटयुग्मे औदारिककाययोगो भवति। कवाडयुगले य—च पुनः कपाटप्रतरयुग्मे औदारिककायोगो भवति। पयरसं-

---

१ 'इगिदसयं' पुस्तके मूलपाठः टीकापाठोऽपि। २ 'ओरालियं' टीकायां पाठः।

१ दंडद्विके औदारिकं कपाटयुगले च प्रतरसंवरणे।
मिश्रौदारिकं भणितं शेषत्रिके जानीहि कार्मणं ॥

वरणे मिस्सोराळिय भणियं----प्रतरसंवरणे प्रतरसमुद्धातसंकोचने औदारिकमिश्रकाययोगो भणितः। शेष त्रिके प्रतरलोकपूरणसंवरणत्रये कार्मणकाययोगं जानीहि। इति ज्ञानमार्गणा। 'इगिदसयं' इति पदस्य उत्तरगाथायां सम्बन्धः॥ २६॥

**कम्मइयदुवेगुव्वियमिस्सोरालूण पढमजमजुयले।**
**परिहारदुगे णवयं देसजमे चेव जहखादे॥ २७॥**

कार्मणद्विवैक्रियिकमिश्रौदारिकोनाः प्रथमयमयुगले।
परिहारद्विके नवकं देशयमे चैव यथाख्याते॥

इगिदसयमिति पूर्वगाथास्थितं पदं, एकादशयोगाः प्रथमसंयमयुगले सामायिकच्छेदोपस्थापनाद्वये भवन्ति। ते के? कम्मइय इत्यादि कार्मणकाययोगवैक्रियिकतन्मिश्रकाययोगद्वयौदारिकमिश्रकाययोगैरूना हीना अन्ये एकादशयोगाः। ते के? अष्टौ मनोवचनयोगा औदारिककाययोग आहारकद्वयमित्येकादशयोगाः। परिहारदुगे णवयं—परिहारविशुद्धिसूक्ष्मसांपरायसंयमद्वये नवयोगा भवन्ति। ते के? अष्टौ मनोवचनयोगा एक औदारिककाययोग इति नव। देसजमे चेव—च पुनः देशसंयमे एते पूर्वोक्ता मनवचनानामष्टौ, एक औदारिकयोग एवं नवयोगा भवन्ति। जहखादे—इति, उत्तर गाथायां सम्बन्धोऽस्ति॥ २७॥

**वेउव्वियदुगहारयदुगूण इगिदस असंजमे जोगा।**
**तेरस आहारयदुगरहिया चक्खुम्मि मिस्सूणा॥ २८॥**

वैक्रियिकद्विकाहारकद्विकोना एकादश असंयमे योगाः।
त्रयोदश आहारकद्विकरहिताः चक्षुषि मिश्रोनाः॥

१ 'मिस्सा' अन्यत्र। २ जुम्मे अन्यत्र।

जहखादे—यथाख्यातचारित्रे, वेउव्वियेत्यादि—वैक्रियिकवैक्रियिकमिश्राहारकाहारकमिश्रोना एकादश भवन्ति। ते के? अष्टौ मनोवचनयोगा औदारिकतन्मिश्रकार्मणकाययोगा एवं एकादशयोगा यथाख्यातसंयमे भवन्तीत्यर्थः। असंजमे जोगा तेरस आहारयदुगरहिया—असंयमे आहारकयोगद्वयरहिता अन्ये त्रयोदशयोगा भवन्ति। इति संयममार्गणा। चक्खुम्मि मिस्सूणा—इति पदस्योत्तरगाथायां सम्बन्धः॥२८॥

**बारस अचक्खुअवहिसु सव्वे सत्तेव केवलालोए।**
**किण्हादितिए तेरस पणदह तेजादियचउक्के॥ २९॥**

द्वादश अचक्षुरवध्योः सर्वे सप्तैव केवलालोके।
कृष्णादित्रिके त्रयोदश पंचदश तेज-आदिकचतुष्के॥

चक्खुम्मि मिस्सूणा—इति चक्षुर्दर्शने मिश्रोना औदारिकमिश्रवैक्रियिकमिश्रकार्मणकायहीनाः, बारस—द्वादशयोगा भवन्ति। अचक्खुअवहिसु सव्वे—अचक्षुर्दर्शनेऽवधिदर्शने च सर्वे पंचदशयोगाः स्युः। सत्तेव केवलालोए—केवलदर्शने सप्तैव केवलज्ञानोक्ता भवन्ति। इति दर्शनमार्गणा। किण्हादितिए तेरस—कृष्णादित्रिके कृष्णनीलकापोतलेश्यासु आहारकद्वयं विना त्रयोदश योगा भवन्ति। पणदह तेजादियचउक्के—पीतपद्मशुक्ललेश्यासु भव्ये च इति चतुष्के, पणदह—पंचदश योगा भवन्ति॥ २९॥

**तिदसाऽभव्वे भव्वे खाइयजुम्मे खु उवसमे सम्मे।**
**सासणमिच्छे तेरस अतिमिस्साहारकम्मइया॥ ३०॥**

त्रयोदशाभव्ये सर्वे क्षायिकयुग्मे खलु उपशमे सम्यक्त्वे।
सासादनमिथ्यात्वयोः त्रयोदश अत्रिमिश्राहारकर्मणाः॥

अभव्यजीवे आहारद्वयं विना अन्ये त्रयोदश योगा भवन्ति। इति लेश्यामार्गणा—भव्यमार्गणाद्वयं। सव्वे खाइयजुम्मे खु—खु स्फुटं,

क्षायिकयुग्मे क्षायिकवेदकसम्यक्त्वे च सर्वे पंचदशयोगाः सन्ति । उवसमे सम्मे सासणमिच्छे तेरस—इति, उपशमसम्यक्त्वे सासादनसम्यक्त्वे मिथ्यात्वसम्यक्त्वे आहारकाहारकमिश्रकाययोगद्वयं विना, तेरस—त्रयोदश योगा भवन्ति । अतिमिस्साहारकम्मइया—इति पदस्य उत्तर-गाथायां सम्बन्धः ॥ ३० ॥

**मिस्से दस सण्णीए सव्वे चउरो असण्णिए जोगा ।**
**गयकम्मइयाहारे अणाहारे कम्मणो इक्को ॥ ३१ ॥**

मिश्रे दश संज्ञिनि सर्वे चत्वारोऽसंज्ञिनि योगाः ।
गतकार्मणा आहारके अनाहारके कार्मण एकः ॥

अतिमिस्साहारकम्मइया मिस्से दस इति क्रियाकारकसम्बन्धः। मिस्से—इति, मिश्रे सम्यक्त्वे दशयोगा भवन्ति । अतिमिस्सेति—त्रिमिश्राश्च औदारिकमिश्रवैक्रियिकमिश्राहारकमिश्रा आहारकश्च कार्मणकश्च त्रिमिश्राहारकार्मणका न विद्यन्ते येषु योगेषु ते तथोक्ताः। कोऽर्थः ? मिश्रसम्यक्त्वे एते पंचवर्जा अन्ये अष्टौ मनोवचनयोगा औदारिककाययोग-वैक्रियिककाययोगौ द्वौ एवं दश योगा भवन्तीत्यर्थः । इति सम्यक्त्वमार्गणा । सण्णीए सव्वे—संज्ञिजीवे सर्वे योगा भवन्ति । चउरो असण्णिए जोगा—असंज्ञिजीवे औदारिकौदारिकमिश्रकार्मणकाययोगानुभयभाषा एते चत्वारो योगाः स्युः । इति संज्ञिमार्गणा । गयकम्मइयाहारे—आहारके जीवे गतकार्मणाः कार्मणकाययोगवर्जा अन्ये चतुर्दशयोगाः सन्ति । अणाहारे कम्मणो इक्को—अनाहारके जीवे कार्मणकाख्य एको योगः । कदा यदा जीवो विग्रहगतिं करोति तदा संभवतीत्यर्थः । इति आहारकमार्गणा ॥ ३१ ॥

इति मार्गणासु पंचदशयोगाः समाप्ताः ।

अथ चतुर्दशमार्गणास्थानेषु द्वादशोपयोगाः कथ्यन्ते;—

**णव णव बारस णव गइचउक्कए तिण्णि इगिबितियक्खे।**
**चउरक्खे उवओगा चउ बारस हुंति पंचक्खे ॥ २२ ॥**

नव नव द्वादश नव गतिचतुष्के त्रय एकद्वित्र्यक्षे।
चतुरक्षे उपयोगाश्चत्वारो द्वादश भवन्ति पंचाक्षे ॥

णवेत्यादि। गतिचतुष्के, णव णव बारस णव—नव नव द्वादश नव। अत्र यथासंख्यालंकारः। तद्यथा। नरकगतौ नवोपयोगाः। ते के? कुमति–कुश्रुत–कवधि–सम्यग्ज्ञानत्रीणि चक्षुरचक्षुरवधिदर्शनानि त्रीणि, एवं उपयोगा नव नरकगतौ नारकाणां ज्ञेयाः। तिर्यग्गतावपि एते एव उपयोगा नव भवन्ति। मनुष्यगतौ द्वादशोपयोगा भवन्ति। ते के? कुमति–कुश्रुत–कवधि–सुमति–सुश्रुता–ऽवधि–मनःपर्यय-केवलज्ञानान्यष्टौ चक्षुरचक्षुरवधिकेवलदर्शनानि चत्वारि एवं द्वादशोपयोगा मनुष्यगतौ मनुष्याणां ज्ञातव्या इत्यर्थः। देवगतौ नव ये नारकगतावुक्तास्त एवोपयोगा नव भवन्ति। इति गतिमार्गणा। तिण्णि इगिबितियक्खे—एकेन्द्रिये द्वीन्द्रिये त्रीन्द्रिये च, तिण्णि—इत्युपयोगत्रयं भवति। कुमति–कुश्रुतज्ञानद्वयं अचक्षुर्दर्शनमेकमिति त्रयं। चउरक्खे उवओगा—चतुरिन्द्रिये उपयोगाश्चत्वारः। ते के? कुमति-कुश्रुतज्ञानोपयोगौ द्वौ चक्षुरचक्षुर्दर्शनोपयोगौ द्वौ एवं चत्वारः। बारस हुंति पंचक्खे—पंचाक्षे पंचेन्द्रिये द्वादशोपयोगा भवन्ति मनुष्यापेक्षया। इतीन्द्रियमार्गणा ॥ २२ ॥

**कुमई कुसुयं अचक्खू तिण्णि वि भूआउतेउवाउवणे।**
**बारस तसेसु मणवचिसच्चाणुभएसु बारस वि ॥ २३ ॥**

कुमतिः कुश्रुतं अचक्षुः त्रयोऽपि भूअप्तेजोवायुवनस्पतिषु।
द्वादश त्रसेषु मनोवचनसत्यानुभयेषु द्वादशापि ॥

कुमइ इत्यादि । कुमतिज्ञानं कुश्रुतज्ञानमचक्षुर्दर्शनमेते त्रयोपयोगाः, भू इति पृथिवीकाये अप्काये तेजःकाये वायुकाये वनस्पतिकाये च भवन्ति । बारस तसेसु—इति, त्रसकायेषु द्वादशोपयोगा भवन्ति । इति कायमार्गणा । मणवचिसच्चाणुभएसु बारस वि—इति, सत्यमनोयोगेऽनुभयमनोयोगे सत्यवचनयोगेऽनुभयवचनयोगे एतेषु चतुर्षु योगेषु द्वादशैव उपयोगा भवन्ति ॥ २३ ॥

**दस केवलदुग वज्जिय जोगचउक्के दुदसय ओराले ।**
**केवलदुगमणपज्जवहीणा णव होंति वेउव्वे ॥ २४ ॥**

दश केवलद्विकं वर्जयित्वा योगचतुष्के द्वादश औदारिके ।
केवलद्विकमनःपर्ययहीना नव भवन्ति वैक्रियिके ॥

दस केवलदुग वज्जिय जोगचउक्के—इति, असत्यमनोयोगोभयमनोयोगासत्यवचनयोगोभयवचनयोगा इति योगचतुष्के केवलद्विकवर्जिताः केवलज्ञानकेवलदर्शनद्वयरहिता अन्ये दशोपयोगाः सन्ति । दुदसय ओराले—इति, औदारिककाययोगे द्वादशोपयोगा विद्यन्ते । केवलदुगमणपज्जवहीणा णव होंति वेउव्वे—इति, वैक्रियिककाययोगे केवलज्ञानकेवलदर्शनद्वयमनःपर्ययज्ञानहीना अन्ये नव उपयोगा भवन्ति ॥ २४ ॥

**चक्खु विभंगूणा सग मिस्से आहारजुम्मए पढमं ।**
**दंसणतियणाणतियं कम्मे ओरालमिस्से य ॥ २५ ॥**

चक्षुर्विभंगोनाः सप्त मिश्रे आहारकयुग्मे प्रथमं ।
दर्शनत्रिकाज्ञानत्रिकं कार्मणे औदारिकमिश्रे च ॥

चक्खुविभंगूणा सग मिस्से—इति, वैक्रियिकमिश्रकाययोगे चक्षुर्दर्शनविभंगज्ञानोनाः सप्त भवन्ति । के ते ? कुमतिकुश्रुतसुमतिश्रुतावधिज्ञानानि पंच अचक्षुर्दर्शनावधिदर्शनद्वयमिति सप्तोपयोगाः स्युः । आहार-

जुम्मए पढमं दंसणतिय णाणतियं–आहारकयुग्मे च, पढमं णाणतियं–प्रथमं ज्ञानत्रिकं प्रथमं दर्शनत्रिकं भवति । कोऽर्थः ? मतिश्रुतावधिज्ञानोपयोगास्त्रयः, चक्षुरचक्षुरवधिदर्शनोपयोगास्त्रयः, एवं षडुपयोगा आहारकयुग्मे भवन्तीति स्पष्टार्थः । कम्मे ओरालमिस्से य—इति, पदस्य व्याख्यानं उत्तरगाथायां ज्ञेयं ॥ ३५ ॥

**वेभंगचक्खुदंसणमणपज्जयहीण णव वधूसंढे ।**
**मणकेवलदुगहीणा णव दस पुंसे कसाएसु ॥ ३६ ॥**

विभंगचक्षुर्दर्शनमनःपर्ययहीना नव वधूषंढयोः ।
मनःकेवलद्विकहीना नव दश पुंसि कषायेषु ॥

कम्मे ओरालमिस्से य—कार्मणकाययोगे औदारिकमिश्रकाययोगे च, वेभंगचक्खुदंसणमणपज्जयहीण णव—विभंगज्ञानचक्षुर्दर्शनमनःपर्ययज्ञानरहिता अन्ये नवोपयोगाः सन्ति । इति योगमार्गणा । वधूसंढे—स्त्रीवेदे नपुंसकवेदे च, मणकेवलदुगहीणा णव—मनःपर्यय-केवलज्ञान-केवलदर्शनैस्त्रिभिर्हीना इतरे नवोपयोगाः स्युः । दस पुंसे—इति, पुंवेदे केवलज्ञानकेवलदर्शनाभ्यां विना अन्ये दश उपयोगा भवन्ति । इति वेदमार्गणा । कसाएसु—क्रोधमानमायालोभेषु केवलज्ञानदर्शनवर्जा दश एव भवन्ति । इति कषायमार्गणा ॥ ३६ ॥

**अण्णाणतिए ताणि य ति चक्खुजुम्मं च पंच सग चउसु ।**
**चउ तिण्णि णाण दंसण पंचमणाणंतिमा दुण्णि ॥ ३७ ॥**

अज्ञानत्रिके तान्येव त्रीणि चक्षुर्युग्मं च पंच सप्त चतुर्षु ।
चत्वारि त्रीणि ज्ञानानि दर्शनानि पंचमज्ञानेऽन्तिमौ द्वौ ॥

अण्णाणेत्यादि । अज्ञानत्रिके कुमतिकुश्रुतकावधिज्ञानत्रिके, ताणि य ति–तानि अज्ञानानि त्रीणि । चक्खुजुम्मं च पंच—च पुनः चक्षुर्युग्मं

एवं पंच । कुमतिज्ञाने कुश्रुतज्ञाने कुअवधिज्ञाने च कुमतिकुश्रुतविभंगज्ञानानि त्रीणि चक्षुरचक्षुदर्शने द्वे एते उपयोगाः पंच स्युः। सग चउसु चउ तिण्णि णाण दंसण—इति, चतुर्षु मतिश्रुतावधिमनःपर्ययज्ञानेषु सप्तोपयोगा भवन्ति । ते के ? चत्वारि ज्ञानानि त्रीणि दर्शनानि एवं सप्तोपयोगाः स्युः। पंचमणाणंतिमा दुण्णि—इति, पंचमे केवलज्ञाने अन्तिमौ केवलज्ञानदर्शनोपयोगौ द्वौ भवतः । इति ज्ञानमार्गणा ॥ ३७ ॥

**सामाइयजुम्मे तह सुहमे सग छप्पि तुरियणाणूणा ।**
**परिहारे देसजई छब्भणिय असंजमे णविति ॥ ३८ ॥**

सामायिकयुग्मे तथा सूक्ष्मे सप्त षडपि तुरीयज्ञानोनाः ।
परिहारे देशयतौ षट् भणिता असंयमे नवेति ॥

सामाइयजुम्मे तह सुहमे सग—सामायिकयुग्मे सामायिकच्छेदोपस्थापनासंयमद्विके तथा सुहमे—सूक्ष्मसाम्परायसंयमे सप्तोपयोगा भवन्ति । ते के ? मतिश्रुतावधिमनःपर्ययज्ञानोपयोगाश्चत्वारः चक्षुरचक्षुरवधिदर्शनोपयोगास्त्रय एवं सप्त । छप्पि तुरियणाणूणा परिहारे—इति, परिहारविशुद्धिसंयमे षडप्युपयोगास्तुरीयमनःपर्ययज्ञानोना मतिज्ञानादित्रयं चक्षुर्दर्शनादित्रयं चेति षट् संभवन्ति । देसजई—देशसंयमे संयमासंयमे, छब्भणिय—षडुपयोगा ये परिहारसंयमोक्तास्त एवोपयोगा भवन्ति । असंजमे णविति—असंयमे नवोपयोगाः । ते के ? कुमत्यादित्रयं सुमत्यादित्रयं एवं षट् चक्षुरचक्षुरवधिदर्शनोपयोगास्त्रय एवं नव भवन्ति ॥ ३८ ॥

**पणणाण दंसणचउ जहखादे चक्खुदंसणजुगेसु ।**
**गयकेवलदुग दंसणगदणाणुत्ता हि अवहिदुगे ॥ ३९ ॥**

पंचज्ञानानि दर्शनचतुष्कं यथाख्याते चक्षुर्दर्शनयुग्मेषु ।
गतकेवलद्विकं दर्शनगतज्ञानोक्ता हि अवधिद्विके ॥

पणणाण दंसणचउ जहखादे—यथाख्यातसंयमे मतिज्ञानादिपंचज्ञानोपयोगाः, चक्षुरादिदर्शनोपयोगाश्चत्वार एवमुपयोगा नव भवन्ति। इति संयममार्गणा। चक्खुदंसणजुगेसु—चक्षुरचक्षुदर्शनद्वये, गयकेवलदुग—केवलज्ञानदर्शनद्वयरहिता अन्ये दशोपयोगाः स्युः। दंसणेत्यादि, अवहिदुगे—अवधिदर्शने केवलदर्शने च पूर्वगाथोक्तज्ञानोक्ताः अवधिकेवलज्ञानोक्ताः। तत् कथं ? येऽवधिज्ञाने कथितास्ते सप्त मतिश्रुतावधिमनःपर्ययज्ञानोपयोगाश्चत्वारश्चक्षुरचक्षुरवधिदर्शनोपयोगास्त्रयोऽवधिदर्शने भवन्तीत्यर्थः। यौ केवलज्ञाने केवलज्ञानदर्शनोपयोगौ प्रोक्तौ तौ केवलदर्शने भवतः। इति दर्शनमार्गणा॥ ३९॥

**मणपज्जयकेवलदुगहीणुवओगा हवंति किण्हतिए।**
**णव दस तेजाजुयले भव्वे वि य दुदस सुक्काए॥ ४०॥**

मनःपर्ययकेवलद्विकहीनोपयोगा भवन्ति कृष्णात्रिके।
नव दश तेजोयुगले भव्येऽपि च द्वादश शुक्लायां॥

मण इत्यादि। किण्हतिए—कृष्णनीलकापोतलेश्यात्रिके मनःपर्ययकेवलज्ञानकेवदर्शनैस्त्रिभिर्हीना अन्ये नवोपयोगा भवेयुः। दस तेजाजुयले—पीतपद्मलेश्ययोर्द्वयोः केवलज्ञानदर्शनवर्जा अन्ये दशोपयोगाः सन्ति। भव्वे वि य दुदस सुक्काए—शुक्लेश्यायां द्वादशोपयोगाः स्युः। इति लेश्यामार्गणा। भव्यजीवेऽपि च द्वादशोपयोगाः सन्ति॥४०॥

**पंच असुहे अभव्वे खाइयतिदए य णव सग छेय।**
**मिस्सा मिस्से सासण मिच्छे छप्पंच पणयं च॥ ४१॥**

पंच अशुभा अभव्ये क्षायिकत्रिके च नव सप्त षडेव।
मिश्रा मिश्रे सासने मिथ्यात्वे षट् पंच पंचकं च॥

पंचेत्यादि। अभव्यजीवे कुमतिकुश्रुतविभंगज्ञानं चक्षुरचक्षुर्दर्शनोपयोगाः पंच अशुभा भवन्ति। इति भव्यमार्गणा। खाइयतिदए णव

सग छेय—क्षायिकत्रिके नव सप्त षडेव। अत्र यथासंख्यालंकारः। क्षायिकसम्यक्त्वे कुज्ञानत्रयवर्जा अन्ये नवोपयोगा भवन्ति। वेदकसम्यक्त्वे कुज्ञानत्रयकेवलज्ञानदर्शनद्वयरहिता अपरे सप्तोपयोगाः सन्ति। उपशमसम्यक्त्वे सुमत्यादित्रयचक्षुरादित्रय एवं षडुपयोगाः स्युः। मिस्सा मिस्से—मिश्रे सम्यक्त्वे मिश्राः षट् भवन्ति। ते के? मतिश्रुतावधिज्ञानोपयोगास्त्रयो मिश्ररूपाः। मिश्रा इति कोऽर्थः? किंचित्किंचित्कुज्ञानं किंचित्किंचित्सुज्ञानं चक्षुरचक्षुरवधिदर्शनोपयोगास्त्रय एवं षडुपयोगाः। सासण—इति, सासादनसम्यक्त्वे कुज्ञानत्रयं चक्षुरचक्षुर्दर्शनद्वयं एवं पंचोपयोगाः स्युः। मिच्छे—मिथ्यात्वसम्यक्त्वे सासादनोक्तानामुपयोगानां पंचकं भवति। इति सम्यक्त्वमार्गणा॥ ४१॥

**दस सण्णि असण्णीए चदु पढमाहारए य बारसयं।**
**मणचक्खुविभंगूणा णव अणाहारेय उवओगा॥ ४२॥**

दश संज्ञिनि असंज्ञिनि चत्वारः प्रथमे आहारके च द्वादशकं।
मनश्चक्षुर्विभंगोना नव अनाहारि च उपयोगाः॥

दस सण्णि इति। केवलज्ञानदर्शनद्वयरहिता अपरे दशोपयोगा संज्ञिजीवे भवन्ति। असण्णीए चदु पढमा—असंज्ञिजीवे प्रथमाश्चत्वार उपयोगा भवन्ति। ते के? कुमतिद्वयं चक्षुरचक्षुर्दर्शनद्वयमेवं चत्वारः। इति संज्ञिमार्गणा। आहारए बारसयं—आहारकजीवे उपयोगानां द्वादशकं भवेत्। मणचक्खुविभंगूणा णव अणाहारि उवओगा—अनाहारकजीवे मनःपर्ययज्ञानचक्षुर्दर्शनविभंगज्ञानैरूना रहिता अन्ये नवोपयोगा भवन्ति॥ ४२॥

इति चतुर्दशमार्गणासु द्वादशोपयोगा निरूपिताः।

---

अथ चतुर्दशजीवसमासेषु पंचदशयोगाः कथ्यन्ते;—

**णवसु चउक्के इक्के जोगा इगि दो हवंति बारसया ।**
**तब्भवगईसु एदे भवंतरगईसु कम्मइओ ॥ ४३ ॥**
**सत्तसु पुण्णेसु हवे ओरालिय मिस्सयं अपुण्णेसु ।**
**इगिइगिजोग विहीणा जीवसमासेसु ते णेया ॥ ४४ ॥**

नवसु चतुष्के एकस्मिन् योगा एको द्वौ भवन्ति द्वादश ।
तद्भवगतिषु एते भवान्तरगतिषु कार्मणं ॥
सप्तसु पूर्णेषु भवेत् औदारिकं मिश्रकं अपूर्णेषु ।
एकैकयोगः द्विहीनाः जीवसमासेषु ते ज्ञेयाः ॥

गाथाद्वयेन सम्बन्धः । जीवसमासेसु ते णेया—जीवसमासेषु ते योगा ज्ञेया ज्ञातव्या भवन्ति । कथमित्याह—णवसु चउक्के इक्के जोगा इगि दो हवंति बारसया—यथासंख्येन व्याख्येयं, नवसु जीवसमासस्थानेषु इगि—एको योगो ज्ञेयः । चउक्के—चतुर्षु जीवसमासस्थानेषु, दो—द्वौ योगौ ज्ञातव्यौ । इक्के—एकस्मिन् जीवसमासस्थाने, बारसया—द्वादशयोगा भवन्ति । नवसु जीवसमासेषु एको योग इत्युक्तं तर्हि नवसमासाः के, तत्र एको योगो क इति चेदुच्यते—एकेन्द्रियसूक्ष्मापर्याप्ते औदारिकमिश्रकाययोग एकः स्यात् । एकेन्द्रियसूक्ष्मपर्याप्ते औदारिककाययोग एको भवति । एकेन्द्रियबादरापर्याप्ते औदारिकमिश्रकाययोगोऽस्ति । एकेन्द्रियबादरपर्याप्ते औदारिककाययोग एको वर्तते । द्वीन्द्रियापर्याप्तकाले औदारिकमिश्रकाययोग एकः संभवति । त्रीन्द्रियापर्याप्तकाले औदारिकमिश्रकाययोग एकः स्यात् । चतुरिन्द्रियापर्याप्तकाले औदारिकमिश्रकाययोग एकः प्रवर्तते । पंचेन्द्रियासंज्ञिजीवापर्याप्ते औदारिकमिश्रकाययोग एकः स्यात् । पंचेन्द्रियसंज्ञिजीवापर्याप्तकाले

औदारिकमिश्रकाययोग एको भवति । एवं नवसु जीवसमासस्थानेषु योग एको भवति। एवं चतुर्षु-जीवसमासेषु द्वौ योगौ भवत इति प्रोक्तं तर्हि चत्वारो जीवसमासाः के तत्र द्वौ योगौ कौ इत्याशंकायामाह—द्वीन्द्रिय-पर्याप्ते औदारिककाययोगानुभयवचनयोगौ भवतः । त्रीन्द्रियपर्याप्तकाले औदारिककाययोगानुभयवचनयोगौ स्तः । चतुरिन्द्रियपर्याप्ते औदारिक-काययोगानुभयवचनयोगौ वर्तेते । पंचेन्द्रियासंज्ञिपर्याप्ते औदारिककाय-योगानुभयवचनयोगौ संभवतः । इति चतुर्षु जीवसमासेषु द्वौ द्वौ योगौ प्ररूपितौ । एकस्मिन् जीवसमासे द्वादशयोगा भवन्तीति पूर्वगाथायां सूचितं तर्हि एको जीवसमासः कः तत्र द्वादशयोगाः के इत्याह—पंचे-न्द्रियसंज्ञिपर्याप्तजीवसमासे अष्टौ मनोवचनयोगा औदारिककाययोग-वैक्रियिककाययोगाहारककाययोगाहारकमिश्रकाययोगाश्चत्वारः,एवं द्वादश-योगाः पंचेन्द्रियसंज्ञिपर्याप्तकाले संभवन्तीत्यर्थः । इत्येकस्मिन् जीवस-मासे द्वादशयोगा निरूपिताः । तब्भवगईसु एदे—इति, तेषामेके-न्द्रियसूक्ष्मापर्याप्तादीनां जीवानां भवप्राप्तेषु, एदे—इति, एते एको द्वौ द्वादश योगा भवन्ति । भवंतरगईसु कम्मइओ—कार्मणको योगः स भवान्तरगतिषु । प्रकृताद्भवादन्यो भवो भवान्तरं तत्र गतयो गमनानि भवान्तरगतिषु भवान्तरगमनेषु कार्मणकाययोगो भवतीत्यर्थः । सत्तसु पुण्णेसु हवे औरालिय—सप्तसु जीवसमासेषु पर्याप्तेषु औदारिककाय-योगो भवति । मिस्सयं अपुण्णेसु—इति, अपर्याप्तेषु सप्तसु एकेन्द्रियसू-क्ष्मबादरद्वित्रिचतुःपंचेन्द्रियसंज्ञ्यसंज्ञिजीवेषु अपर्याप्तकालेषु सप्तस्थानेषु, मिस्सयं—औदारिकमिश्रकायो भवेत् । इगि इगि जोग—इति,द्वीन्द्रियत्री-

१ यदा मनुष्यतिर्यग्गतौ जीवाः प्राप्नुवन्ति तदा औदारिकमिश्रः संभवति । यदा नरकदेवगती प्राप्नुवन्ति तदा वैक्रियिकमिश्रकायः संभवति । २ देवनारका-पेक्षया वैक्रियिकयोगोऽपि । ३ अत्रापि पंचेन्द्रियसंज्ञिषु पूर्ववदन्मवस्था ।

न्द्रियचतुरिन्द्रियपंचेन्द्रियासंज्ञिपर्याप्तेषु चतुःस्थानेषु एकैकस्य योगस्य पुनरप्यन्यस्यैकस्य योगस्य संयोग क्रियते एवं द्वयं स्यात् । कोऽर्थ ? द्वीन्द्रियादिपर्याप्तेषु चतुःस्थानेषु औदारिककाययोगानुभयवचनयोगौ द्वौ भवत इत्यर्थः । विहीणा—पंचेन्द्रियपर्याप्तेषु द्वादशयोगा भवन्तीति कथितं तत्कथं योगास्तु पंचदश वर्तन्ते ? ते योगाः, विहीणा—द्वाभ्या-मौदारिकमिश्रकायवैक्रियिकमिश्रकायाभ्यां हीनाः क्रियन्ते । भवांतरगईसु कम्मइओ इति वचनात् कार्मणकायेन विना अन्ये द्वादशयोगाः पंचे-न्द्रियसंज्ञिपर्याप्तकेषु भवन्तीत्यर्थः ॥ ४३ ॥ ४४ ॥

इति जीवसमासेषु योगा उपन्यस्ताः ।

---

अथ चतुर्दशजीवसमासेषु यथासंभवमुपयोगा लिख्यन्ते;—

**कुमइदुगा अचक्खु तिय दससु दुगे चदु हवंति चक्खुजुदा ।**
**सण्णिअपुण्णे पुण्णे सग दस जीवेसु उवओगा ॥ ४५ ॥**

कुमतिद्विकौ अचक्षुः त्रयः दशसु द्विके चत्वारो भवन्ति ।
चक्षुर्युताः संज्ञ्यपर्याप्ते पर्याप्ते सप्त दश जीवेषु उपयोगाः ॥

कुमइदुगा अचक्खु तिय दससु—इति, दशसु जीवसमासेषु कुमति-कुश्रुतज्ञानोपयोगौ द्वौ अचक्षुर्दर्शनोपयोगश्चैक एते त्रय उपयोगा भवन्ति । ते दशजीवसमासाः के येष्वेते त्रय उपयोगा जायन्ते तदाह—एकेन्द्रियसू-क्ष्मापर्याप्तः, एकेन्द्रियसूक्ष्मपर्याप्तः, एकेन्द्रियबादरापर्याप्तः, एकेन्द्रियबा-दरपर्याप्तः, द्वीन्द्रियापर्याप्तः द्वीन्द्रियपर्याप्तः, त्रीन्द्रियापर्याप्तः, त्रीन्द्रियप र्याप्तः, चतुरिन्द्रियापर्याप्तः, पंचेन्द्रियासंज्ञिजीवापर्याप्तः । एतेषु दशसु जीवसमासेषु कुमतिकुश्रुतज्ञानोपयोगौ द्वौ अचक्षुर्दर्शनोपयोगश्चैते त्रयो

---

१ पंचेन्द्रियासंइ्रियासंज्ञिपर्याप्तेषु इति पाठः पुस्तके ।

भवन्तीति स्पष्टार्थः । दुगे चदु इवंति चक्खु जुदा—इति, द्वयोर्जीवसमासयोः चतुरिन्द्रियपर्याप्तपंचेन्द्रियासंज्ञिजीवपर्याप्तयोश्चत्वार उपयोगा भवन्ति । ते के ? पूर्वोक्ताः कुमतिकुश्रुताचक्षुर्दर्शनोपयोगास्त्रयः, चक्खु जुदा—इति, चक्षुर्दर्शनोपयोगसहिताः एवं चत्वार उपयोगाः स्युः । सण्णि अपुण्णे पुण्णे सग दस—अत्र यथासंख्यालंकारः, पंचेन्द्रियसंज्ञ्यपर्याप्ते सग—इति, सप्तोपयोगा भवन्ति । ते के ? कुमतिश्रुतसुमतिश्रुतावधिज्ञानोपयोगाः पंच अचक्षुर्दर्शनावधिदर्शनोपयोगौ द्वौ एवं सप्त । पुण्णे दस—पंचेन्द्रियसंज्ञिपर्याप्ते उपयोगा दश भवन्ति । के ते दश ? केवलज्ञानदर्शनवर्ज्या अन्ये दशोपयोगाः स्युः । जीवेसु उपओगा—जीवसमासेषु द्वादशोपयोगा यथाप्राप्ति प्ररूपिताः ॥ ४५ ॥

इति जीवसमासेषूपयोगा न्यस्ताः ।

---

अथ चतुर्दशगुणस्थानेषु यथासंभवं योगा निरूप्यन्ते;—

**मिच्छदुगे अयदे तह तेरस मिस्से पमत्तए जोगा ।**
**दस इगिदस सत्तसु णव सत्त सयोगे अयोगी य ॥ ४६ ॥**

मिथ्यात्वद्विके अयते तथा त्रयोदश मिश्रे प्रमत्तके योगाः ।
दशैकादश सप्तसु नव सप्त सयोगे अयोगिनि च ॥

मिच्छेत्यादि । मिथ्यात्वप्रथमगुणस्थाने सासादनगुणस्थाने च तथा अयदे—चतुर्थगुणस्थाने, तेरस—इति, आहारकाहारकमिश्रयोगाभ्यां विना अन्ये त्रयोदश योगा भवन्ति । मिस्से पमत्तए जोगा दस इगिदस—अत्र यथासंख्यत्वेन भाव्यं, मिस्से—तृतीये मिश्रगुणस्थाने दश योगा भवन्ति । ते के ? अष्टौ मनोवचनयोगा औदारिककायवैक्रियिककाययोगौ द्वौ एवं दश । पमत्तए जोगा इगिदस—षष्ठे प्रमत्तगुणस्थाने योगा एकादश

भवन्ति । ते के ? अष्टौ मनोवचनयोगा औदारिककाययोग आहारककाययोगस्तन्मिश्रकाययोगश्चेति त्रय एव एकादश योगाः । सत्तसु णव—सप्तसु गुणस्थानेषु पंचमे देशविरते सप्तमेऽप्रमत्ते अष्टमेऽपूर्वकरणे नवमेऽनिवृत्तिकरणे दशमे सूक्ष्मसाम्पराये एकादशे उपशान्तकषाये द्वादशे क्षीणकषाये एवं एतेषु कथितेषु सप्तगुणस्थानेषु नव योगाः स्युः । ते के ? अष्टौ मनोवचनयोगा औदारिककाययोगश्चैक एवं नव । सत्त सयोगे—सयोगकेवलिनि सप्त योगा भवन्ति । ते के ? सत्यमनोयोगोऽनुभयमनोयोगः सत्यवचनयोगोऽनुभयवचनयोग औदारिककाययोगस्तन्मिश्रकाययोगः कार्मणकाययोग इति सप्त योगाः । अयोगिनि चतुर्दशगुणस्थाने शून्यं योगाभावः ॥ ४६ ॥

इति गुणस्थानेषु योगा निरूपिताः ।

---

अथ चतुर्दशगुणस्थानेषु द्वादशोपयोगा वर्ण्यन्ते;—

**पढमदुगे पण पणयं मिस्सा मिस्से तदो दुगे छक्कं ।**
**सत्तुवओगा सत्तसु दो जोगि अजोगिगुणठाणे ॥ ४७ ॥**

प्रथमद्विके पंच पंचकं मिश्रा मिश्रे ततो द्विके षट्कं ।
सप्तोपयोगाः सप्तसु द्वौ योग्ययोगिगुणस्थाने ॥

पढमदुगे—प्रथमद्विके मिथ्यात्वसासादनगुणस्थाने पणपणयं—पंच पंच उपयोगा भवन्ति । ते के ? कुमतिकुश्रुतविभगज्ञानोपयोगास्त्रयः चक्षुरचक्षुर्दर्शनोपयोगौ द्वौ एवं पंच । मिस्सा मिस्से तदो दुगे छक्कं—मिश्रगुणस्थाने तृतीये, तदो—इति, ततो मिश्रगुणस्थानात्, दुगे—इति, अविरते चतुर्थगुणस्थाने देशविरतगुणस्थाने पंचमे छक्कं—षडुपयोगा भवन्ति । के ते ? मतिश्रुतावधिज्ञानोपयोगास्त्रयः चक्षुरचक्षुरवधिदर्शि-

नोपयोगास्त्रयः । अत्र एतावान् विशेषः—ये मिश्रगुणस्थानगा उपयोगास्ते मिश्रा भवन्ति । सत्तुवजोगा सत्तसु—सप्तसु गुणस्थानेषु प्रमत्ताप्रमत्तापूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायथाख्यातोपशान्तकषायक्षीणकषायाभिधानेषु उपयोगाः सप्त भवन्ति । ते के ? सुमतिश्रुतावधिमनःपर्ययज्ञानोपयोगाश्चत्वारः चक्षुरचक्षुरवधिदर्शनोपयोगास्त्रय एते सप्त स्युः । दो जोगिअजोगिगुणठाणे—सयोगिनि त्रयोदशगुणस्थाने अयोगिनि च द्वौ उपयोगौ स्तः । तौ कौ ? केवलज्ञानदर्शनोपयोगौ द्वौ ॥ ४७ ॥

इति चतुर्दशगुणस्थानेषूपयोगा जाताः ।

---

अथ चतुर्दशमार्गणासु समपंचाशत्प्रत्ययाः प्रत्यासंभवं कथ्यन्ते । तत्र बालबोधनार्थं तेषां प्रत्ययानां पूर्वं नामानि निगद्यन्ते;—

**मिच्छत्तमविरदी तह कसाय जोगा य पच्चयाभेया ।**
**पण दुदस बंधहेदू पणवीसं पण्णरसा हुंति ॥ ४८ ॥**

मिथ्यात्वमविरतयस्तथा कषाया योगाश्च प्रत्ययभेदाः ।
पंच द्वादश बन्धहेतवः पंचविंशतिः पंचदश भवन्ति ॥

मिच्छत्तं—मिथ्यात्वपंचकं एकान्तविपरीतविनयसंशयाज्ञानोद्भवमिति पंचभेदं । तथा चोक्तं;—

**मिच्छोदएण मिच्छत्तमसद्दहणं च तच्चअत्थाणं ।**
**एयंतं विवरीयं विणयं संसयिदमण्णाणं ॥ १ ॥**

अविरदी ( अविरतयः ) द्वादश । कास्ताः ? उक्तं च—

**छस्सिंदिएसु विरदी छज्जीवे तह य अविरदी चेव ।**
**इंदियपाणासंजम दुदसं होदित्ति णिद्दिट्ठं ॥ १ ॥**

---

१ मिथ्यात्वोदयेन मिथ्यात्वं अश्रद्धानं च तत्वार्थानां ।
एकान्तं विपरीतं विनयं संशयितमज्ञानमिति ॥

२ षट्स्विन्द्रियेषु अविरतिः षड्जीवे तथा चाविरतिश्चैव ।
इन्द्रियप्राणासंयमा द्वादश भवन्तीति निर्दिष्टं ॥

तह कसाय—इति, तथा कषायाः पंचविंशतिः। के ते? अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाः क्रोधमानमायालोभा इति षोडश, हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकभेदा एवं पिण्डीकृताः पंचविंशतिः स्युः। योगा इति पंचदश। ते के? सत्यासत्योभयानुभयमनोवचनविकल्पा अष्टौ योगा औदारिकौदारिकमिश्रवैक्रियिकवैक्रियिकमिश्राहारकाहारकमिश्रकार्मणकाययोगाः सप्त, एवमेकत्रीकृताः पंचदशयोगाः। पच्चयाभेया—प्रत्ययभेदा आस्रवप्रकाराः। पण दुदस—अत्र यथासंख्यं, पण—मिथ्यात्वं पंचप्रकारं। दुदस—अविरतयो द्वादश। पणवीसं—कषायाः पंचविंशतिः। पण्णरसा—योगाः पंचदश। इति—भवन्ति। कथंभूता एते? बंधहेदू—कर्मबन्धहेतवः कर्मबन्धकारणानीत्यर्थः॥ ४८॥

**आहारोरालियदुगित्थीपुंसोहीण णिरइ इगिवण्णं।**
**आहारयवेउव्वियदुगूण तेवण्ण तिरियक्खे॥ ४९॥**

आहारौदारिकद्विकस्त्रीपुंहीना नरके एकपंचाशत्।
आहारकवैक्रियिकद्विकोनाः त्रिपंचाशत् तिरश्चि॥

आहारेत्यादि। णिरइ—नरकगतौ आहारकाहारकमिश्रद्वयं औदारिकौदारिकमिश्रद्वयं स्त्रीवेदपुंवेदद्वयं एतैः षड्भिर्हीनाः, इगिवण्णं—अन्ये उद्धरिता एकपंचाशत्प्रत्यया भवन्ति। आहारयेत्यादि—तिरियक्खे—तिर्यग्गतौ आहारकतन्मिश्रद्वयं वैक्रियिकतन्मिश्रद्वयं एतैश्चतुर्भिरूना अपरे तेवण्ण—त्रिपंचाशत् आस्रवा भवन्ति॥ ४९॥

**पणवण्णं वेउव्वियदुगूण मणुएसु हुंति बावण्णं।**
**संढाहारोरालियदुगेहिं हीणा सुरगईए॥ ५०॥**

---

१ 'कार्मणकार्मण' इति पाठः पुस्तके।

पंचपंचाशत् वैक्रियिकद्विकोना मनुजेषु भवन्ति—
द्विपंचाशत् । षंढाहारौदारिकद्विकैर्हीनाः सुरगत्याम् ॥

मणुएसु—मनुजेषु मनुष्यगतौ, वेउव्वियदुगूण—वैक्रियिकतन्मिश्र-द्विकोनाः, पणवण्णं—पंचपंचाशत्प्रत्ययाः, हुंति—संभवन्ति । बावण्णं संढाहारोरालियदुगेहिं हीणा सुरगईए—सुरगतौ नपुंसकवेदश्चाहारकतन्मिश्रद्वयं च औदारिकौदारिकमिश्रद्वयं च तैः पंचभिर्हीनाः, बावण्णं—द्वापंचाशदास्रवाः स्युः । इति गतिमार्गणासु प्रत्यया निरूपिताः ॥५०॥

**मणरसणचउक्कित्थीपुरिसाहारयवेउव्वियजुगेहिं ।**
**एयक्खे मणवचिअडजोगेहिं हीण अडतीसं ॥ ५१ ॥**

मनोरसनचतुष्कस्त्रीपुरुषाहारकवैक्रियिकयुगैः ।
एकाक्षे मनोवागष्टयोगैर्हीना अष्टात्रिंशत् ॥

एयक्खे—एकेन्द्रियजीवेषु, मणरसेत्यादि—मनश्च रसनचतुष्कमिति रसनघ्राणचक्षुःश्रोत्रचतुष्कं च स्त्रीवेदश्च पुंवेदश्च आहारकाहारकमिश्रद्वयं च वैक्रियिकतन्मिश्रयुग्मं चैतैरेकादशभिर्हीनाः पुनः मणवचिअडजोगेहिं—सत्यासत्योभयानुभयमनोवचनयोगैरष्टभिर्हीना अन्येभ्य एकोनविंशतिप्रत्ययेभ्य उद्धरिता अन्ये, अडतीसं—अष्टात्रिंशत्प्रत्यया भवन्ति ॥५१॥

**एदे य अंतभासारसणजुया घाणचक्खुसंजुत्ता ।**
**चालं इगिबेयालं कमेण वियलेसु विण्णेया ॥ ५२ ॥**

एते च अन्तभाषारसनायुक्ता घ्राणचक्षुःसंयुक्ताः ।
चत्वारिंशत् एकद्विचत्वारिंशत् क्रमेण विकलेषु विज्ञेयाः ॥

कमेण—अनुक्रमेण, वियलेसु—विकलत्रयेषु द्वित्रिचतुरिन्द्रियेषु, विण्णेया—प्रत्यया ज्ञातव्याः स्युः । कथं ? एदे य—एकेन्द्रियोक्ता अष्टात्रिंशत्प्रत्यया अन्तभाषारसनायुक्ता अनुभयवचनजिह्वासहिताः ।

चालं—चत्वारिंशत्प्रत्यया द्वीन्द्रियजीवे भवन्तीत्यर्थः। पुनरेते पूर्वोक्ता अष्टात्रिंशत् अनुभयवचनरसनघ्राणसहिताः, इगियालं—एकचत्वारिंशदास्रवास्त्रीन्द्रिये स्युः। तथा पूर्वोक्ता अष्टात्रिंशत् अनुभयवचनजिह्वेन्द्रियघ्राणचक्षुःसंयुक्ताः, बेयालं—द्विचत्वारिंशत् चतुरिन्द्रिये ज्ञातव्या इत्यर्थः ॥ ५२ ॥

**पंचेंदिए तसे तह सव्वे एयक्खउत्त अडतीसा।**
**थावरपणए गणिया गणणाहेहिं पच्चया णियमा ॥ ५३ ॥**

पंचेन्द्रिये त्रसे तथा सर्वे एकाक्षोक्ता अष्टात्रिंशत्।
स्थावरपंचके गणिता गणनाथैः प्रत्यया नियमात् ॥

पंचेत्यादि। पंचेन्द्रिये जीवे नानाजीवापेक्षया सर्वे प्रत्यया भवन्ति। इन्द्रियमार्गणासु प्रत्ययाः। तसे तह सव्वे—तथा त्रसे त्रसकाये सर्वे सप्तपंचाशन्नानाजीवापेक्षया आस्रवा भवन्ति। थावरपणए—स्थावरपंचके पृथिव्यप्तेजोवायुवनस्पतिकायेषु पंचसु, एयक्खउत्त अडतीसा—एकेन्द्रिये ये उक्ता अष्टात्रिंशत्प्रत्यया एव ते भवन्तीत्यर्थः। गणिया गणणाहेहिं पच्चया णियमा—नियमान्निश्चयात् गणनाथैर्गणधरैः प्रत्यया गणिता यथासंभवं संख्यां नीताः। इति कायमार्गणास्वास्रवाः ॥५३॥

**आहारदुगं हिच्चा अण्णसु जोएसु णिय णियं थित्ता।**
**जोगं ते तेदाला णायव्वा अण्णजोगूणा ॥ ५४ ॥**

आहारकद्विकं हित्वा अन्येषु योगेषु निजं निजं धृत्वा।
योगं ते त्रिचत्वारिंशत् ज्ञातव्या अन्ययोगोनाः ॥

आहारदुगं हिच्चा—आहारद्विकं हित्वा वर्जयित्वा। अण्णसु जोएसु णिय णियं थित्ता जोगं—अन्येषु त्रयोदशयोगेषु मध्ये निजं निजं स्वकीयं

स्वकीयं योगं धृत्वा पुनः, अण्णजोगूणा—अन्यैर्द्वादशभिर्योगैरूनास्ते, तेदाला णायव्वा—इति, ते प्रत्ययाः स्वकीयस्वकीययोगयुक्ताः त्रिचत्वारिंशदास्रवा ज्ञातव्याः । अथ स्पष्टतयोच्यते—सत्यमनोयोगे मिथ्यात्वपंच (कं) अविरतयो द्वादश कषायाः पंचविंशतिः स्वकीयमनोयोगश्चैक एवं त्रिचत्वारिंशत् आस्रवा भवन्ति । एवं असत्यमनोयोगे ४३, उभयमनोयोगे ४३, अनुभयमनोयोगे ४३, सत्यवचनयोगे ४३, असत्यवचनयोगे ४३, उभयवचनयोगे ४३, अनुभयवचनयोगे ४३, औदारिककाययोगे ४३, तन्मिश्रे ४३, वैक्रियिककाययोगे ४३, तन्मिश्रकाययोगे ४३, कार्मणकाययोगे ४३, ॥ १४ ॥

**संजालासंढित्थी हवंति तह णोकसायणियजोया ।**
**बारस आहारजुगे आहारयउहयपरिहीणा ॥ ५५ ॥**

संज्वलना अषण्ढस्त्रियो भवन्ति तथा नोकषायनिजयोगाः ।
द्वादश आहारकयुगे आहारकोभयपरिहीनाः ॥

आहारजुगे—आहारककाययोगे तन्मिश्रकाययोगे च, बारस—द्वादश प्रत्यया भवन्ति । ते के ? संजाला इत्यादि । संज्वलनक्रोधमानमायालोभाश्चत्वारः, तह—तथा, असंढित्थी—पंढस्त्रीवेदद्वयवर्जिता अन्ये हास्यरत्यरतिशोकभयजुगुप्सापुंवेदा इति नोकषायाः सप्त । णियजोया—स्वकीयस्वकीययोगश्चैकैकः । आहारके आहारककाययोगः, आहारकमिश्रे आहारकमिश्रकाययोग इत्यर्थः । इति योगमार्गणायां योगा (आस्रवाः) निरूपिताः । 'आहारयउहयपरिहीणा' इति पदस्य व्याख्यानं उत्तरगाथायां ॥ ५५ ॥

तथा हि;—

**इत्थिणउंसयवेदे सव्वे पुरिसे य कोहपमुहेसु ।**
**णियरहियइयरबारसकसायहीणा हु पणदाला ॥ ५ ॥**

स्त्रीनपुंसकवेदे सर्वे पुरुषे च क्रोधप्रभृतिषु ।
निजरहितेतरद्वादशकषायहीना हि पंचचत्वारिंशत् ॥

आहारउहयपरिहीणा इत्थिणउंसयवेदे—स्त्रीवेदे नपुंसकवेदे च आहारकद्वयपरिहीनाः । तथा स्त्रीवेदे निरूप्यमाणे स्त्रीवेदो भवति, नपुंसकवेदे निरूप्यमाणे नपुंसकवेदो भवेत्, पुंवेदे निरूप्यमाणे पुंवेदोऽस्ति । एवं एकस्मिन् वेदे निरूप्यमाणे स्वकीयवेदः स्यात् । अन्यवेदद्वयं न भवति । कोऽर्थः ? स्त्रीवेदे नपुंसकवेदे च मिथ्यात्व ५ अविरति १२ कषाय २३ योग १३ एवं त्रिपंचाशत् अस्रवाः स्युरित्यर्थः । सव्वे पुरिसे य—इति, पुंवेदे स्त्रीवेदनपुंसकवेदद्वयरहिता अन्ये पंचपंचाशत्प्रत्यया भवन्ति । कोहपमुहेसु—क्रोधमानमायालोभेषु चतुर्षु, हु—स्फुटं, पणदाला—पंचचत्वारिंशत्प्रत्यया भवन्ति । कथमिति चेत् ? णियरहियइयरबारसकसायहीणा—स्वकीयस्वकीयकषायचतुष्करहिता इतरद्वादशकषायहीनाः । क्रोधचतुष्के यदा स्वकीयं क्रोधचतुष्कं गृह्यते तदा इतरे द्वादश कषाया न भवन्ति । यदा मानचतुष्के स्वकीयमानचतुष्कं गृह्यते तदा तदपरे द्वादशकषाया न स्युः । एवं मायालोभयोर्योजनीयं । अनु च स्पष्टार्थं पंचचत्वारिंशत्प्रत्यया गण्यन्ते, किं नामानः ? तथा हि—अनन्तानुबन्ध्यादिक्रोधचतुष्के मिथ्यात्व ५ अविरति १२ अनन्तानुबन्ध्यादिक्रोधचतुष्कं ४ योग १५ हास्यादि ९ एवं ४५ । अयं क्रमः मानचतुष्के मायाचतुष्के लोभचतुष्के संभावनीयः । इति कषायमार्गणायां कषायाः ? ॥ ५६ ॥

**कुमइदुगे पणवण्णं आहारदुगूण कम्ममिस्सूणा ।**
**बावण्णा वेभंगे मिच्छंअणपंचचउहीणा ॥ ५७ ॥**

कुमतिद्विके पंचपंचाशत् आहारकद्विकोनाः कर्ममिश्रोनाः ।
द्वापंचाशत् विभंगे मिथ्यात्वानपंचचतुर्हीनाः ॥

कुमइदुगे—कुमतिज्ञाने कुश्रुतज्ञाने च, पणवण्णं आहारदुगूण—आहारकाहारकमिश्रद्विकोना अन्ये, पणवण्णं—पंचपंचाशत्प्रत्यया भवन्ति। कम्मामिस्सूणा बावण्णा वेभंगे—विभंगे कुअवधिज्ञाने आहारकाहारकमिश्र-कार्मणवैक्रियिकमिश्रौदारिकमिश्रैः पंचभिर्हीना अन्ये:, बावण्णा—द्वापंचाशदास्रवाः स्युः । 'मिच्छअणपंचचउहीणा' पदव्याख्याग्रगाथायां ॥५७॥

**णाणतिए अडदालाऽसंदित्थीणोकसाय मणपज्जे ।**
**वीसं चउसंजाला णवादिजोगा सगंतिल्ले ॥ ५८ ॥**

ज्ञानत्रिके अष्टचत्वारिंशत् अषण्ढस्त्रीनोकषाया मनःपर्यये ।
विंशतिः चतुःसंज्वलनाः नवादियोगा सप्तान्तिमे ॥

मिच्छअणपंचचउहीणा णाणतिए अडदाला—णाणतिए—ज्ञानत्रिके सुमतिश्रुतावधिज्ञानेषु मिथ्यात्वपंचकानन्तानुबन्धिचतुष्कहीना अन्ये अष्टाचत्वारिंशत्प्रत्ययाः स्युः। असंढीत्यादि—मणपज्जे—मनःपर्ययज्ञाने, वीसं—विंशतिः प्रत्यया भवन्ति । के ते ? असंढित्थीणोकसाय—षंढस्त्रीवेदद्वयवर्ज्या अन्ये पुंवेदहास्यरत्यरतिशोकभयजुगुप्सानामानः सप्त नोकषयाः, चउसंजाला—चत्वारः संज्वलनक्रोधमानमायालोभाः,णवादिजोगा—अष्टौ मनोवचनयोगा औदारिक एक इति नव ते सर्वे पिण्डीकृता विंशतिरास्रवाः । सगंतिल्ले—अंतिल्ले—अन्तज्ञाने केवलज्ञाने, सग—सप्त प्रत्यया भवन्ति । के ते ? सत्यमनोयोगानुभयमनोयोगसत्यवचनयोगानुभयवचनयोगाश्चत्वार औदारिकौदारिकमिश्रकार्मणकाययोगास्त्रय एवं सप्त । इति ज्ञानमार्गणायामास्रवाः ॥ ५८ ॥

**वेउव्विदुगूरालियमिस्सयकम्मूण एयदसजोया ।**
**संजालणोकसाया चउवीसा पढमजमजुम्मे ॥ ५९ ॥**

वैगूर्विकद्विकौदारिकमिश्रकार्मणोना एकादशयोगाः ।
संज्वलननोकषायाः चतुर्विंशतिः प्रथमयमयुग्मे ॥

पढमजमजुम्मे—प्रथमयमयुग्मे सामायिकसंयमे छेदोपस्थापनासंयमे च, चउवीसा—चतुर्विंशतिप्रत्यया भवन्ति। के ते? वेउव्वि—वैक्रियिकतन्मिश्रद्वयौदारिकमिश्रकार्मणकैश्च चतुर्भिर्हीना अन्ये, एयदसजोया—अष्टौ मनोवचनयोगा औदारिककाययोगाहारकाहारकमिश्रकाययोगाश्चेति त्रयः समुदिता एकादशयोगाः। संजाल—संज्वलनक्रोधमानमायालोभाश्चत्वारः। णोकसाया—हास्यादिनवनोकषाया एवं चतुर्विंशतिः ॥ ५९ ॥

**परिहारे आहारयदुगरहिया ते हवंति बावीसं।**
**संजलणलोहमादिमणवजोगा दसय हुंति सुहुमे य ॥ ६० ॥**

परिहारे आहारकद्विकरहितास्ते भवन्ति द्वाविंशतिः।
संज्वलनलोभ आदिमनवयोगा दश भवन्ति सूक्ष्मे च ॥

परिहारेत्यादि। परिहारविशुद्धिसंयमे, आहारयदुगरहिया—आहारकाहारकमिश्रद्वयरहितास्ते पूर्वोक्ताः सामायिकच्छेदोपस्थापनयोः कथिता द्वाविंशतिः प्रत्यया भवन्ति। अथ व्यक्तिः—अष्टमनोवचनयोगौदारिकसंज्वलनचतुष्कहास्यादिनवेति द्वाविंशतिः प्रत्ययाः परिहारसंयमे भवन्तीत्यर्थः। संजलणेत्यादि। सुहुमे य—च पुनः सूक्ष्मसाम्परायसंयमे, दसय हुंति—दश प्रत्ययाः स्युः। ते के? एकः संज्वलनलोभ आदिमनवयोगा एवं दश ॥ ६० ॥

**ओरालमिस्सकम्मइयसंजुया लोहहीण जहखादे।**
**णवजोय णोकसाया अट्ठंतकसाय देसजमे ॥ ६१ ॥**

औदारिकमिश्रकार्मणसंयुता लोभहीना यथाख्याते।
नवयोगा नोकषाया अष्टान्तकषाया देशयमे ॥

जहखादे—यथाख्यातसंयमे सूक्ष्मसाम्परायोक्ता ये दश ते, ओरालमिस्सेत्यादि—औदारिकमिश्रकायकार्मणकायाभ्यां द्वाभ्यां संयुक्ता द्वादश

भवन्ति, एते द्वादश लोहहीणा—संज्वलनलोभरहिताः क्रियन्ते तदा एकादश भवन्ति। के ते ? अष्टौ मनोवचनयोगा औदारिकौदारिकमिश्रकार्मणकायास्त्रय एते एकादश यथाख्यातसंयमिनां भवन्तीत्यर्थः। 'णवजोय णोकसाया अडंतकसाय देसजमे' इयमर्धगाथा तस्याः परिपूर्णसम्बन्ध उत्तरगाथायां ज्ञेयः ॥ ६१ ॥

**तसअसंजमहीणऽजमा सव्वे सगतीस संजमविहीणे।**
**आहारजुगूणा पणवण्णं सव्वे य चक्खुजुगे ॥ ६२ ॥**

त्रसासंयमहीना असंयमाः सर्वे सप्तत्रिंशत् संयमविहीने।
आहारकयुगोनाः पंचपंचाशत् सर्वे च चक्षुर्युगे ॥

णवजोय णोकसाया अडंतकसाय देसजमे तसऽसंजमहीणऽजमा सव्वे सगतीस—देसजमे—संयमासंयमे सप्तत्रिंशत्प्रत्यया भवन्ति। ते के ? णवजोयेत्यादि। मनोवचनयोरष्टौ औदारिककायस्यैक एवं नव, तथा णोकसाया—हास्यादयो नवनोकषायाः, अडंतकसाय—अष्टौ अन्त्याः प्रत्याख्यानसंज्वलनक्रोधमानमायालोभाः कषायाः, तसऽसंजमहीणऽजमा सव्वे—त्रसवधरहिता अन्येऽसंयमा अविरतयः सर्वे एकादश एकत्रीकृताः सप्तत्रिंशत्। संजमविहीणे आहारजुगूणा पणवण्णं—असंयमे आहारजुगूणा—आहारकयुगोना आहारकाहारकमिश्रद्वयोनाः, पणवण्णं—पंचपंचाशत् प्रत्यया भवन्ति। इति संयममार्गणायां प्रत्ययाः। सव्वे य चक्खुजुगे—च पुनः चक्षुर्युगे चक्षुरचक्षुर्दर्शनद्वये नानाजीवापेक्षया सर्वे सप्तपंचाशत्प्रत्यया भवन्ति ॥ ६२ ॥

**अवहीए अडदालं णाणतिउत्ता हि केवलालोए।**
**सग गयदोआहारय पणवण्णं हुंति किण्हतिए ॥ ६३ ॥**

अवधौ अष्टचत्वारिंशत् ज्ञानत्रिकोक्ता हि केवलालोके।
सप्त गतद्विकाहारकाः पंचपंचाशत् भवन्ति कृष्णत्रिके ॥

अवहीए—अवधिदर्शने, णाणतिउत्ता हि—निश्चितं ज्ञानत्रिके य उक्तास्त एव, अडदालं—इति, अष्टचत्वारिंशत्प्रत्यया भवन्ति। ते के? इति चेदुच्यंते अनन्तानुबन्धिचतुष्कं मिथ्यात्वपंचकं वर्जयित्वा अपरे अष्टाच-त्वारिंशदास्रवाः। केवलालोए सग—केवलदर्शने सप्त। के ते? सत्या-नुभयमनोवचनयोगौदारिकौदारिकमिश्रकार्मणकाययोगा एवं सप्त प्रत्यया भवन्ति। इति दर्शनमार्गणायामास्रवाः। गयदोआहारय किण्हतिए—कृष्णनीलकापोतलेश्यात्रिके आहारकतन्मिश्रद्वयरहिता अन्येऽवशिष्टाः, पणवण्णं—पंचपंचाशत्प्रत्ययाः, इति—भवन्ति ॥ ६३ ॥

**तेजादितिए भव्वे सव्वे णाहारजुम्मया**[1]**ऽभव्वे।**
**पणवण्णं ते मिच्छाअणूण छादाल उवसमए ॥ ६४ ॥**

तेजआदित्रिके भव्ये सर्वे अनाहारकयुग्मका अभव्ये।
पंचपंचाशत् ते मिथ्यात्वानोनाः षट्चत्वारिंशत् उपशमे ॥

तेजादितिए—पीतपद्मशुक्ललेश्यात्रिके तथा भव्यजीवे, सव्वे—सर्वे सप्तपंचाशत्प्रत्यया नानाजीवापेक्षया भवन्ति। णाहारजुम्मयाऽभव्वे पणवण्णं—अभव्यजीवे आहारकतन्मिश्रवर्ज्या अन्ये पंचपंचाशदास्रवाः स्युः। इति लेश्याभव्यमार्गणयोः प्रत्ययाः। ते मिच्छाअणूण छादाल उवसमए—उपशमकसम्यक्त्वे, ते—इति, अभव्योक्ताः पंचपंचाशत्प्रत्यया मिथ्यात्वपंचकानन्तानुबन्धिचतुष्कोना अपरे षट्चत्वारिंशत्प्रत्यया भवन्ति। ते के चेदुच्यते—अविरतयः १२ कषयाः २१ आहारकद्वयं विना योगाः १३ एवं षट्चत्वारिंशत् ॥ ६४ ॥

**आहारयजुवजुत्ता खाइयदुगे य ए वि अडदाला।**
**मिस्से तेदाला ते तिमिस्साहारयदुगूणा ॥ ६५ ॥**

1 'जुम्मये' मूले पाठः।

आहारकयुगयुक्ताः क्षायिकद्विके च तेऽपि अष्टचत्वारिंशत् ।
मिश्रे त्रिचत्वारिंशत् ते त्रिमिश्राहारकद्विकोनाः ॥

खाइयदुगे य—च पुनः क्षायिकयुग्मे क्षायिकवेदकसम्यक्त्वे च आहारयजुवजुत्ता—आहारकद्वयसहिताः, ए वि—इति, तेऽपि उपशमसम्यक्त्वोक्ताः षट्चत्वारिंशत्, अडदाला—अष्टचत्वारिंशत् भवन्ति। ते के ? अविरतयः १२ कषायाः २१ योगाः १५ एवं ४८। मिस्से—मिश्रसम्यक्त्वे, तेदाला—त्रिचत्वारिंशत्प्रत्यया भवन्ति। ते—पूर्वोक्ताः क्षायिकवेदकोक्ता अष्टचत्वारिंशत्तन्तेभ्यः पंच निष्कास्यंते। ते के ? तिमिस्साहारयदुगूणा—त्रिमिश्रा औदारिकमिश्रवैक्रियिकमिश्रकार्मणकाहारकाहारकमिश्रमेवं पंचहीनास्त्रिचत्वारिंशत्। के ते इति चेदुच्यते—अविरतयः १२ कषायाः २१ अष्टौ मनोवचनयोगा औदारिकवैक्रियिककाययोगौ द्वौ एवं ४३ मिश्रसम्यक्त्वे भवन्तीत्यर्थः॥ ६५॥

**विदिए मिच्छपणूणा पण्णं मिच्छे य हुंति पणवण्णं ।**
**आहारयजुयविजुया पच्चेया सयल सण्णीए ॥ ६६॥**

द्वितीये मिथ्यात्वपंचकोनाः पंचाशत् मिथ्यात्वे च भवन्ति ।
पंचपंचाशत् आहरकयुगवियुक्ताः प्रत्ययाः सकलाः संज्ञिनि ॥

विदिए—सासादनसम्यक्त्वे, मिच्छपणूणा—मिथ्यात्वपंचकोना आहारकयुग्मवर्जिता अन्ये, पण्णं—पंचाशत्प्रत्ययाः स्युः। मिच्छे य हुंति पणवण्णं आहारयजुयविजुया—पुनः मिथ्यात्वसम्यक्त्वे आहारकयुगवियुक्ता अन्ये, पणवण्णं—पंचपंचाशत्प्रत्यया भवन्ति। इति सम्यक्त्वमार्गणायां प्रत्ययाः। पच्चया सयल सण्णीए—संज्ञिजीवे प्रत्ययाः सकलाः सर्वे सप्तपंचाशन्नानाजीवापेक्षया भवन्ति॥ ६६॥

**कम्मयओरालियदुगअसच्चमोसूणजोगमणहीणा ।**
**पणदालाऽसण्णीए सयलाहारे अकम्मइया ॥ ६७॥**

कार्मणौदारिकद्विकासत्यमृषोनयोगमनोहीनाः ।

पंचचत्वारिंशदसंज्ञिनि सकला आहारके अकार्मणकाः ॥

असण्णीए—असंज्ञिजीवे, पणदाला—पंचचत्वारिंशत्प्रत्यया भवन्ति। कथंभूताः ? कम्मयेत्यादि—कार्मणकश्च औदारिकद्विकं च असत्यमृषा चेत्यनुभयवचनयोग एतैश्चतुर्भिरूना हीना अन्ये एकादशयोगाश्च मनश्च तैर्हीनाः । अथ बालावबोधनार्थं स्पष्टतयोच्यते—असंज्ञिजीवे मिथ्यात्वपंचकं मनोवर्जिता एकादशाविरतयः कषायाः २५ कार्मणः औदारिकद्वययोगद्वयं, असत्यमृषा सत्यं च मृषा सत्यमृषे न विद्येते सत्यासत्ये यत्र योगे सोऽसत्यमृषो योगोऽनुभयवचनयोग इत्यर्थः एवं ४५ प्रत्यया भवन्ति । इति संज्ञिमार्गणायां प्रत्ययाः। सयलाहारे अकम्मइया—आहारे आहारकजीवे कार्मणकाययोगवर्जिता अन्ये सकलाः सर्वे षट्पंचाशत्प्रत्यया भवन्ति ॥ ६७ ॥

**तेदालाणाहारे कम्मेयरजोयहीणया हुंति ।**

**तित्थप्पहुणा गणिया इति मग्गणपच्चया भणिया ॥ ६८ ॥**

त्रिचत्वारिंशदनाहारके कर्मेतरजोगहीनका भवन्ति ।

तीर्थप्रभुणा गणिता इति मार्गणाप्रत्यया भणिताः ॥

तेदालाणाहारे—अनाहारके जीवे कम्मेयरजोयहीणया—कार्मणकाययोगादितरे ये चतुर्दशयोगास्तैर्हीना अन्ये, तेदाला—त्रिचत्वारिंशत्प्रत्यया भवन्ति । ते के ? मिथ्यात्वं ५ अविरतयः १२ कषायाः २५ कार्मणकाययोग १ एवं त्रिचत्वारिंशत्प्रत्ययाः, हुंति—भवन्ति । तित्थप्पहुणा—अमुना प्रकारेण पूर्वं तीर्थकरप्रभुणा तीर्थकरदेवेन मार्गणासु प्रत्यया इति गणिता इति, पश्चाद्गणधरदेवादिभिः शब्दरूपेण गाथादिबन्धेन मार्गणासु प्रत्यया भणिता इति शेषः ॥ ६८ ॥

इति मार्गणासु प्रत्यया निर्दिष्टाः ।

अथ चतुर्दशजीवसमासेषु यथासंभवं सप्तपंचाशत्प्रत्ययाः कथ्यन्ते;—

**इगिदुतिचउरक्खेसु य सण्णीसु भासिया जे ते ।**
**अडतीसादी सयला, पणदाला कम्ममिस्सूणा ॥ ६९ ॥**
**सत्तसु पुण्णेसु हवे ओरिलिय मिस्सयं अपुण्णेसु ।**
**इगिइगिजोगविहीणा जीवसमासेसु ते णेया ॥ ७० ॥**

एकद्वित्रिचतुरक्षेषु च संज्ञिषु भाषिता ये ते ।
अष्टात्रिंशदादयः सकलाः पंचचत्वारिंशत् कर्ममिश्रोनाः ॥
सप्तसु पूर्णेषु भवेत् औदारिकं मिश्रकं अपूर्णेषु ।
एकैकयोगविहीना जीवसमासेषु ते ज्ञेयाः ॥

गाथाद्वयेन सम्बन्धः । जीवसमासेसु ते णेया—ते प्रत्ययाश्चतुर्दशजीवसमासेषु ज्ञेया ज्ञातव्या भवन्ति इत्याह—इगिदुतिचउरक्खेत्यादि—एकद्वित्रिचतुरिन्द्रियेषु च पुनः सत्यसंज्ञिजीवेषु ये अष्टात्रिंशदादयः सकलाः प्रत्ययाः पूर्वं भाषिताः । ते प्रत्ययाः पंचचत्वारिंशत् कथं भवन्ति ? एकेन्द्रियादिराश्यपेक्षया अष्टात्रिंशत्प्रत्ययाः, द्वीन्द्रियस्य राश्यपेक्षया रसनेन्द्रियानुभयभाषयोरधिकत्वाच्चत्वारिंशत्प्रत्ययाः, त्रीन्द्रियस्य राश्यपेक्षया घ्राणेन्द्रियाधिकत्वादेकचत्वारिंशत्प्रत्ययाः, चतुरिन्द्रियस्य चक्षुरधिकत्वाद्द्वाचत्वारिंशत्प्रत्ययाः, असंज्ञिपंचेन्द्रियस्य स्त्रीवेदपुंवेदश्रोत्राणामधिकत्वाद्राश्यपेक्षया पंचचत्वारिंशत्प्रत्ययाः । कथंभूताः पंचचत्वारिंशत् ? कम्ममिस्सूणा—कार्मणकायौदारिकमिश्रवैक्रियिकमिश्रोनाः । सत्तसु पुण्णेसु हवे ओरालिय—सप्तसु पर्याप्तेषु जीवसमासेषु यथासंभवं पूर्वोक्ताः प्रत्ययाः, ओरालिय—औदारिककाययोगश्च भवेत् । मिस्सयं अपुण्णेसु—इति, अपर्याप्तेषु सप्तसु जीवसमासेषु, मिस्सयं—औदारिकमिश्रः वैक्रियिकमिश्रो वा यथासंभवं भवति । इगिइगिजोगविहीणा—सप्तसु पर्या-

षेषु सप्तसु अपर्याप्तेषु एकैकयोगविहीनाः प्रत्यया भवन्ति । कोऽर्थः ? सप्तसु पर्याप्तेसु यदा औदारिककाययोगो भवति तदा औदारिकमिश्र-योगो न भवति यदा अपर्याप्तेषु सप्तसु औदारिकमिश्रकायो भवति तदा औदारिककाययोगो न भवतीत्यर्थः । अथाल्पबुद्धीनां सम्यक्परिज्ञा-नाय चतुर्दशजीवसमासेषु प्रत्येकं यथासंभवं एतावन्तः प्रत्ययाः संभवन्तीत्याह—एकेन्द्रियसूक्ष्मापर्याप्ते मिथ्यात्वपंचकं षड्जीवनिकायानां विराधना स्पर्शनेन्द्रियस्यैकस्यानिरोध एवं सप्ताविरतयः ७ स्त्रीवे-दपुंवेदद्वयवर्ज्या अन्ये कषायास्त्रयोविंशतिः २३ औदारिकमि-श्रकार्मणकाययोगौ द्वौ २ एवं सप्तत्रिंशत् ३७ प्रत्यया भवन्ति । एकेन्द्रियसूक्ष्मपर्याप्ते मिथ्यात्वं ५ अविरतयः ७ स्त्रीवेदपुंवेद-वर्ज्याः कषायास्त्रयोविंशतिः औदारिककाययोग एक एव एवं षट्त्रिंशत्प्र-त्ययाः स्युः । एकेन्द्रियबादरापर्याप्ते मि० ५ अवि० ५ कषा० २३ औदारिकमिश्रकार्मणयोगौ द्वौ एवं सप्तत्रिंशत्प्रत्यया भवेयुः ३७ । एके-न्द्रियबादरपर्याप्ते पंचमिथ्यात्वं अविरतयः सप्त पूर्वोक्ताः २३ कषाया औदारिककाययोग एक एवं षट्त्रिंशदास्रवाः स्युः । द्वीन्द्रियापर्याप्ते जी-वसमासे मिथ्यात्वं ५ षट्कायानां विराधना स्पर्शरसनयोरनिरोधः इत्य-विरतयोऽष्टौ पूर्ववत्कषायास्त्रयोविंशतिः औदारिकमिश्रकार्मणकाययोगौ द्वौ एवं अष्टात्रिंशत्प्रत्यया भवन्ति । द्वीन्द्रियपर्याप्ते जीवसमासे मि० ५ अवि० ८ कषायाः २३ औदारिककाययोगानुभयभाषायोगौ द्वौ एव-मष्टात्रिंशत्प्रत्ययाः संभवन्ति । त्रीन्द्रियापर्याप्ते जीवसमासे मि० ५ षट्कायविराधना स्पर्शनरसनघ्राणानामनिरोध एवमविरतयो नव पूर्व-वत्कषायाः २३ औदारिकमिश्रकार्मणकाययोगौ द्वौ एकीकृता एकोनच-

१ पंचेन्द्रियसंज्ञिपर्याप्ते वैक्रियिककायः अथवा औदारिककायः यथासंभवम् ।

त्वारिंशत्प्रत्ययाः सन्ति । त्रीन्द्रियपर्याप्ते जीवसमासेऽपि मि० ५ षड्जीवनिका-
यविराधनाः षट्स्पर्शनरसनघ्राणानां विषयानुभवनं तिस्र एवमविरतयो
नव कषाया २३ औदारिककायानुभयवचनयोगौ द्वौ एवमेकोनचत्वा-
रिंशत्प्रत्यया: ३९ स्युः । चतुरिन्द्रियापर्याप्ते जीवसमासे मि० ५ षड्जीव-
निकायविराधना स्पर्शनरसनघ्राणचक्षुषामनिरोध एवमविरतयो १० पूर्व-
वत्कषाया औदारिकमिश्रकार्मणकाययोगौ द्वौ एवं चत्वारिंशत्प्रत्ययाः
सन्ति । चतुरिन्द्रियपर्याप्ते मि० पंच ५ पूर्वोक्ता दशाविरतयः १०
कषाया २३ औदारिककायानुभयभाषायोगौ द्वौ २ एवं चत्वारिंशदा-
स्रवाः प्रवर्तन्ते । पंचेन्द्रियासंज्ञिजीवापर्याप्ते मि० ५ मनोवर्ज्या अन्या
एकादशाविरतयः ११ कषायाः सर्वे २५ औदारिकमिश्रकार्मणकाययोगौ
द्वौ २ एवं त्रिचत्वारिंशदास्रवाः ४३ स्युः । असंज्ञिपंचेन्द्रियपर्याप्ते मि०
५ मनइन्द्रियं विना अन्या एकादशाविरतयः ११ कषायाः २५ औ-
दारिकायानुभयवचनयोगौ द्वौ २ एवं त्रिचत्वारिंशत्प्रत्ययाः ४३ स्युः ।
पंचेन्द्रियसंज्ञिजीवापर्याप्ते मनइन्द्रियं विना एकादशाविरतयः ११ क-
षायाः २५ औदारिकमिश्रवैक्रियिकमिश्रकार्मणकाययोगास्त्रय एकीकृताः
४४ प्रत्यया भवन्ति । पंचेन्द्रियसंज्ञिपर्याप्ते जीवसमासे मि० ५ अ-
विरतयः १२ कषायाः २५ मिश्रकार्मणकाययोगद्वयं विना अन्ये त्रयो-
दशयोगाः १३ एवं पंचपंचाशत्प्रत्यया भवन्ति ॥ ६९—७० ॥

इति चतुर्दशजीवसमासेषु प्रत्येकं यथासंभवं प्रत्ययाः कथिताः
व्यक्तिरूपेण बालबोधनार्थम् ।

---

अथ चतुर्दशगुणस्थानेषु प्रत्ययाः कथ्यन्ते;—

**मिच्छे चउपच्चइओ बंधो सासणदुगे तिपच्चइओ ।**
**ते विरइजुआ अविरइदेसगुणे उवरिमदुगं च ॥ ७१ ॥**

**दोण्णि तदो पंचसु तिसु णायव्वो जोगपच्चई इक्को ।**
**सामण्णपच्चया इदि अट्ठण्हं होंति कम्माणं ॥ ७२ ॥**

मिथ्यात्वे चतुःप्रत्ययो बन्धः सासनद्विके त्रिप्रत्ययः ।
ते विरतियुता अविरतदेशगुणे उपरिमद्विकं च ॥
द्वौ ततः पंचसु त्रिषु ज्ञातव्यो योगप्रत्यय एकः ।
सामान्यप्रत्यया इति अष्टानां भवन्ति कर्मणां ॥

गाथाद्वयेन सम्बन्धः । मिच्छे चउपच्चइओ बंधो—चतुःप्रत्ययजो बन्धः, कोऽर्थः ? मिथ्यात्वगुणस्थाने मिथ्यात्वाविरतिकषाययोगानां चतुर्णां प्रत्ययानां बन्धो भवतीत्यर्थः । सासणदुगे—द्वितीयसासादनगुणस्थाने तृतीयमिश्रगुणस्थाने च, तिपच्चइओ—त्रिप्रत्ययजो बन्धः । कोऽर्थः ? सासादनमिश्रगुणस्थानयोरविरतिकषाययोगानां बन्धः स्यादित्यर्थः । तेऽविरईत्यादि । अविरइदेसगुणे—चतुर्थेऽविरतिगुणस्थाने पंचमे देशविरतिगुणस्थाने च, ते—इति, ते प्रत्यया भवन्ति । कति भवन्तीत्याशंकायामाह—उवरिमदुगं—उपरिमद्वयं कषाययोगयुग्मं । कथंभूतं ? अविरतियुक्तं एवं त्रयः प्रत्यया भवन्ति, कोऽर्थः ? अविरतिदेशविरतिगुणस्थानयोर्द्वयोरविरतिकषाययोगानां त्रयाणां प्रत्ययानां बन्धो भवतीत्यर्थः । दोण्णि तदो पंचसु—इति, ततो देशविरतिगुणस्थानात्, पंचसु—इति, पंचगुणस्थानेषु प्रमत्ताप्रमत्तापूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायाभिधानेषु दोण्णि—द्वौ प्रत्ययौ ज्ञातव्यौ, को भावः ? प्रमत्तादिपंचसु गुणस्थानेषु कषाययोगयोर्द्वयोर्बन्ध इति भावः । ततः, तिसु—इति, त्रिषु गुणस्थानेषु योगप्रत्ययस्यैकस्य बन्ध इत्यर्थः । इदि—इति अमुना प्रकारेण, अट्ठण्हं कम्माणं—ज्ञानावरणादीनामष्टानां कर्मणां, सामण्णपच्चया—सामान्येन मिथ्यात्वादिप्रत्यया बन्धकारणानि भवन्ति ॥ ७१–७२ ॥

पूर्वं सामान्येन प्रत्ययबन्धः कथितः, अधुना विशेषेण प्रत्ययबन्धाः कथ्यन्ते;—

**पढमगुणे पणवण्णं विदिए पण्णं च कम्मणअणूणा ।**
**मिस्सोरालिविउव्वियमिस्सूण तिदालया मिस्से ॥ ७३ ॥**

प्रथमगुणे पंचपंचाशत् द्वितीये पंचाशत् च कार्मणानोनाः ।
मिश्रौदारिकवैक्रियिकमिश्रोनाः त्रिचत्वारिंशन्मिश्रे ॥

पढमगुणे—प्रथममिथ्यात्वगुणस्थाने आहारकतन्मिश्रद्वयवर्ज्या अन्ये पणवण्णं—पंचपंचाशत्प्रत्यया भवन्ति । विदिए पण्णं च—पुनः सासादनगुणस्थाने मिथ्यात्वपंचकाहारकद्वयरहिता अन्ये पंचाशत्प्रत्यया भवन्ति। कम्मणेत्यादि,मिस्से—तृतीयमिश्रगुणस्थाने ये सासादने कथिताः पंचाशत्प्रत्ययाः । ते कथंभूताः ? कर्मणेत्यादि, कार्मणकाययोगानन्तानुबन्धिक्रोधमानमायालोभचतुष्कोना औदारिकमिश्रकायोनो वैक्रियिकमिश्रकायोन एतैः सप्तभिर्हीना अन्ये,तिदाला—त्रिचत्वारिंशत्प्रत्यया भवन्ति ॥७३॥

**हुंति छयालीसं खलु अयदे कम्मइयमिस्सदुगजुत्ता ।**
**विदियकसायतसाजमदुमिस्सवेउव्वियकम्मूणा ॥ ७४ ॥**

भवन्ति षट्चत्वारिंशत् खलु अयते कार्मणमिश्रद्विकयुक्ताः ।
द्वितीयकषायत्रसासंयमद्विमिश्रवैक्रियिककार्मणोनाः ॥

सगतीसं देसे ? खलु-निश्चितं, अयदे—चतुर्थेऽविरतगुणस्थाने मिश्रगुणस्थानोक्तास्त्रिचत्वारिंशत्प्रत्ययाः,कम्मइयमिस्सदुगजुत्ता—इति,कार्मणौदारिकमिश्रवैक्रियिकमिश्रत्रययुक्ताः सन्तः, छयालीसं—षट्चत्वारिंशत्प्रत्यया भवन्ति। सगतीसं देसे—इति,उत्तरगाथायां सम्बन्धः। देसे—इति, पंचमे देशविरतगुणस्थाने सप्तत्रिंशत्प्रत्यया भवन्ति । के ते ? विदियक-

सायत्तसाजमदुमिस्सवेउव्वियकम्मूणा—द्वितीयकषायोऽप्रत्याख्यानक्रोध-मानमायालोभचतुष्कं, तसाजम—इति, त्रसवधः, दुमिस्स—औदारिकमिश्रवैक्रियिकमिश्रद्वयं, वेउव्विय—इति, वैक्रियिककाययोगः, कम्म—इति, कार्मणकाययोग एतैर्नवभिरूनाः । कोऽर्थः ? येऽविरतगुणस्थानोक्ताः षट्चत्वारिंशद्वर्तन्ते ते एतैर्नवभिर्हीनाः सन्तः सप्तत्रिंशदास्रवा भवन्ति—ते सप्तत्रिंशत्प्रत्ययाः पंचमे गुणस्थाने भवन्तीति स्पष्टार्थः ॥ ७४ ॥

**सगतीसं देसे तह चउवीसं पच्चया पमत्ते य ।**
**आहारदुगे यारस अविरदिचउपच्चयाणूणं ॥ ७५ ॥**

सप्तत्रिंशद्देशे तथा चतुर्विंशतिप्रत्ययाः प्रमत्ते च ।
आहारकद्विकौ एकादशाविरतिचतुःप्रत्ययन्यूनाः ॥

सगतीसं देसे इति पदं पूर्वगाथायां व्याख्यातं । तह चउवीसं पच्चया पमत्ते य—च पुनः तथा, पमत्ते—इति, षष्ठे प्रमत्तगुणस्थाने चतुर्विंशतिः प्रत्यया भवन्ति । कथं ? देशविरतगुणस्थानोक्तसप्तत्रिंशत्प्रत्ययमध्ये, आहारदुगे—आहारकाहारकमिश्रद्वयं यदा क्षिप्यते तदा एकोनचत्वारिंशत्प्रत्यया भवन्ति । ते एकोनचत्वारिंशत्प्रत्ययाः, एयारसअविरदिचउपच्चयाणूणं—इति, एकादशाविरतयः चत्वारः प्रत्याख्यानक्रोधमानमायालोभा एतैः पंचदशभिर्न्यूनाश्चतुर्विंशतिप्रत्ययाः स्युः—ते षष्ठगुणस्थाने संभवन्तीत्यर्थः । ते चतुर्विंशतिः किंनामानश्चेदुच्यंते—संज्वलनचतुष्कं हास्यादिनवनोकषाया अष्टौ मनोवचनयोगा औदारिकाहारकाहारकमिश्रयोगास्त्रय एवं चतुर्विंशतिः ॥ ७५ ॥

**आहारदुगूणा दुसु बावीसं हासछक्क संदित्थी—।**
**पुंकोहाइविहीणा कमेण णवमं दसं जाण ॥ ७६ ॥**

आहारकद्विकोना द्विषु द्वाविंशतिः हास्यषट्केन षंढस्त्री—।
पुंस्त्र्यपि विहीनाः क्रमेण नवमे दशमं जानीहि ॥

आहारदुगूणा दुसु बावीसं—दुसु—इति, अप्रमत्तापूर्वकरणयोर्द्वयोर्गुणस्थानयोः प्रमत्तोक्ताश्चतुर्विंशतिप्रत्यया ये ते आहारदुगूण—आहारकाहारकमिश्रद्वयोनाः, बावीसं—द्वाविंशतिप्रत्ययाः स्युः। ते के चेदुच्यते संज्वलनं ४ नोकषायाः ९ मनोवचनयोगाः ८ औदारिकाययोगः १ एवं २२ द्वाविंशतिः। हे शिष्य! नवमं गुणस्थानं जानीहि। हासेलादि हास्यरत्यरतिशोकभयजुगुप्साषट्केन हीनं। कोऽर्थः? नवमेऽनिवृत्तिकरणगुणस्थाने पूर्वोक्ता द्वाविंशतिप्रत्यया हास्यादिषट्कहीनाः सन्तः षोडश आस्रवा भवन्ति। ते किंनामानः? वेदत्रयः ३ संज्वलनचतुष्कं ४ मनोवचनयोगा अष्टौ औदारिककाययोगश्चैक एवं षोडश आस्रवा अनिवृत्तिकरणस्थाने भवन्तीत्यर्थः। हे विनेय! कमेण अनुक्रमेण, दसं जाण—दशमगुणस्थानं विद्धि। हे स्वामिन्! दशमं गुणस्थानं कीदृक्षं वेद्मि तत्र कति प्रत्यया संभवन्तीति शिष्यप्रश्नाद्गुरुराह—दस सुहुमे इत्युत्तरगाथापदेन सम्बन्धः। ते दश के? अनिवृत्तिकरणोक्ताः षोडश, संढित्थीपुंकोहाइविहीणा—इति, पंढस्त्रीपुंवेदत्रयसंज्वलनक्रोधमानमायात्रिकहीनाः सन्तः दश। अथ च व्यक्तिः—सूक्ष्मसाम्परायदशमे अष्टौ मनोवचनयोगा औदारिककाययोगसंज्वलनलोभौ द्वाविति दश ॥७६॥

**दस सुहुमे वि य दुसु णव सत्त सजोगिम्मि पच्चया हुंति।**
**पच्चयहीणमणूणं अजोगिठाणं सया वंदे ॥ ७७ ॥**

दश सूक्ष्मेऽपि च द्वयोः नव सप्त सयोगे प्रत्यया भवन्ति।
प्रत्ययहीनमन्यूनं अयोगिस्थानं सदा वन्दे ॥

दस सुहुमे इति पदस्य व्याख्यानं पूर्वगाथायां कृतं, अवि य—अपि च, दुसु—द्वयोः एकादशे उपशान्तकषाये द्वादशे क्षीणकषायगुण-

स्थाने च, णव—नव प्रत्ययाः संभवन्ति। अष्टौ मनोवचनयोगा औदारिककाययोग एक एवं ९। सत्त सजोगिम्मि पच्चया हुंति—सयोगकेवलिनि सप्त प्रत्ययाः, हुंति—भवन्ति। ते के? सत्यानुभयमनोवचनयोगा औदारिकतन्मिश्रकार्मणकाययोगा एवं सप्त। पच्चयहीणमणूणं अजोगिठाणं सया वंदे—इति, नमस्कुर्वे सदा, किं तत्? कर्मतापन्नं अयोगिकेवलिगुणस्थानं। किं विशेषणाश्रितं? पच्चयहीणं—सप्तपंचाशत्प्रत्ययैर्हीनं रहितं। पुनः किंविशिष्टं? अणूणं—अन्यूनं परिपूर्णं ॥७७॥

इति चतुर्दशगुणस्थानेषु प्रत्ययाः प्रोक्ताः।

---

**पवयणपमाणलक्खणछंदालंकाररहियहियएण।**
**जिणइंदेण पउत्तं इणमागमभत्तिजुत्तेण ॥ ७८ ॥**

प्रवचनप्रमाणलक्षणच्छन्दोऽलङ्काररहितहृदयेन।
जिनचन्द्रेण प्रोक्तं इदं आगमभक्तियुक्तेन ॥

इणं—सिद्धान्तसारशास्त्रं, पउत्तं—प्रोक्तं। केन कर्त्रा? जिणइंदेण जिनचन्द्रनाम्ना[1] सिद्धान्तग्रन्थवेदिना। कथंभूतेन जिनचन्द्रेण? पवयणेत्यादि—प्रवचनप्रमाणलक्षणच्छन्दोऽलङ्काररहितहृदयेन। पुनरपि कथंभूतेन? आगमभत्तिजुत्तेण—जिनसूत्रस्य भक्तिः सेवा तया युक्तेन ॥७८॥

**सिद्धंतसारं वरसुत्तगेहा, सोहंतु साहू मयमोहचत्ता।**
**पूरंतु हीणं जिणणाहभत्ता, विरायचित्ता सिवमग्गजुत्ता ॥७९॥**

सिद्धान्तसारं वरसूत्रगेहाः, शोधयन्तु साधवो मदमोहत्यक्ताः।
पूरयन्तु हीनं जिननाथभक्ताः, विरागचित्ताः शिवमार्गयुक्ताः ॥

कविः कथयति, साहू—इति, भोः साधवः! इमं सिद्धान्तसारं ग्रन्थं, सोहंतु—शुद्धीकुर्वन्तु अपशब्दरहितं कुर्वन्तु। पुनरपि भोः साधवः! पूरंतु

---

१ प्रारंभे हि जिनेन्द्राचार्य इति विस्मृत्य लिखितोऽस्माभिरन्यन्मूलपुस्तकं विलोक्य।—सं०।

हीणं—अस्मिन् ग्रन्थे मया यत्किंचिद्धीनं प्रतिपादितं भवति तद्भवन्तः, पूरंतु—पूरयन्तु पूर्णं कृत्वा प्रतिपादयन्तु। कथंभूताः साधवः? वरसुत्त-गेहा—वराणि च तानि सूत्राणि जिनवचनानि तेषां गेहा मन्दिरप्रायाः। पुनरपि कथंभूताः ? मयमोहचत्ता—मदमोहैस्त्यक्ताः। पुनरपि कथं-भूताः ? जिणणाहभत्ता—जिननाथभक्ताः। पुनरपि कथंभूताः ? विराय-चित्ता—विगतो रागो यस्मात् तत्, विरागं चित्तं मानसं येषां ते विराग-चित्ताः। अन्यं च किंविशेषणांचिताः? सिवमग्गजुत्ता—इति, शिवमार्गो, मोक्षमार्गः सम्यग्दर्शनज्ञानचारित्रलक्षणः तेन युक्ताः शिवमार्गयुक्ताः॥७९॥

इति सिद्धान्तसारभाष्यम् ।*

---

*अस्मादग्रे पाठोऽयं—स्वस्तिश्री शके १६९३ खरनाम संवत्सरे आश्विनमासे शुक्लपक्षे बिदिआयां ( द्वितीयायां ) तिथौ गुरुवासरे श्रीसदलगी श्री-अनन्त-तीर्थंकरचैत्यालये श्रीसुमतिचन्द्रस्वामिनां तच्छिष्यसावंतापंडित श्रीरत्नत्रयज्ञापनार्थं लिखितं।

श्रीयोगीन्द्रचन्द्राचार्यकृत:

# योगसार: ।

णिम्मलझाण परिट्ठिया कम्मकलंक डहेवि ।
अप्पा लद्धउ जेण परु ते परमप्प णवेवि ॥ १ ॥

निर्मलध्याने परिस्थाय, कर्मकलङ्कं दग्ध्वा ।
आत्मा लब्धो येन पर: तं परमात्मानं नत्वा ॥

घाइचउक्कह किउविलउ अणंतचउक्कपदिट्ठु ।
तहिं जिणइंदहं पयणविवि अक्खमि कव्वु सुइट्ठु ॥ २ ॥

घातिचतुष्कस्य कृतविलयोऽनन्तचतुष्टयप्रतिष्ठित: ।
तं जिनेन्द्रं प्रणम्य करोमि काव्यं सुष्टु ॥

संसारह भयभीयाहं मोक्खह लालसियाहं ।
अप्पासंबोहणकयहं दोहा एक्कमणाहं ॥ ३ ॥

संसारस्य भयभीतानां मोक्षस्य लालसितानां ।
आत्मसम्बोधनार्थं दोहकान् एकमनसा ॥

कालु अणाइ अणाइ जीउ भवसायरु जि अणंतु ।
मिच्छादंसणमोहियउ ण वि सुह दुक्ख जि पत्तु ॥ ४ ॥

कालोऽनादि: अनादिर्जीवो भवसागरोऽपि अनन्त: ।
मिथ्यादर्शनमोहित: नापि सुखं दु:खमेव प्राप्त: ॥

जइ वीहउ चउगइगमणु तउ परभाव चएवि ।
अप्पा झायहि णिम्मलउ जिम सिवसुक्ख लहेवि ॥ ५ ॥

---

१ अन्त्यदोहकेन योगचन्द्रेति नामाभाति ।
परमात्मप्रकाशे तु योगीन्द्रेति नामास्ति ।

यदि बिभ्यति चतुर्गतिगमनात् ततः परभावं त्यज ।
आत्मानं ध्याय निर्मलं येन शिवसुखं लभसे ॥

तिपयारो अप्पा मुणहि परु अंतरु बाहिरप्पु ।
पर झायहि अंतरसहिउ बाहिर चयहि णिभंतु ॥ ६ ॥
त्रिप्रकारं आत्मानं मन्यस्व परमन्तो बहिरात्मानम् ।
परं ध्याय अन्तःसहितं बाह्यं त्यज निर्भ्रान्तम् ॥

मिच्छादंसणमोहियउ परु अप्पा ण मुणेइ ।
सो बहिरप्पा जिणभणिउ पुण संसारु भमेइ ॥ ७ ॥
मिथ्यादर्शनमोहितः परमात्मानं न मनुते ।
स बहिरात्मा जिनभणितः पुनः संसारं भ्रमति ॥

जो परियाणइ अप्प परु जो परभाव चएइ ।
सो पंडिउ अप्पा मुणहिं सो संसार मुएइ ॥ ८ ॥
यः परिजानाति आत्मानं परं यः परभावं त्यजति ।
स पंडित आत्मानं मनुते स संसारं मुञ्चति ॥

णिम्मलु णिक्कलु सुद्ध जिणु किण्हु बुद्धु सिव संतु ।
सो परमप्पा जिणभणिउ एहउ जाणि णिभंतु ॥ ९ ॥
निर्मलो निष्कलः शुद्धः जिनः कृष्णः बुद्धः शिवः शान्तः ।
स परमात्मा जिनभणितः यं जानीहि निर्भ्रान्तम् ॥

देहादिउ जे पर कहिया ते अप्पाण मुणेइ ।
सो बहिरप्पा जिणभणिउ पुण संसार भमेइ ॥ १० ॥
देहादयो ये परे कथिताः तान् आत्मानं मनुते ।
स बहिरात्मा जिनभणितः पुनः संसारे भ्रमति ॥

देहादिक जे पर कहिया ते अप्पाण ण होइ ।
इउ जाणेविण जीव तुहुं अप्पा अप्प मुणेइ ॥ ११ ॥

देहादयो ये परे कथिताः ते आत्मा न भवन्ति ।
इति ज्ञात्वा जीव ! त्वं आत्मना आत्मानं मन्यस्व ॥

**अप्पा अप्पउ जइ मुणहि तउ णिव्वाणु लहेहि ।**
**पर अप्पा जउ मुणिहि तुहुं तहु संसार भमेहि ॥ १२ ॥**

आत्मना आत्मानं यदि मन्यसे ततः निर्वाणं लभसे ।
परं आत्मानं यदि मनुषे त्वं तर्हि संसारं भ्रमसि ॥

**इच्छारहिउ तव करहि अप्पा अप्प मुणेहि ।**
**तउ लहु पावइ परमगई पुण संसार ण एहि ॥ १३ ॥**

इच्छारहितस्तपः करोषि आत्मना आत्मानं मनुषे ।
ततो लघु प्राप्नोसि परमगतिं पुनः संसारे नायासि ॥

**परिणामइं बंधु जि कहिउ मोक्ख जि तह जि वीयाण ।**
**इउ जाणेविण जीव तुहुं तह भावहि परियाणि ॥ १४ ॥**

परिणामैर्बन्धोऽपि कथितः मोक्षोऽपि तैरेव विजानीहि ।
इति ज्ञात्वा जीव ! त्वं तान् भावान् परिजानीहि ॥

**अह पुण अप्पा ण वि मुणहिं पुण्ण वि करइ असेसु ।**
**तउ वि ण पावइ सिद्धसुहु पुणु संसार भमेसु ॥ १५ ॥**

अथ पुनरात्मानं न मनुषे पुण्यमपि करोषि अशेषम् ।
तथापि न प्राप्नोषि सिद्धसुखं पुनः संसारे भ्रमसि ॥

**अप्पादंसण इक्क परु अण्णु ण किं पि वियाणि ।**
**मोक्खह कारण जोईया णिच्छइ एहउ जाणि ॥ १६ ॥**

आत्मदर्शनं एकं परं अन्यत् न किंचिदपि विजानीहि ।
मोक्षस्य कारणं योगिन् ! निश्चयेनैतत् जानीहि ॥

---

१ परद्रव्यं. । २ लहु संसार मुएहि—लघु संसारं मुञ्चसि पाठान्तरं ।

मग्गणगुणठाणइ कहिया ववहारेण वि दिट्ठि ।
णिच्छइणइं अप्पा मुणहु जिम पावहु परमेट्ठि ॥ १७ ॥
मार्गणागुणस्थानानि कथितानि व्यवहारनयेन अपि दृष्टिं ।
निश्चयनयेन आत्मानं मन्यस्व येन प्राप्नोषि परमेष्ठिनं ॥

गिहिवावार परट्ठिआ हेयाहेउ मुणंति ।
अणुदिण झायहि देउ जिणु लहु णिव्वाण लहंति ॥ १८ ॥
गृहव्यापारे परिस्थिताः हेयमहेयं मन्यन्ते ।
अनुदिनं ध्यायन्ति देवं जिनं लघु निर्वाणं लभन्ते ॥

जिण सुमिरहु जिण चिंतवहु जिण झायहु सुमणेण ।
सो झाहंतह परमपउ लब्भइ इक्कखणेण ॥ १९ ॥
जिनं स्मर जिनं चिन्तय जिनं ध्यायस्व सुमनसा ।
तं ध्यायमानः परमपदं लभते एकक्षणेन ॥

सुद्धप्पा अरु जिणवरहं भेउ म किमपि वियाणि ।
मोक्खह कारण जोइया णिच्छइ एउ वियाणि ॥ २० ॥
शुद्धात्मनि च जिनवरे भेदं मा किमपि विजानीहि ।
मोक्षस्य कारणं योगिन् ! निश्चयेन एतत् विजानीहि ॥

जो जिणु सो अप्पा मुणहु इह सिद्धंतहु सारु ।
इउ जाणेविण जोयइहु छंडहु मायाचारु ॥ २१ ॥
यो जिनः तं आत्मानं मन्यस्व एष सिद्धान्तस्य सारः ।
इति ज्ञात्वा योगिन् ! त्यज मायाचारम् ॥

जो परमप्पा सो जि हउं जो हउं सो परमप्पु ।
इउ जाणेविणु जोइआ अण्ण म करहु वियप्पु ॥ २२ ॥
यः परमात्मा स एव अहं योऽहं स परमात्मा ।
इति ज्ञात्वा योगिन् ! अन्यन्मा कार्षीः विकल्पम् ॥

सुद्धपएसह पूरियउ लोयायासपमाणु ।
सो अप्पा अणुदिण मुणहु पावहु लहु णिव्वाणु ॥ २३ ॥
शुद्धप्रदेशैः पूरितः लोकाकाशप्रमाणः ।
तं आत्मानं अनुदिनं मन्यस्व प्राप्नोषि लघु निर्वाणं ॥

णिच्छइ लोयपमाण मुणि ववहारइ सुसरीरु ।
एहउ अप्पसहाउ मुणि लहु पावहु भवतीरु ॥ २४ ॥
निश्चयेन लोकप्रमाणं मन्यस्व व्यवहारेण स्वशरीरस्थ ।
इमं आत्मस्वभावं मन्यस्व लघु प्राप्नोषि भवतीरम् ॥

चउरासीलक्खह फिरिउ काल अणाइ अणंतु ।
पर सम्मत्त ण लद्धु जिउ एहउ जाणि णिभंतु ॥ २५ ॥
चतुरशीतिलक्षे भ्रमितः कालमनाद्यनन्तं ।
परं सम्यक्त्वं न लब्धं जीव ! एतज्जानीहि निर्भ्रान्तम् ॥

सुद्धु सचेयण बुद्ध जिणु केवलणाणसहाउ ।
सो अप्पा अणुदिण मुणहु जइ चाहउ सिवलाहु ॥ २६ ॥
शुद्धः सचेतनः बुद्धः जिनः केवलज्ञानस्वभावः ॥
तं आत्मानं अनुदिनं मन्यस्व यदीच्छसि शिवलाभं ॥

जाम ण भावहु जीव तुहुं णिम्मलअप्पसहाउ ।
ताम ण लब्भइ सिवगमणु जहिं भावहु तहिं जाउ ॥२७॥
यावन्न भावयसि जीव ! त्वं निर्मलात्मस्वभावम् ।
तावन्न लभसे शिवगमनं यत्र भाति तत्र याहि ॥

जो तइलोयह झेउ जिणु सो अप्पा णिरु वुत्तु ।
णिच्छयणइ एमइ भणिउ एहउ जाणि णिभंतु ॥ २८ ॥
यस्त्रिलोकस्य ध्येयो जिनः स आत्मा निजः उक्तः ।
निश्चयनयेन एवं भणितः एतज्जानीहि निर्भ्रान्तम् ॥

वयतवसंजममूलगुण मूढह मोक्ख णिवुत्तु ।
जाम ण जाणइ इक्क परु सुद्धउभावपवित्तु ॥ २९ ॥

व्रततपःसंयममूलगुणैः मूढैर्मोक्षो निरुक्तः ।
यावन्न जानाति एकं परं शुद्धस्वभावपवित्रं ॥

जो णिम्मल अप्पा मुणइ वयसंजमुसंजुत्तु ।
तउ लहु पावइ सिद्धसुहु इउ जिणणाहह वुत्तु ॥ ३० ॥

यो निर्मलं आत्मानं मनुते व्रतसंयमसंयुक्तम् ।
स लघु प्राप्नोति सिद्धसुखं इति जिननाथैरुक्तम् ॥

वयतवसंजमुसीलु जिय ए सव्वे अकइत्थु ।
जाम ण जाणइ इक्क परु सुद्धउभावपवित्तु ॥ ३१ ॥

व्रततपःसंयमशीलानि जीव ! एतानि सर्वाणि व्यर्थानि ।
यावन्न जानाति एकं परं शुद्धस्वभावपवित्रम् ॥

पुण्णि पावइ सग्ग जिय पावइ णरयणिवासु ।
बे छंडिवि अप्पा मुणइ तउ लब्भइ सिववासु ॥३२॥

पुण्येन प्राप्नोति स्वर्गं जीवः पापेन नरकनिवासम् ।
द्वयं त्यक्त्वा आत्मानं मनुते तेन लभ्यते शिववासः ॥

वउतउसंजमुसील जिया इय सव्वइ ववहारु ।
मोक्खह कारण एक मुणी जो तइलोयहु सारु ॥ ३३ ॥

व्रततपःसंयमशीलानि जीव ! एतानि सर्वाणि व्यवहारेण ।
मोक्षस्य कारणं एकं मन्यस्व यः त्रिलोकस्य सारः ॥

अप्पा अप्पइ जो मुणइ जो परभाव चएइ ।
सो पावइ सिवपुरगमणु जिणवर एउ भणेइ ॥ ३४ ॥

आत्मना आत्मानं यो मनुते यः परभावं त्यजति ।
स प्राप्नोति शिवपुरगमनं जिनवर एवं भणति ॥

**छहदव्वइ जे जिणकहिआ णव पयत्थ जे तत्त ।**
**ववहारें जिणउत्तिया ते जाणियहि पयत्त ॥ ३५ ॥**

षट्द्रव्याणि यानि जिनकथितानि नव पदार्थाः ये तत्त्वानि ।
व्यवहारेण जिनोक्तानि तानि जानीहि प्रयत्नेन ॥

**सव्व अचेयण जाणि जिय एक्क सचेयण सारु ।**
**जो जाणेविण परममुणी लहु पावइ भवपारु ॥ ३६ ॥**

सर्वान् अचेतनान् जानीहि जीवं एकं सचेतनं सारम् ।
यं ज्ञात्वा परममुनिः लघु प्राप्नोति भवपारम् ॥

**जो णिम्मल अप्पा मुणहि छंडवि सहु ववहारु ।**
**जिणसामी एहउ भणइ लहु पावहु भवपारु ॥ ३७ ॥**

यः निर्मलं आत्मानं मनुते त्यक्त्वा सर्वव्यवहारम् ।
जिनस्वामी एवं भणति लघु प्राप्नोति भवपारम् ॥

सोरठा ।

**जीवाजीवह भेउ जो जाणइ ते जाणियउ ।**
**मोक्खह कारण एउ भणइ जोइ जोइहि भणिउ ॥ ३८ ॥**

जीवाजीवयोर्भेदं यो जानाति तेन ज्ञातं ।
मोक्षस्य कारणं एव भणति योगिन् ! योगिना भणितः ॥[1]

चौपई ।

**कासु समाहि करउ को अंचउ ।**
**छोपुअछोपु करिवि को वंचउ ॥**

---

1 अस्मादग्रे इदमपि दोहकं—

केवलणाणसहाउ सो अप्पा मुणि जीव तुहुं ।
जइ चाहहि सिवलाहु ओइ जोइहिं भणिउ ॥ १ ॥

हल सहु कलहि केण सम्माणउ ।
जहिं जहिं जोवउ तहु अप्पाणउ ॥ ३९ ॥
केन समाधिं करोमि कान् अर्चयामि ।
वैरमवैरं कृत्वा कान् वंचयामि ॥

........................................ ।
यत्र यत्र पश्यामि तत्र आत्मा ॥

दोहा ।

ताम कुतित्थइ परिभमइ धुत्तिम ताम करेइ ।
गुरुहु पसाए जाम ण वि देहहु देव मुणेइ ॥ ४० ॥
तावत्कुतीर्थेषु परिभ्रमति धूर्तत्वं तावत्करोति ।
गुरोः प्रसादः यावन्न देहमेव देवं मनुते ॥

तित्थहि देवलि देउ ण वि इम सुइकेवलि वुत्तु ।
देहादेवलि देउ जिणु एहउ जाणि णिभंतु ॥ ४१ ॥
तीर्थानि देवालयः देवो नापि एवं श्रुतकेवलिनोक्तम् ।
देहदेवालये देवो जिनः एवं जानीहि निर्भ्रान्तम् ॥

देहादेवलि देउ जिणु जणु देवलिहि णिएइ ।
हासउ महु परि होइ इहु सिद्धाभिक्ख भमेइ ॥ ४२ ॥
देहदेवालये देवो जिनः देवालये नास्ति । ?
हास्यं मुखस्योपरि भवतीह सिद्धभिक्षां भ्रमति ॥ ?

मूढा देवलि देउ ण वि ण वि सलि लिप्पइ चित्ति ।
देहादेवलि देउ जिणु सो बुज्झ समचित्ति ॥ ४३ ॥
मूढ ! देवालये देवो नापि नापि शिलायां लेपे चित्रे ।
देहदेवालये देवो जिनः तं बुध्यस्व समचेतसि ॥

तित्थहु देउलि देउ जिणु सव्व वि कोई भणेइ ।
देहादेउलि जो मुणइ सो बुह को वि हवेइ ॥ ४४ ॥
तीर्थे देवालये देवो जिनः सर्वोऽपि कश्चित् भणति ।
देहदेवालये यो मनुते स बुधः कोऽपि भवेत् ॥

जइ जरमरणकरालियउ तउ जिणधम्म करेहि ।
धम्मरसायण पियहि तुहुं जिम अजरामर होहि ॥ ४५ ॥
यदि जरामरणकरालितः तर्हि जिनधर्मं कुरु ।
धर्मरसायनं पिब त्वं येन अजरामरो भव ॥

धम्मु ण पढिया होइ धम्मु ण पोच्छापिच्छयइ ।
धम्मु ण मढियपयेसि धम्मु ण मुच्छालुचियइ ॥ ४६ ॥
धर्मो न पठनेन भवेत् धर्मो न पुस्तकदर्शने ।
धर्मो न मठप्रदेशे धर्मो न कूर्चलुंचने ॥ ४६ ॥

रायरोस बे परिहरइ जो अप्पा णिवसेइ ।
सो धम्मु वि जिणउत्तियउ जो पंचम गइ देइ ॥ ४७ ॥
रागद्वेषौ द्वौ परिहरति य आत्मनि निवसति ।
स धर्मो जिनोक्तः यः पंचमगतिं ददाति ॥

आउ गलइ ण वि मणु गलइ ण वि आसाहु गलेइ ।
मोह फुरइ ण वि अप्पहिउ इम संसार भमेइ ॥ ४८ ॥
आयुर्गलति न मनो गलति नाप्याशा गलति ।
मोहः स्फुरति नापि आत्महितः एवं संसारं भ्रमति ॥

जेहउ मणु विसयहं रमइ तिम जे अप्प मुणेइ ।
जोइउ भणइ रे जोइहु लहु णिव्वाण लहेइ ॥ ४९ ॥
यथा मनो विषयेषु रमते तथा यदि आत्मानं मनुते ।
योगी भणति रे योगिन् ! लघु निर्वाणं लभते ॥

जेहउ जज्जर णरयघरु तेहउ बुज्झि सरीर ।
अप्पा भावहु णिम्मलहु लहु पावइ भवतीर ॥ ५० ॥
यथा जर्जरं नरकगृहं तथा बुध्यस्व शरीरम् ।
आत्मानं भावय निर्मलं लघु प्राप्नोषि भवतीरम् ॥

धंधय पडियो सयलजगि ण वि अप्पाहु मुणंति ।
तिह कारण ए जीव फुडु ण हु णिव्वाण लहंति ॥ ५१ ॥
धांधे पतितं सकलजगत् नापि आत्मानं मनुते ।
तेन कारणेनेमे जीवाः स्फुटं न हि निर्वाणं लभंते ॥

सत्थ पढंतह ते वि जड अप्पा जे ण मुणंति ।
तिह कारण ऐ जीव फुडु ण हु णिव्वाण लहंति ॥ ५२ ॥
शास्त्रं पठन्ति तेऽपि जडाः आत्मानं ये न जानन्ति ।
तेन कारणेनेमे जीवाः स्फुटं न हि निर्वाणं लभन्ते ॥

मणु इंदिहि विच्छोइयइ बुह पुच्छियइ ण जोइ ।
रायह पसर णिवारियइ सहज्ज उपजइ सोइ ॥ ५३ ॥
मनः इन्द्रियैः वि.......................... ।
रागप्रसारं निवारय सहजं उत्पद्यते सः ॥

पुग्गलु अण्णु जि अण्णु जिउ अण्णु वि सहुविवहारु ।
चयहि वि पुग्गल गहहि जिउ लहु पावहु भवपारु ॥५४॥
पुद्गलोऽन्यः अन्यो जीवः अन्यः सर्वव्यवहारः ।
त्यज पुद्गलं ग्रहाण जीवं लघु प्राप्नोषि भवपारम् ॥

जे ण वि मण्णइ जीव फुडु जे ण वि जीव मुणंति ।
ते जिणणाहह उत्तिया णउ संसारु मुयंति ॥ ५५ ॥
ये नापि मन्यन्ते जीवं स्फुटं ये नापि जीवं मन्यन्ते ।
ते जिननाथेन उक्ता न संसारं मुञ्चन्ति ॥

रयण दीउ दिणयर दहिउ दूध घीउ पाहाणु।
सुण्ण रूउ फलियउ अगिणि णव दिट्ठंता जाणु ॥ ५६ ॥

रत्नं दीपः दिनकरः दधि दुग्धं घृतं पाषाणं।
सुवर्णं रौप्यं स्फटिकं अग्निः नव दृष्टान्तान् जानीहि ॥

देहादिक जो पर मुणइ जेहउ सुण्णुआयासु।
सो लहु पावहि बंभु परु केवल करइ पयासु ॥ ५७ ॥

देहादिकं यः परं मनुते यथा शून्याकाशं।
स लघु प्राप्नोति ब्रह्म परं केवलं करोति प्रकाशम् ॥

जेहउ सुद्ध आयासु जिय तेहउ अप्पा उत्तु।
आयासु वि जड जाणि जिय अप्पा चेयणुवंतु ॥ ५८ ॥

यथा शुद्धं आकाशं जीव! तथा आत्मा उक्तः।
आकाशमपि जडं जानीहि जीव! आत्मानं चैतन्यवन्तं ॥

णासग्गि अब्भितरहं जे जोवहि असरीरु।
बाहुडि जम्म ण संभवहि पिवहि ण जणणीखीरु ॥ ५९ ॥

नासाग्रेण अभ्यन्तरे यः पश्यति अशरीरं।
व्याघुट्य जन्म न सम्भवति पिबति न जननीक्षीरम् ॥

असरीरु वि सुसरीरु मुणी इहु सरीर जड जाणि।
मिच्छामोह परिचयहि मुत्ति णियं णिगिभाणि ॥ ६० ॥

अशरीरोऽपि सशरीरो मुनिः इदं शरीरं जडं जानीहि।
मिथ्यामोहं परित्यज..........................

१ शरीरातिक्रमम् सिद्धस्वरूपं। २ व्याघुट्य जन्म धृत्वा जननीक्षीरं न पिबति इत्यर्थः। ३ चैतन्यशरीरवान्। ४ पौद्गलिकम्।

अप्पय अप्पु मुणंतयहं किण्णेहा फलु होइ ।
केवलणाणु विपरिणवइ सासय सुक्खु लहेइ ॥ ६१ ॥

आत्मना आत्मानं मन्वानस्य किमेह फलं भवति ।
केवलज्ञानं विपरिणमति शाश्वतं सुखं लभते ॥

जे परभाव चएवि मुणी अप्पा अप्पु मुणंति ।
केवलणाणसरूव लियइ ते संसारु मुचंति ॥ ६२ ॥

ये परभावं त्यक्त्वा मुनयः आत्मनात्मानं मन्वते ।
केवलज्ञानस्वरूपं लब्ध्वा ते संसारं मुञ्चन्ति ॥

धण्णा ते भयवंत बुह जे परभाव चयंति ।
लोयालोयपयासयरु अप्पा विमल मुणंति ॥ ६३ ॥

धन्यास्ते भाग्यवन्तः बुधा ये परभावं त्यजन्ति ।
लोकालोकप्रकाशकरं आत्मानं विमलं जानन्ति ॥

सागारु वि णागारुहु वि जो अप्पाणि वसेइ ।
सो पावइ लहु सिद्धसुहु जिणवरु एम भणेइ ॥ ६४ ॥

सागारोऽप्यनगारोऽपि य आत्मनि वसति ।
स प्राप्नोति लघु सिद्धसुखं जिनवर एवं भणति ॥

विरला जाणहिं तत्तु बुहु विरला णिसुणहिं तत्तु ।
विरला झायहिं तत्तु जिय विरला धारहिं तत्तु ॥ ६५ ॥

विरला जानन्ति तत्वं बुधाः विरलाः शृण्वन्ति तत्वम् ।
विरला ध्यायन्ति तत्वं जीव ! विरला धारयन्ति तत्वम् ॥

इहु परियण ण हु महतणउ इहु सुहुदुक्खहं हेउ ।
इम चिंतंतह किं करइ लहु संसारहं छेउ ॥ ६६ ॥

अयं परिजनः न महान् पुनः अयं सुखदुःखस्य हेतुः ।
एवं चिन्तयन् किं करोति लघु संसारस्य छेदम् ॥

**इंदफणिंदणरिंदय वि जीवह सरण ण हुंति ।**
**असरणु जाणिवि मुणिधवला अप्पा अप्प मुणंति ॥ ६७ ॥**

इन्द्रफणीन्द्रनरेन्द्रा अपि जीवस्य शरणं न भवन्ति ॥
अशरणं ज्ञात्वा मुनिधवला आत्मनात्मानं मन्यते ॥

**इक उपजइ मरइकुवि दुहु सुहु भुंजइ इक्कु ।**
**णरयह जाइवि इक जिय तह णिव्वाणह इक्कु ॥ ६८ ॥**

एक उत्पद्यते म्रियते एकः दुःखं सुखं भुंक्ते एकः ।
नरकं याति एकः जीव । तथा निर्वाणं एकः ॥

**इकलउ जइ जाइसहि तो परभाव चएहि ।**
**अप्पा झायहि णाणमउ लहु सिवसुक्ख लहेहि ॥ ६९ ॥**

एकः यदि जायसे तर्हि परभावं त्यज ।
आत्मनं ध्यायस्व ज्ञानमयं लघु शिवसुखं लभस्व ॥

**जो पाउ वि सो पाउ मुणि सव्वु वि को वि मुणेइ ।**
**जो पुण्ण वि पाउ विभणइ सो बुह को वि हवेइ ॥ ७० ॥**

यः पापमपि तत्पापं मनुते सर्वः कोऽपि मनुते ।
यः पुण्यमपि पापं भणति स बुधः कोऽपि भवेत् ॥

**जह लोयम्मिय णियडहा तह सुणम्मिय जाणि ।**
**जे सुह असुह परिच्चयहि ते वि हवंति हु णाणि ॥ ७१ ॥**

यथा लोहमयं निगलं तथा सुवर्णमयं जानीहि ।
ये शुभं अशुभं परित्यजन्ति ते भवन्ति हि ज्ञानिनः ॥

---

१ करोति इति सम्बन्धः ।

जइया मणुणिग्गंथ जिय तइया तुह णिग्गंथु ।
जइया तुहु णिग्गंथ जिय तो लब्भइ सिवपंथु ॥ ७२ ॥

यावत् मनोनिर्ग्रन्थः जीव! तावत्त्वं निर्ग्रन्थः ।
यावत्त्वं निर्ग्रन्थः जीव ! ततः लभसे शिवपथं ॥

जं वडमज्झहं बीज फुडु बीयहं वड वि हु जाणु ।
तं देहहं देउ वि मुणहि जो तइलोय पहाणु ॥ ७३ ॥

यथा वटमध्ये बीजं स्फुटं बीजे वटमपि जानीहि ।
तथा देहे देवं मन्यस्व यः त्रिलोके प्रधानः ॥

जो जिण सो हउ सो जि हउ एहउ भाउ णिभंतु ।
मोक्खहं कारण जोइया अण्णु ण तंतु ण मंतु ॥ ७४ ॥

यो जिनः सोऽहं सोऽप्यहं एतत् भावय निभ्रान्तिम् ।
मोक्षस्य कारणं योगिन्! अन्यो न तंत्रः न मंत्रः ॥

बेतेचउपंचविणवहंसत्तहछहपंचाह—।
चउगुणसहियउ जो मुणहि एहउ लक्खण जाह ॥ ७५ ॥

द्वित्रिचतुःपंचद्विनवसप्तषट्पंच——
चतुर्गुणसहितं यः मनुते एतल्लक्षणं यस्मिन् ॥

बे छंडवि बेगुणसहिउ जो अप्पाणि वसेइ ।
जिणसामिउ एवं भणइ लहु णिव्वाण लहेइ ॥ ७६ ॥

द्वौ त्यक्त्वा द्विगुणसहितः य आत्मनि वसति ।
जिनस्वामी एवं भणति लघु निर्वाणं लभते ॥

तिहरहिउ तिहगुणसहिउ जो अप्पाणि वसेइ ।
सो सासयसुहभायणु वि जिणवर एम भणेइ ॥ ७७ ॥

त्रिरहितः त्रिगुणसहितः य आत्मनि वसति ।
स शाश्वतसुखभाजनं अपि जिनवरः एवं भणति ॥

**चउकसायसण्णारहिउ चउगुणसहिउ वुत्तु ।**
**सो अप्पा मुणि जीव तुहुं जिम परु होहि पवित्तु ॥ ७८ ॥**

चतुःकषायसंज्ञारहितः चतुर्गुणसहितः उक्तः ।
तं आत्मानं मनुष्व जीव ! त्वं येन परः भवसि पवित्रः ॥

**बेपंचविरहियउ मुणहि बेपंचहसंजुत्त ।**
**बेपंचहं जो गुण सहियो सो अप्पा णिरु उत्त ॥ ७९ ॥**

द्विपचंरहितं जानीहि द्विपंचसंयुक्तं ।
द्विपंचभिः यो गुणैः सहितः स आत्मा निज उक्तः ॥

**अप्पा दंसणु णाण मुणी अप्पा चरणु वियाणि ।**
**अप्पा संजम सील तउ अप्पा पच्चक्खाणि ॥ ८० ॥**

आत्मानं दर्शनं ज्ञानं मन्यस्व, आत्मानं चरणं जानीहि ।
आत्मा संयमः शीलं तपः आत्मा प्रत्याख्यानम् ॥

**जो परिआणइ अप्प परु सो परिचयहि णिभंतु ।**
**सो सण्णास(ण) मुणेहि तुहुं केवलणाणिं वुत्तु ॥ ८१ ॥**

यः परिजानाति आत्मानं परं स परित्यजति निर्भ्रांतं ।
तत्संज्ञानं मनुस्व त्वं केवलज्ञानिना उक्तम् ॥

**दंसण जहिं पिच्छयइ बुह अप्पा विमल मुणंतु ।**
**पुण पुण अप्पा भावियइं सो चारित्त पवित्तु ॥ ८२ ॥**

दर्शनं येन पश्यति बोधः आत्मानं विमलं मनुते ।
पुनः पुनः आत्मानं भावयति तत् चारित्रं पवित्रम् ॥

---

१ परद्रव्यं । २ ऐहु णिभंतु इत्यपि पाठः । ३ झाइयइ इत्यपि पाठः ।

रयणत्तयसंजुत्त जिउ उत्तमतित्थ पवित्तु ।
मोक्खह कारण जोईया अण्णु ण तंतु ण मंतु ॥ ८३ ॥

रत्नत्रयसंयुक्तो जीवः उत्तमतीर्थं पवित्रम् ।
मोक्षस्य कारणं योगिन् ! अन्यो न तंत्रः न मत्रः ॥

जहिँ अप्पा तहिँ सयलगुण केवलि एम भणंति ।
तिहिँ कारण ए जीव फुडु अप्पा विमल मुणंति ॥ ८४ ॥

यत्र आत्मा तत्र सकलगुणाः केवलिन एवं भणंति ।
तेन कारणेन इमे जीवाः स्फुटं आत्मानं विमलं जानन्ति ॥

इक्कलउ इंदियरहिउ मणवयकायतिसुद्धि ।
अप्पा अप्प मुणेइ तुहुं लहु पावहु सिवसिद्धि ॥ ८५ ॥

एकाकी इंद्रियरहितः मनोवाक्कायत्रिशुद्धः ।
आत्मना आत्मानं मनुस्व त्वं लघु प्राप्नोसि शिवसिद्धिम् ॥

जइ बंधउ मुक्कउ मुणहि तो बंधियहि णिभंतु ।
सहजसरूवि जइ रमइ तो पावइ सिव संतु ॥ ८६ ॥

यदि बद्धं मुक्तं मन्यसे तर्हि बध्नासि निर्भ्रान्तम् ।
सहजस्वरूपे यदि रमसे तर्हि प्राप्नोसि शिवं शान्तम् ॥

सम्माइट्ठीजीवडह दुग्गइगमणु ण होइ ।
जइ जाइ वि तो दोस ण वि पुव्वकिउ खवणेइ ॥ ८७ ॥

सम्यग्दृष्टिजीवस्य दुर्गतिगमनं न भवति ।
यदि यात्यपि तर्हि दोषो नापि पूर्वकृत्यं क्षपयति ॥

अप्पसरूवह जो रमइ छंडवि सहुववहारु ।
सो सम्माइट्ठी हवइ लहु पावइ भवपारु ॥ ८८ ॥

आत्मस्वरूपे यो रमते त्यक्त्वा सर्वव्यवहारम्।
स सम्यग्दृष्टिः भवति लघु प्राप्नोति भवपारम्॥

**अजरु अमरु गुणगणणिलउ जहिं अप्पा थिरु थाइ।**
**सो कम्महि ण वि बंधयउ संचियपुव्व विलाइ॥ ८९॥**

अजरोमरो गुणगणनिलयः यत्र आत्मा स्थिरः तिष्ठति।
स कर्माणि नैव बध्नाति संचितपूर्वाणि विलीयन्ते॥

**जो सम्मत्तपहाणु बुहु सो तयलोय पहाणु।**
**केवलणाण वि सह लहई सासयसुक्खणिहाणु॥ ९०॥**

यः सम्यक्त्वप्रधानः बुधः स त्रैलोक्ये प्रधानः।
केवलज्ञानमपि स लभते, शाश्वतसुखनिधानं॥

**जह सलिलेण ण लिप्पियइ कमलणिपत्त कया वि।**
**तह कम्मेण ण लिप्पियइ जइ रइ अप्पसहावि॥ ९१॥**

यथा सलिलेन न लिप्यते कमलिनीपत्रं कदापि।
तथा कर्मणा न लिप्यते यदि रमते आत्मस्वभावे॥

**जो समसुक्खणिलीण बुहु पुण पुण अप्प मुणेइ।**
**कम्मक्खउ करि सो वि फुडु लहु णिव्वाण लहेइ॥ ९२॥**

यः समसुखनिलीनः बुधः पुनः पुनः आत्मानं मनुते।
कर्मक्षयं कृत्वा सोऽपि स्फुटं लघु निर्वाणं लभते॥

**पुरुसायारपमाणु जिय अप्पा एहु पवित्तु।**
**जोइज्जइ गुणणिम्मलउ णिम्मलतेय फुरंतु॥ ९३॥**

पुरुषाकारप्रमाणं जीव आत्मानं इमं पवित्रं।
पश्यति गुणनिर्मलं निर्मलतेजसा स्फुरन्तं॥

जो अप्पा सुद्ध वि मुणइ असुइसरीरविभिण्णु ।
सो जाणइ सच्छइ सयलु सासयसुक्खहलीणु ॥ ९४ ॥

य आत्मानं शुद्धं अपि मनुते अशुचिशरीरविभिन्नं ।
स जानाति शास्त्रं सकलं शाश्वतसुखलीनः ॥

जो ण वि जाणइ अप्प परु ण वि परभाव चएवि ।
सो जाणउ सच्छइ सयलु ण हु सिवसुक्ख लहेवि ॥ ९५ ॥

यः नापि जानाति आत्मानं परं नापि परभावं त्यजति ।
स जानन् शास्त्राणि सकलानि न हि शिवसुखं लभते ॥

वज्जिय सयलवियप्पयहं परमसमाहि लहंति ।
जं वेददि साणंद फुडु सो सिवसुक्ख भणंति ॥ ९६ ॥

वर्जितं सकलविकल्पैः परमसमाधिं लभन्ते ।
यत् विदन्ति सानन्दं स्फुटं तत् शिवसुखं भणन्ति ॥

जो पिंडत्थु पयत्थु बुह रूवत्थु वि जिणउत्तु ।
रूवातीत मुणेहु लहु जिम परु होहि पवित्तु ॥ ९७ ॥

यः पिंडस्थं पदस्थं बुधः रूपस्थमपि जिनोक्तम् ।
रूपातीतं मन्यते लघु येन परः भवति पवित्रः ॥

सव्वे जीवा णाणमया जो समभाव मुणेइ ।
सो सामाइउ जाणि फुडु जिणवर एम भणेइ ॥ ९८ ॥

सर्वे जीवा ज्ञानमया यः समभावं मनुते ।
तत् सामायिकं जानीहि स्फुटं जिनवर एवं भणति ॥

रायरोस वे परिहरवि जो समभाव मुणेइ ।
सो सामाइय जाणि फुडु केवलि एम भणेइ ॥ ९९ ॥

रागद्वेषौ द्वौ परिहृत्य यः समभावं मनुते ।
तत्सामायिकं जानीहि स्फुटं केवली एवं भणति ॥

**हिंसादिउ परिहार करि जो अप्पाहु ठवेइ ।**
**सो बीअउ चारित्त मुणि जो पंचमगइ णेइ ॥ १०० ॥**

हिंसादीनां परिहारं कृत्वा यः आत्मानं स्थापयति ।
तं द्वितीयं चारित्रं मनुस्व यत्पंचमगतिं नयति ॥

**मिच्छादिउ जो परिहरणु सम्मदंसणसुद्धि ।**
**सो परिहारविसुद्ध मुणि लहु पावहि सिवसुद्धि ॥ १०१ ॥**

मिथ्यात्वादिकं यः परित्यज्य सम्यग्दर्शनशुद्धिम् ।
तत्परिहारविशुद्धं मनुस्व लघु प्राप्नोसि शिवशुद्धिम् ॥

**सुहमहु लोहहु जो विलउ सुहमु हवे परिणामु ।**
**सो सुहमहचारित्त मुणि सो सासयसुहधामु ॥ १०२ ॥**

सूक्ष्मस्य लोभस्य यः विलयः सूक्ष्मः भवेत्परिणामः ।
तत्सूक्ष्मचारित्रं मनुस्व तत् शाश्वतसुखधाम ॥

**अरिहंतु वि सो सिद्ध फुडु सो आयरिउ वियाणि ।**
**सो उज्झावो सो जि मुणि णिच्छय अप्पा जाणि ॥ १०३ ॥**

अर्हन्तमपि तं सिद्धं स्फुटं तं आचार्यं जानीहि ।
तं उपाध्यायं तमेव मुनिं निश्चयेन आत्मानं जानीहि ॥

**सो सिव संकर विण्हु सो सो रुद्द वि सो बुद्धु ।**
**सो जिण ईसर बंभु सो सो अणंत फुडु सिद्धु ॥ १०४ ॥**

स शिवः शंकरः विष्णुः स स रुद्रः अपि स बुद्धः
स जिनः ईश्वरः ब्रह्मा स अनंतः स्फुटं सिद्धः ॥

---

१ छेदोपस्थापनसंज्ञकं । २ धारयतीति शेषः ।

**एहियलक्खणलक्खियउ जो परु णिक्कल देउ।**
**देहह मज्झह सो वसइ तासु ण वीजइभेउ ॥ १०५ ॥**

एतल्लक्षणलक्षितः यः परः निष्कलो देवः।
देहस्य मध्ये स वसति तस्मिन् नान्यभेदः ॥

**जे सिद्धा जे सिज्झसिहि जे सिज्झहि जिण उत्तु।**
**अप्पादंसण ते वि फुडु एहउ जाणि णिभंतु ॥ १०६ ॥**

ये सिद्धा ये सेत्स्यन्ति ये सिध्यन्ति जिनोक्ते।
आत्मदर्शनेन तेऽपि स्फुटं एतत् जानीहि निर्भ्रान्तम् ॥

**संसारह भयभीयएहं जोगिचंदमुणिएणं।**
**अप्पासंबोहण कयहं दोहा एक्कमणेणं ॥ १०७ ॥**

संसारस्य भयभीतानां योगिचंद्रमुनिना।
आत्मसंबोधनाय कृतानि दोहकानि एकमनसा ॥

इति श्रीयोगिचंद्रकृतो योगसारः संपूर्णोभूत्।

**समाप्तोयं योगसारः।**

# कल्लाणालोयणा ।

परमप्पय वड्ढमई परमेट्ठीणं करोमि णवकारं ।
सगपरसिद्धिणिमित्तं कल्लाणालोयणा वोच्छे ॥ १ ॥

परमात्मानं वर्द्धितमतिं परमेष्ठिनं करोमि नमस्कारम् ।
स्वकपरसिद्धिनिमित्तं कल्याणालोचनां वक्ष्ये ॥

रे जीवाणंतभवे संसारे संसरंत बहुवारं ।
पत्तो ण बोहिलाहो मिच्छत्तवियंभपयडीहिं ॥ २ ॥

रे जीव ! अनन्तभवे संसारे संसरता बहुवारम् ।
प्राप्तो न बोधिलाभो मिथ्यात्वविजृंभितप्रकृतिभिः ॥

संसारभमणगमणं कुणंत आराहिऊ ण जिणधम्मो ।
तेणेविण वर दुक्खं पत्तोसि अणंतवाराइं ॥ ३ ॥

संसारभ्रमणगमनं कुर्वन् आराधितो न जिनधर्मः ।
तेन विना वरं दुक्खं प्राप्तोऽसि अनन्तवारम् ॥

संसारे णिवसंता अणंतमरणाइं पाविओसि तुमं ।
केवलि विणा ण(य) तेसिं संखापज्जत्ति णो हवइ ॥ ४ ॥

संसारे निवसन् अनन्तमरणानि प्राप्तोऽसि त्वं ।
केवलिना विना तेषां संख्यापर्याप्तिर्न भवति ॥

तिण्णि सया छत्तीसा छावट्ठिसहस्सवारमरणाइं ।
अंतोमुहुत्तमज्झे पत्तोसि णिगोयमज्झम्मि ॥ ५ ॥

त्रीणि शतानि षट्त्रिंशानि षट्षष्ठिसहस्रवारमरणानि ।
अन्तर्मुहूर्तमध्ये प्राप्तोऽसि निगोदमध्ये ॥

वियलिंदिए असीदी सट्ठी चालीसमेव जाणेहि ।
पंचेंदिय चउवीसं खुद्दभवंतोमुहुत्तस्स ॥ ६ ॥

विकलेन्द्रियेऽशीतिं षष्टिं चत्वारिंशदेव जानीहि ।
पंचेन्द्रिये चतुर्विंशतिं क्षुद्रभवान् अन्तर्मुहूर्ते ॥

अण्णोण्णं खज्जंता जीवा पावंति दारुणं दुक्खं ।
ण हु तेसिं पज्जत्ती कह पावइ धम्ममइसुण्णो ॥ ७ ॥

अन्योऽन्यं क्षुभ्यन्तो जीवा प्राप्नुवन्ति दारुणं दुःखम् ।
न खलु तेषां पर्याप्तीः कथं प्राप्नोति धर्ममतिशून्यः ॥

माया पियर कुडंबो सुयणजणो को वि णावइ सत्थे ।
एगागी भमइ सया ण हि बीओ अत्थि संसारे ॥ ८ ॥

माता पिता कुटुम्बः स्वजनजनः कोऽपि नायाति सह ।
एकाकी भ्रमति सदा न हि द्वितीयोऽस्ति संसारे ॥

आउक्खए वि पत्ते ण समत्थो को वि आउदाणे य ।
देविंदो ण णरिंदो मणिओसहमंतजालाइं ॥ ९ ॥

आयुःक्षयेऽपि प्राप्ते न समर्थः कोऽपि आयुर्दाने च ।
देवेन्द्रो न नरेन्द्रः मण्यौषधमंत्रजालानि ॥

संमडि जिणवरधम्मो लद्धोसि तुमं विसुद्धजोएण ।
खामसु जीवा सव्वे पत्ते समए पयत्तेण ॥ १० ॥

सम्प्रति जिनवरधर्मः लब्धोऽसि त्वं विशुद्धयोगेन ।
क्षमस्व जीवान् सर्वान् प्रत्येकं समये प्रयत्नेन ॥

तिण्णि सया तेसट्ठी मिच्छत्ता दंसणस्स पडिवक्खा ।
अण्णाणें सद्दहिया मिच्छा मे दुक्कडं हुज्ज ॥ ११ ॥

त्रीणि शतानि त्रिषष्टि मिथ्यात्वानि दर्शनस्य प्रतिपक्षाणि ।
अज्ञानेन श्रद्धितानि मिथ्या मे दुष्कृतं भवतु ॥

**महुमज्जमंसजूवापभिदी वसणाइं सत्तभेयाइं ।**
**णियम ण कयं च तेसिं मिच्छा मे दुक्कडं हुज्ज ॥ १२ ॥**

मधुमद्यमांसद्यूतप्रभृतीनि व्यसनानि सप्तभेदानि ।
नियमो न कृतः च तेषां मिथ्या मे दुष्कृतं भवतु ॥

**अणुवयमहव्वया जे जमणियमाशील साहुगुरुदिण्णा ।**
**जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ १३ ॥**

अणुव्रतमहाव्रतानि यानि यमनियमशीलानि साधुगुरुदत्तानि ।
यानि यानि विराधितानि खलु मिथ्या मे दुष्कृतं भवतु ॥

**णिच्चिदरधादुसत्तय तरुदह वियलिंदिएसु छच्चेव ।**
**सुरणरयतिरिय चदुरो चउदस मणुए सदसहस्सा ॥ १४ ॥**

नित्येतरधातुसप्त, तरुदश, विकलेन्द्रियेषु षट् चैव ।
सुरनारकतिर्यक्षु चत्वारः चतुर्दश मनुष्ये शतसहस्राणि ॥

**एदे सव्वे जीवा चउरासीलक्खजोणिवसि पत्ता ।**
**जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ १५ ॥**

एते सर्वे जीवाश्चतुरशीतिलक्षयोनिवशे प्राप्ताः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

**पुढवीजलग्गिवाओतेओवणस्सई य वियलतया ।**
**जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ १६ ॥**

पृथ्वीजलाग्निवायुतेजोवनस्पतयश्च विकलत्रयाः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

**मलसत्तरा जिणुत्ता वयाविसए जा विराहणा विविहा ।**
**सामइखमइया खलु मिच्छा मे दुक्कडं हुज्ज ॥ १७ ॥**

मलसप्ततिर्जिनोक्ता व्रतविषये या विराधना विविधा ।
सामायिकक्षमादिका मिथ्या मे दुष्कृतं भवतु ॥

**फलफुल्लछल्लिवल्ली अणगलण्हाणं च धोवणाईहिं ।**
**जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ १८ ॥**

फलपुष्पत्वग्वल्ली अगालितस्नानं च प्रक्षालनादिभिः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

**णो सीलं णेव खमा विणओ तवो ण संजमोवासा ।**
**ण कया ण भाविथकया मिच्छा मे दुक्कडं हुज्ज ॥ १९ ॥**

न शीलं नैव क्षमा विनयस्तपो न संयमोपवासाः ।
न कृता न भावनीकृता मिथ्या मे दुष्कृतं भवतु ॥

**कंदफलमूलबीया सचित्तरयणीयभोयणाहारा ।**
**अण्णाणे जे वि कया मिच्छा मे दुक्कडं हुज्ज ॥ २० ॥**

कन्दफलमूलबीजानि सचित्तरजनीभोजनाहाराः ।
अज्ञानेन येऽपि कृता मिथ्या मे दुष्कृतं भवतु ॥

**णो पूया जिणचलणे ण पत्तदाणं ण चेइयागमणं ।**
**ण कया ण भाविय मइ मिच्छा मे दुक्कडं हुज्ज ॥ २१ ॥**

नो पूजा जिनचरणे न पात्रदानं न चैत्यागमनम् ।
न कृता न भाविता मया मिथ्या मे दुष्कृतं भवतु ॥

**संभारंभपरिग्गहसावज्जा बहु पमाददोसेण ।**
**जीवा विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २२ ॥**

महारंभपरिग्रहसावद्यानि बहूनि प्रमाददोषेण ।
जीवा विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

सत्तरिसउखित्तभवाऽतीदाणागयसुवट्टमाणजिणा ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २३ ॥
सप्ततिशतक्षेत्रभवा ? अतीतानागतवर्तमानजिनाः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

अरुहासिद्धाइरिया उवज्झाया साहु पंचपरमेट्ठी ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २४ ॥
अर्हत्सिद्धाचार्या उपाध्याया साधवः पंचपरमेष्ठिनः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

जिणवयण धम्म चेइय जिणपडिमा किट्टिमा अकिट्टिमया ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २५ ॥
जिनवचनं धर्मः चैत्यं जिनप्रतिमा कृत्रिमा अकृत्रिमाः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

दंसणणाणचरित्ते दोसा अट्टट्टपंचभेयाइं ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २६ ॥
दर्शनज्ञानचारित्रे दोषा अष्टाष्टपंचभेदाः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

मइ सुइ ओही मणपज्जयं तहा केवलं च पंचमयं ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २७ ॥
मतिः श्रुतं अवधिः मनःपर्ययः तथा केवलं च पंचमकम् ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

आयारादी अंगा पुव्वपइण्णा जिणेहि पण्णत्ता ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २८ ॥
आचारादीन्यङ्गानि पूर्वप्रकीर्णकानि जिनैः प्रणीतानि ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

पंचमहव्वयजुत्ता अट्ठारससहस्ससीलकयसोहा ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ २९ ॥
पंचमहाव्रतयुक्ता अष्टादशसहस्रशीलकृतशोभाः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

लोए पियरसमाणा रिद्धिपवण्णा महागणवइया ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ ३० ॥
लोके पितृसमाना ऋद्धिप्रपन्ना महागणपतयः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

णिग्गंथ अज्जियाओ सड्ढा सड्ढी य चउविहो संघो ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ ३१ ॥
निर्ग्रन्था आर्यिकाः श्रावकाः श्राविकाः च चतुर्विधो संघः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

देवासुरा मणुस्सा णेरइया तिरियजोणिगयजीवा ।
जे जे विराहिया खलु मिच्छा मे दुक्कडं हुज्ज ॥ ३२ ॥
देवा असुरा मनुष्या नारकाः तिर्यग्योनिगतजीवाः ।
ये ये विराधिताः खलु मिथ्या मे दुष्कृतं भवतु ॥

कोहो माणो माया लोहो एत्थम्म रायदोसाइं ।
अण्णाणें जे वि कया मिच्छा मे दुक्कडं हुज्ज ॥ ३३ ॥

क्रोधो मानं माया लोभः एते रागदोषाः ।
अज्ञानेन येऽपि कृता मिथ्या मे दुष्कृतं भवतु ॥

**परवत्थं परमहिला पमादजोएण अज्जियं पावं ।**
**अण्णावि अकरणीया मिच्छा मे दुक्कडं हुज्ज ॥ ३४ ॥**

परवस्तु परमहिला प्रमादयोगेनार्जितं पापम् ।
अन्येऽपि अकरणीया मिथ्या मे दुष्कृतं भवतु ॥

**इक्को सहावसिद्धो सोहं अप्पा वियप्पपरिमुक्को ।**
**अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥ ३५ ॥**

एकः स्वभावसिद्धः स आत्मा विकल्पपरिमुक्तः ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

**अरस अरूव अगंधो अव्वाबाहो अणंतणाणमओ ।**
**अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥ ३६ ॥**

अरसः अरूपः अगन्धः अव्याबाधः अनन्तज्ञानमयः ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

**णेयपमाणं णाणं समए इक्केण हुंति ससहावे ।**
**अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥ ३७ ॥**

ज्ञेयप्रमाणं ज्ञानं समयेन एकेन भवति स्वस्वभावे ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

**एयाणेयवियप्पप्पसाहणे सयसहावसुद्धगई ।**
**अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥ ३८ ॥**

एकानेकविकल्पप्रसाधने स्वकस्वभावशुद्धगतिः ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

देहपमाणो णिच्चो लोयपमाणो वि धम्मदो होदि ।
अण्णो ण मज्झ सरणं सरणं सो एक परमप्पा ॥ ३९ ॥

देहप्रमाणः नित्यः लोकप्रमाणः अपि धर्मतो भवति ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

केवलदंसणणाणं समए इक्केण दुण्णि उवउग्गा ।
अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥ ४० ॥

केवलदर्शनज्ञाने समयेनैकेन द्वौ उपयोगौ ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

सगरूवसहजसिद्धो विहावगुणमुक्ककम्मवावारो ।
अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥ ४१ ॥

स्वकरूपसहजसिद्धो विभावगुणमुक्तकर्मव्यापारः ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

सुण्णो णेय असुण्णो णोकम्मोकम्मवज्जिओ णाणं ।
अण्णो ण मज्झ सरणं सरणं सो एक परमप्पा ॥ ४२ ॥

शून्यो नैवाशून्यो ? नोकर्मकर्मवर्जितं ज्ञानम् ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

णाणाउ जो ण भिण्णो वियप्पभिण्णो सहावसुक्खमओ ।
अण्णो ण मज्झ सरणं सरणं सो एक परमप्पा ॥ ४३ ॥

ज्ञानतो यो न भिन्नः विकल्पभिन्नः स्वभावसुखमयः ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

अच्छिण्णोवच्छिण्णो पमेयरूवत्त गुरुलहू चेव ।
अण्णो ण मज्झ सरणं सरणं सो एक परमप्पा ॥४४॥

अच्छिन्नोऽवच्छिन्नः प्रमेयरूपत्वं अगुरुलघुत्वं चैव ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

**सुहअसुहभावविगओ सुद्धसहावेण तम्मयं पत्तो ।**
**अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥४५॥**

शुभाशुभभावविगतः शुद्धस्वभावेन तन्मयं प्राप्तः ।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

**णो इत्थी ण णउंसो णो पुंसो णेव [illegible] ।**
**अण्णो ण मज्झ सरणं सरणं सो एक्क परमप्पा ॥४६॥**

न स्त्री न नपुंसको न पुमान्.............।
अन्यो न मम शरणं शरणं स एकः परमात्मा ॥

**ते को ण होदि सुयणो तं कस्स ण बंधवो ण सुयणो वा ।**
**अप्पा हवेइ अप्पा एगागी जाणगो सुद्धो ॥४७॥**

तव को न भवति स्वजनः त्वं कस्य न बन्धुः सुजनो वा ।
आत्मा भवेत् आत्मा एकाकी ज्ञायकः शुद्धः ॥

**जिणदेवो होउ सया मई सुजिणसासणे सया होउ ।**
**सण्णासेण य मरणं भवे भवे मज्झ संपदओ ॥४८॥**

जिनदेवो भवतु सदा मतिः सुजिनशासने सदा भवतु ।
संन्यासेन च मरणं भवे भवे मम सम्पत् ॥

**जिणो देवो जिणो देवो जिणो देवो जिणो जिणो ।**
**दया धम्मो दया धम्मो दया धम्मो दया सया ॥४९॥**

जिनो देवो जिनो देवो जिनो देवो जिनो जिनः ।
दया धर्मो दया धर्मो दया धर्मो दया सदा ॥

**महासाहू महासाहू महासाहू दियंबरा ।**
**एवं तच्च सदा हुज्ज जाव णो मुत्तिसंगमो ॥५०॥**

महासाधवः महासाधवः महासाधवो दिगम्बराः ।
एवं तत्वं सदा भवतु यावन्न मुक्तिसंगमः ॥

**एवमेव गओ कालो अणंतो दुक्खसंगमे ।**
**जिणोवदिट्ठसण्णासे ण यत्तारोहणा कया ॥५१॥**

एवमेव गतः कालोऽनन्तो दुःखसङ्गमे ।
जिनोपदिष्टसंन्यासे न यत्नारोहणा कृता ॥

**संपई एव संपत्ताराहणा जिणदेसिया ।**
**किं किं ण जायदे मज्झ सिद्धिसंदोहसंपई ॥५२॥**

सम्प्रति एव सम्प्राप्ताराधना जिनदेशिता ।
का का न जायते मम सिद्धिसंदोहसम्पत्तिः ॥

**अहो धम्ममहो धम्मं अहो मे लद्धि णिम्मला ।**
**संजादा संपया सारा जेण सुक्खमहुणयं ॥ ५३ ॥**

अहो धर्मः अहो धर्मः अहो मे लब्धिर्निर्मला ।
संजाता सम्पत् सारा येन सुखं अनुपमम् ॥

**एवं आराहंतो आलोयणवंदणापडिक्कमणं ।**
**पावइ फलं च तेसिं णिद्दिट्ठं अजियबंभेण ॥५४॥**

एवमाराधयन् आलोचनावन्दनाप्रतिक्रमणानि ।
प्राप्नोति फलं च तेषां निर्दिष्टमजितब्रह्मणा ॥

* इति कल्याणालोचना ।

---

* योगसारः कल्याणालोचनेति ग्रन्थद्वयं केनचिदन्येन सम्पादितं । द्वे प्रेसपुस्तके अप्यशुद्धे आस्ताम् ।

श्रीयोगीन्द्रदेव-विरचिता ।

# अमृताशीतिः ।

विश्वप्रकाशिमहिमानमसमानमेक-
मोमक्षराद्यखिलवाङ्मयहेतुभूतं ।
यं शंकरं सुगतमाधवमीशमाहु-
रर्हन्तमूर्जितमहन्तमहं नमामि ॥ १ ॥

अर्थोपार्जनप्रयासः ।

भ्रातः ! प्रभातसमये त्वरितः किमर्थ-
मर्थाय चेत्स च सुखाय ततः स सार्थः ।
यद्येवमाशु कुरु पुण्यमतोर्थसिद्धिः
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ २ ॥

धर्मादयो हि हितहेतुतया प्रसिद्धा
धर्माद्धनं धनत ईहितवस्तुसिद्धिः ।
बुद्ध्वेति मुग्ध ! हितकारि विधेहि पुण्यं
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ ३ ॥

वार्त्तादिभिर्यदि धनं नियतं जनानां
निस्वः कथं भवति कोऽपि कृषीवलादिः ।
ज्ञात्वेति रे मम वचश्चतुराः स्वपुण्यैः
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ ४ ॥

प्रारभ्यते भुवि बुधेन धियाधिगम्य
तत्कर्म येन जगतोऽपि सुखोदयः स्यात् ।

कृष्यादिकं पुनरिदं विदधासि यस्त्वं
खस्यापि रे विपुलदुःखफलं न किं तत् ॥ ५ ॥
एह्येहि याहि सर निस्सर वारितोऽसि
मा मन्दिरं नरपतेर्विश रे विशङ्कम् ।
इत्यादिसेवनफलं प्रथमं लभन्ते
लब्धापि सा यदि चला सफला कथं श्रीः ॥ ६ ॥
वार्त्तापि किम्न तव कर्णमुपागतेयं
पात्रे रतिं स्थिरतया न गता कदाचित् ।
चापल्यतोऽपि जितसर्वनितम्बिनीश्री-
स्तस्याः कथं बत कृती विदधाति सङ्गम् ॥ ७ ॥

प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखी यदि सुखहेतोः को मूर्खस्सेवकादपरः ॥ ८ ॥

रत्नार्थिनी यदि कथं जलधिं विमुञ्चेत्
रूपार्थिनी यदि च पंचशरं कथं वा ।
दिव्योपभोगनिरता यदि नैव शक्रं
कृष्णाश्रया नवगता न गुणार्थिनी श्रीः ॥ ९ ॥

सत्त्वाधिकोऽपि सुमहानपि शीतलोऽपि
मुक्तः श्रिया चपलया जलधिर्यथेह ।
तस्याः कृते कथममी कृतिनोऽपि लोकाः
केऽपि ज्वलज्ज्वलनमाशु विशन्ति केचित् ॥ १० ॥
सत्यं समस्तसुखमल्पमिहेहितार्थै-
रीहापि ते न तव तेषु सदेति वेद्मि ।

तेषां यदर्जनवियोगजदुःखजाल
तस्यावधिं बहुधियापि न हन्त वेद्मि ॥ ११ ॥
निर्बादमादिरहितं विधुताघसंघं
यद्यस्ति नापरमपारमभारसौख्यम् ।
एवंविधेऽपि मतिमानपि शर्मणीत्थं
मुद्रिङ्करो तु पुरुषो वद कोऽत्र दोषः ॥ १
आस्तां समस्तमुनिसंस्तुतमस्तमोहं
सौख्यं सखे ! विगतखेदमसंख्यमेतत् ।
निस्सङ्गिनां प्रशमजं यदिहापि जातं
तस्यांशतोऽपि सदृशं स्वरजं न जातु ॥ १३ ॥

अनन्तसुखविघ्नः ।

अज्ञाननामतिमिरप्रसरोयमन्तः
सन्दर्शिताखिलपदार्थविपर्ययात्मा ।
मंत्री स मोहनृपतेः स्फुरतीह याव-
त्तावत्कुतस्तव शिवं तदुपायता वा ॥ १४ ॥

शरीरं ।

किञ्चाशुचौ शुचिसुगन्धिरसादिवस्तु
यस्मिन् गतं नरकतां समुपैति सद्यः ।
संरम्यते तदपि मोहवशाच्छरीरं
सर्वैरहो विजयते महिमा परोऽस्य ॥ १५
अज्ञानघोरसरिदम्बुनिपातमूर्त्ति-
दुर्मोचमोहगुरुकर्दमदूरमग्नं ।
जन्मान्तकादिमकरैरुपगृह्यमाणं
विश्वं निरीशमवशं सहतेऽतिदुःखम् ॥ १६ ॥

अज्ञानी ।

अज्ञानमोहमदिरां परिपीय मुग्ध !
हे हन्त हन्ति परिवल्गति जल्पतीष्टम् ।
पश्येदृशं जगदिदं पतितं पुरस्ते
किन्तूद्ध्वंसे त्वमपि बालिश ! तादृशोऽपि ॥ १७ ॥

चक्खुं सदंसणं सथ सारो सच्चहि दोसपरिहारीणं ।
चक्खू होइ णिरुन्दो दट्ठूणमिलयडीतंस ? ॥ १८ ॥

वैरी ममायमहमस्य कृतोपकार
इत्यादिदुःखघनपावकपच्यमानं ।
लोकं विलोक्य न मनागपि कम्पसे त्वं
क्रन्दं कुरुष्व वद तादृश ! कुर्वसे किम् ॥ १९ ॥

नो जीयते जगति केनचिदेष मोह
इत्याकुलः किमसि सम्प्रति रे वयस्य ! ।
एकोऽपि कोऽपि पुरतः स्थितशत्रुसैन्यं
सत्वाधिको जयति शोचसि किं मुधा त्वम् ॥ २० ॥

मुक्त्वालसत्वमधिसत्वबलोपपन्नः
श्रुत्वा पराश्च समतां कुलदेवतां त्वम् ।
संज्ञानचक्रमिदमङ्ग ! गृहाण तूर्ण–
मज्ञानमन्त्रियुतमोहरिपूपमर्दि ॥ २१ ॥

सत्वं हि केवलमलं फलतीष्टसिद्धिं
युक्तं तया समतया यदि कः परस्ते ।
एकद्वयेन सहितं यदि बोधरत्न–
मेकस्त्वमेव पतिरङ्ग ! चराचराणाम् ॥ २२ ॥

मल्लो न यस्य भुवनेऽपि समोऽस्ति सोऽयं
कामः करोति विकृतिं तव तावदेव ।
यावन्न यासि शरणं चरणं समन्तात्
सोपानतामुपगतां शिवसौधभूमेः ॥ २३ ॥

कालत्रयेऽपि भुवनत्रयवर्त्तमान-
सत्वप्रमाथिमदनादिमहारयोऽमी ।
पश्याशु नाशमुपयान्ति दृशैव यस्याः
सा सम्मता ननु सतां समतैव देवी ॥ २४ ॥

चारित्रम् ।

वाञ्छा सुखे यदि सखे! तदवैमि नाहं
धर्माद्दृते भवति सोऽपि न यावदेते ।
रागादयस्तदसनं समता त एव
तस्माद्विधेहि हृदि तां सततं सुखाय ॥ २५ ॥

समतास्तुतं ।

ज्वालायमानमदनानलपुञ्जमध्ये
विश्वं कथं कथति कोऽपि कुतूहलेन ।
कस्मिन्नपीह समसौख्यमया हिमानी-
मध्यासते यतिवराः समताप्रसादात् ॥ २६ ॥

मैत्री कृपा प्रमुदिता सुभगाङ्गनानां
शुभ्राभ्रसन्निभमनःसदने निवासम् ।
त्वं देहि ता हि समताभिमताः समीत्वा-
देवं न कोऽपि भुवनेऽपि तवास्ति शत्रुः ॥ २७ ॥

सत्साम्यभावगिरिगह्वरमध्यमेत्य
　पद्मासनादिकमदोषमिदं च बद्ध्वा ।
आत्मानमात्मनि सखे ! परमात्मरूपं
　त्वं ध्याय वेत्सि ननु येन सुखं समाधेः ॥ २८ ॥

आत्माराधना ।

आराध्य धीर ! चरणौ सततं गुरूणां
　लब्ध्वा ततो दशममार्गवरोपदेशं ।
तस्मिन्निधेहि मनसः स्थिरतां प्रयत्नात्
　शोषं प्रयाति तव येन भवापगेयम् ॥ २९ ॥

फलम् ।

नित्यं निरामयमनन्तमनादिमध्य–
　मर्हन्तमूर्जितमजं स्मरतो हृदीशम् ।
नाशं न याति यदि जातिजरादिकं ते
　तर्हि श्रमः कथमयं न मुदा मुनीनाम् ॥ ३० ॥
क्षीराम्बुराशिसदृशांशु यदीयरूप–
　माराध्यसिद्धिमुपयान्ति तपोधनास्त्वं ।
ह्रद्दो स्वहंसहरिविष्टरसन्निविष्ट–
　मर्हन्तमक्षरमिदं स्मर कर्ममुक्त्यै ॥ ३१ ॥

पदस्थः ।

यं निष्कलं सकलमक्षयकेवलं वा
　सन्तः स्तुवन्ति सततं समभावभाजः ।
वाच्यस्य तस्य वरवाचकमन्त्रयुक्तो
　हे पान्थ ! शाश्वतपुरीं विश निर्विशङ्कः ॥ ३२ ॥

यन्न्यासतः स्फुरति कोऽपि हृदि प्रकाशो
वाग्देवता च वदने पदमादधाति ।
लब्ध्वा तदक्षरवरं गुरुसेवया त्वं
मा मा कृथाः कथमपीह विराममस्मात् ॥ ३३ ॥

यावत् समस्ततिरियं सरतीह तावत्
तावच्च रे चरसि ही रजसि त्वमेव ।
यावत्स्वशर्मनिकरामृतवारिवर्षं
न हँहिमांशुरुदयं न करोति तेऽन्तः ॥ ३४ ।

हँमन्त्रसारमतिभास्वरधामपुंजं
सम्पूज्य पूजिततमं जपसंयमस्थः ।
नित्याभिराममविराममपारसारं
यद्यस्ति ते शिवसुखं प्रति सम्प्रतीच्छा ॥ ३५ ॥

हँकाक्षरं निगदितं ननु पिण्डरूपं
तस्यापि मूलमपरं परमं रहस्यम् ।
वक्ष्यामि ते गुरुपरम्परया प्रयातं
यन्नाहतं ध्वनति त[द्ध]त्तदनाहताख्यम् ॥ ३६ ॥

अस्मिन्ननाहतबिले विलयेन मुक्ते
नित्ये निरामयपदे स्वमनो निधाय ।
त्वं याहि योगशयनीयतलं सुखाय
श्रान्तोऽसि चेद्भवपथभ्रमणेन गाढम् ॥ ३७ ॥

लोकालोकविलोकनैकनयनं यद्गाम्भयं तस्य या
मूलं बालमृणालनालसदृशीमात्रां सदा तां सतीं ।

स्मारं स्मारममन्दमन्दमनसा स्फारप्रभाभासुरं
संसारार्णवपारमेहि तरसात् किं त्वं वृथा ताम्यसि ।३८

धर्मध्यानं ।

जन्माम्भोधिनिपातभीतमनसां शश्वत्सुखं वाञ्छतां
धर्म्यध्यानमवादि साक्षरमिदं किञ्चित् कथंचिन्मया ।
सूक्ष्मं किञ्चिदतस्तदेव विधिना नालम्बनं कथ्यते
भ्रूभङ्गादिकदेशसङ्गतमृते देशैः परैः किञ्चन ॥३९॥

व्रजसि मनसि मोहं चञ्चलं तावदेवं
बहुगुणगणगण्यं मन्यसेऽन्यञ्च देवं ।
गुरुवचननियोगाद्वेत्सि यावद्देवं
शशधरकरगौरं बिन्दुदेवं स्फुरन्तम् ॥ ४० ॥

बिन्दुप्रदेश आराधनाफलम् ।

झटिति करणयोगाद्वीक्षते भ्रूयुगान्ते
व्रजति यदि मनस्ते बिन्दुदेवे स्थिरत्वम् ।
त्रुटति निबिडबन्धो वश्यतामेति मुक्तिः
सदलममलशीले योगनिद्रां भजस्व ॥ ४१ ॥

पवन-जयमूलानाहतम् ।

सरलविमलनालीद्वारमूले मनस्त्वं
कुरु सरति यतोऽयं अक्षर-प्राणवायुः ।
परिहृतपरनालीयुग्ममार्गप्रयाणः
दलितमलदलौघः केवलज्ञानहेतुः ॥ ४२ ॥

मूलानाहतराधना ।

विलसदलसतातस्तीव्रकर्मोदयाद्वा
सरलविमलनालीरन्ध्रमप्राप्तलोकः ।

अहह कथमसह्यं दुःखजालं विशालं
सहति महति नैवाचार्यमज्ञस्तदर्थम् ॥ ४३ ॥

अनाहताराधना ।

रसरुधिरपलास्थिस्नायुशुक्रप्रमेद-
प्रचुरतरसमीरश्लेष्मपित्तादिपूर्णे ।
तनुनरककुटीरे वासतस्ते घृणा चेद्
हृदयकमलगर्भे चिन्तय त्वं परोऽसि ॥ ४४ ॥

अप्रध्यानम् ।

अजममरमभेयं ज्ञानदृग्वीर्यशर्मा-
स्पदमविपदमिद्धं स्वस्वरूपं यदि त्वं ।
कुरु हृदयनभोन्तर्ध्यानतो निर्विकल्पं
वपुषि विषमरोगे नश्वरे मा रमस्व ॥ ४५ ॥

अपरानाहता ।

अपरमपि विधानं दामकामादिकानां
द्रुतविदुरविधानं धर्मता लभ्यते यत् ।
तदहमिह समस्तादंहसां मुक्तये ते
हितपथपथिकेदं क्षिप्रमावेदयामि ॥ ४६ ॥

नादानाहताराधनातत्फलम् ।

श्रवणयुगलमूलाकाशमासाद्य सद्यः
स्वपिहि पिहितमुक्तस्वान्तसद्वारसारे ।
विमलसदलयोगानल्पतल्पे ततस्त्वं
स्फुरितसकलतत्त्वं श्रोष्यसि स्वस्य नादम् ॥ ४७ ॥

नादोत्पत्तिकालनादभेदनिरूपणम् ।

शशधरहुतभोजिद्वादशार्द्धद्विषङ्कः
प्रमितविदितमासैः स्वस्वरूपप्रदर्शी ।
मदकलपरपुष्टांभोदनद्यम्बुराशि-
ध्वनिसदृशरवत्वाज्जायते सा चतुर्धा ॥ ४८ ॥

नादोत्पत्तिस्थानम् ।

श्रवणयुगलमध्ये मस्तके वक्षसि स्वे
भवति भवनमेषां भाषितानां त्रयाणां ।
विपुलफलमिहैवोत्पद्यते यद्यतेभ्य-
स्तदपि शृणु मया त्वं कथ्यमानं हि तथ्यम् ॥४९॥

तत्फलम् ।

भ्रमरसदृशकेशं मस्तकं दूरदृष्टि
र्वपुरजरमरोगं मूलनादप्रसिद्धेः ।
अणुलघुमहिमाद्याः सिद्धयः स्युर्द्वितीयात्
सुरनरखचरेशां सम्पदश्चान्यभेदात् ॥ ५० ॥

समुद्रघोषोत्पत्तिः ।

करशिरसि नितम्बे नाभिबिम्बे च कर्णे
प्रभवति घनघोषाम्भोगिनिर्घोषतुल्यः ।
विघटयति कपाटं द्वन्द्वमद्वन्द्वसिद्धा-
स्पदघटितमघौघध्वंसकोयं चतुर्थः ॥ ५१ ॥

नादाकर्णनं ।

प्रकटितनिजरूपं घोषमाकर्ण्य रम्यं
परिहरत नितान्तं विस्मयं हो यतीशाः ! ।

कुरुत कुरुत यूयं योगयुक्तं स्वचित्तं
तृणजललवतुल्यैः किमफलैः क्षौद्रसिद्धयै ॥ ५२ ॥

नादम् ।

सकलदृगयमेकः केवलज्ञानरूपो
विदधति पदमस्मिन्साधवः सिद्धिसिद्धयै ।
तदलममुमनूनं नादमाराध्य सम्यक्
त्वमपि भव शुभात्मा सिद्धिसीमन्तिनीशः ॥ ५३ ॥

ज्योतिरनाहतम् ।

बहिरबहिरुदारज्योतिरुद्भासदीपः
स्फुरति यदि तवायं नाभिपद्मे स्थितस्य ।
अपसरति तदानीं मोहघोरान्धकार-
श्चरणकरणदक्षो मोक्षलक्ष्मीदिदृक्षोः ॥ ५४ ॥

धर्म्मध्यानोपसंहारः ।

इति निगदितमेतद्देशमाश्रित्य किञ्चित्
गुरुसमयनियोगात्प्रत्ययस्यापि हेतोः ।
परमपरमुदारज्ञानमानन्दतानं
विमलसकलमेकं सम्यगो(गे) कः समस्ति ॥ ५५ ॥

गुरुपरम्परोपदेशः ।

प्रथममुदितमुक्तेनादिदेवेन दिव्यं
तदनु गणधराद्यैः साधुभिर्यद्धृतं च ।
कथितमपि कथञ्चिन्नादिगम्यं समोहै-
रधिगतमपि नश्यत्याशु सिध्या विनेह ॥ ५६ ॥

दिव्योपदेशः ।

स्वरनिकरविसर्गव्यञ्जनाद्यक्षरैर्य-
द्रहितमहितहीनं शाश्वतं मुक्तसंख्यम् ।
अरसतिमिररूपस्पर्शगन्धाम्बुवायु-
शिखिपवनसखाणुस्थूलदिक्चक्रवालम् ॥ ५७ ॥
ज्वरजननजराणां वेदना यत्र नास्ति
परिभवति न मृत्युर्नागतिर्नो गतिर्वा ।
तदतिविशदचित्तैर्लभ्यतेऽङ्गेऽपि तत्त्वं
गुणगुरुगुरुपादांभोजसेवाप्रसादात् ॥ ५८ ॥

गुरूपदेशः ।

गिरिगहनगुहाद्यारण्यशून्यप्रदेश-
स्थितिकरणनिरोधध्यानतीर्थोपसेवा ।
प्रपठनजपहोमैर्ब्रह्मणो नास्ति सिद्धि-
र्मृगय तदपरत्वं भोः प्रकारं गुरुभ्यः ॥ ५९ ॥
दृगवगमनलक्ष्मं स्वस्य तत्वं समन्ता-
द्गतमपि निजदेहे देहिभिर्नोपलक्ष्यम् ।
तदपि गुरुवचोभिर्बोध्यते तेन देवो
गुरुरधिगततत्वस्तत्वतः पूजनीयः ॥ ६० ॥

विद्यानन्दे अभिमतफलसिद्धेः

इत्यादि विद्यानन्दस्वामिभिरुक्तम् ।

अभिमतफलसिद्धेरभ्युपायः सुबोधः
प्रभवति स च शास्त्रात्तस्य चोत्पत्तिराप्तात् ।
इह भवति स पूज्यस्तत्प्रसादात्प्रबुद्धै-
र्न हि कृतमुपकारं साधवो विस्मरन्ति ॥ ६१ ॥

स्वस्मिन् सदाभिलाषित्वादभीष्टज्ञापकत्वतः
स्वयं हि तत्प्रयोक्तृत्वादात्मैव गुरुरात्मनः ॥ ६२ ॥

मोक्षमार्गः ।

दृगवगमनवृत्तस्वस्वरूपप्रविष्टो
व्रजति जलधिकल्पं ह्यागम्भीरभावं ।
त्वमपि सुनयमत्वान्मद्वचस्सारमस्मिन्
भवसि भव भवान्तस्थायिधामाधिपस्त्वम् ॥ ६३ ॥

यदि चलति कथञ्चिन्मानसं स्वस्वरूपा-
द्भ्रमति बहिरतस्ते सर्वदोषप्रसङ्गः ।
तदनवरतमन्तर्मग्नसंविग्नचित्तो
भव भवसि भवान्तस्थायिधामाधिपस्त्वम् ॥ ६४ ॥

उक्तम् ।

अहिंसाभूतानामित्यादिसमन्तभद्रवचनम् ।

शरीरनिर्म्मोहः ।

बहिरबहिरसारे दुःखभारे शरीरे
क्षयिणि बत रमन्ते मोहिनोऽस्मिन् वराकाः ।
इति यदि तव बुद्धिर्निर्विकल्पस्वरूपे
भव भवसि भवान्तस्थायिधामाधिपस्त्वम् ॥ ६५ ॥

अजङ्गमजङ्गमयो रागाद्युत्पत्तिहेतुः ।

इदमिदमतिरम्यं नेदमित्यादिभेदा-
द्विदधति पदमेते रागरोषादयस्ते ।

तदलममलमेकं निष्कलं निष्क्रियस्सन्
भज भजसि समाधेः सत्फलं येन नित्यम् ॥ ६६ ॥

जटासिंहनन्द्याचार्यवृत्तम् ।

तावत्क्रियाः प्रवर्तन्ते यावद्द्वैतस्य गोचरं ।
अद्वये निष्कले प्राप्ते निष्क्रियस्य कुतः क्रिया ॥ ६७ ॥

बन्धमोक्षौ ।

अहमहमिह भावाद्भावना यावदन्त-
र्भवति भवति बन्धस्तावदेषोऽपि नित्यः ।
क्षणिकमिदमशेषं विश्वमालोक्य तस्मा-
द्व्रज शरणमबन्धः शान्तये त्वं समाधेः ॥६८॥

अकलंकदेववृत्तम् ।

साहंकारे मनसि न समं याति जन्मप्रबन्धो
नाहंकारश्चलति हृदयादात्मदृष्टा(ष्ट्यां) च सत्यां ।
अन्यः शास्त्रो जगति च यतो नास्ति नैरात्मवादी
नान्यस्तस्मादुपशमविधेस्तन्मतादस्ति मार्गः ॥६९॥
रविरयमयवि(मि)न्दुर्द्योतयन्तौ पदार्थान्
विलसति सति यस्मिन्नासती मौतु ! भातः ।
तदपि बत ! हतात्मा ज्ञानपुञ्जेऽपि तस्मिन्
व्रजति भवति मोहं हेतुना केन कश्चित् ॥७०॥

कुन्दकुन्दाचार्याभिप्रायः ।

ये लोकं ज्वलयत्यनल्पमहिमा सोप्येष तेजोनिधि-
र्यस्मिन् सत्यवभाति नासति पुनर्देवोंशुमाली स्वयं ।

तस्मिन् बोधमयप्रकाशविशदे मोहान्धकारापहे
येऽन्तर्यामिनि पूरुषे प्रतिहताः संशेरते ते हताः ॥७१॥

आत्मपरिज्ञानम् ।

करणजनितबुद्धिर्नेक्षते मूर्त्तिमुक्तं
श्रुतजनितमतिर्यास्पष्टमेयावभासा ।
उभयमतिनिरोधे स्पष्टमत्यक्षमक्षं
समदिवसनिवासं शाश्वतं लप्स्यसे त्वम् ॥७२॥

प्राणापानप्रयाणः कफपवनभवव्याद(घ)यस्तावदेते-
स्पन्दस्तेऽथ तावत्तव चपलतया न स्थिराणीन्द्रियाणि ।
भोगा ये (ए) ते च भोक्ता त्वमपि भवसि हे हेलया यावदन्तः
साधो ! साधूपदेशाद्विशसि न परमब्रह्मणो निष्कलस्य ॥७३॥

निर्विकल्पसमाधिः ।

ब्रह्मांडं यस्य मध्ये महदपि सदृशं दृश्यते रेणुनेदं
तस्मिन्नाकाशरन्ध्रे निरवधिनि मनो दूरमायोज्य सम्यक् ।
तेजोराशौ परेऽस्मिन्परिहृतसदसद्वृत्तितो लब्धलक्ष्यां
हे दक्षाध्यक्षरूपे भव भवसि भवाम्भोधिपारावलोकी ॥७४॥

संसारसारकर्मप्रचुरतरमरुत्प्रेक्षणाद्भ्राम्य भ्रात-
ब्रह्मांडखण्डे नवनवकुनपुर्गृह्णता मुञ्चता च ।
कस्कः कौतस्कुतः कश्चिदपि विषयो न भुक्तो यो न मुक्तो
जातेदानीं विरक्तिस्तव यदि विश रे ब्रह्मगम्भीर-
सिन्धुम् ॥७५॥

बहिरात्मस्वरूपम् ।

पारावारोऽतिपारः सुगिरिरुरयं रे वरं तीर्थमेतत्
रेवारङ्गत्तरङ्गसुरसरिदपरा रेवतीशो हरिर्वा ।

इत्युद्भ्रान्तान्तरात्मा भ्रमति बहुतरं तावदात्मात्मभुक्त्यै
यावद्देहेऽपि देहे हितविहितहितब्रह्मशुद्धं न पश्येत् ॥७६॥

संसारसुखहेयमनित्यम् ।

विध्ये विश्वम्भरेशाः शिरसि रण पदाम्भोजयुग्मं दधन्ते
वश्या भावस्य लक्ष्मीर्वपुरपि निरघं विघ्नहेतुः कुतो मे ।
इत्यादौ शर्महेतौ निपतति निखिले किं ततो मुद्गरोऽयम्
तस्मात्तद्ध्याय किञ्चित् स्थिरतरमनसा किं ततो यत्र नास्ते॥७७

दत्तं पदं शिरसि विद्विषतां ततः किं
जाताः श्रियः सकलकामदुघास्ततः किम् ।
सन्तर्पिताः प्रणयिनो विभवैस्ततः किं
कल्पस्थितिं तनुभृतां तनुभिस्ततः किम् ॥७८॥

परमोपदेशः ।

तस्मादनन्तमजरं परमप्रकाशं
तच्चित्त ! चिन्तय किमेभिरसद्विकल्पैः ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणजन्तुमता भवन्ति ॥७९॥

उपशमफलाद्विद्याबीजात् फलं चरमिच्छतां ।
भवति विपुलो यद्ध्यायासस्तदत्र किमद्भुतम् ॥८०॥
न नियतफलाः सर्वे भावाः फलान्तरमिष्यते ।
जनयति खलु व्रीहिबीजाश्च जातु यवाङ्कुरम् ॥८१॥

उपसंहारः ।

चञ्चच्चन्द्रोरुरोचिरुचिरतरवचःक्षीरनीरप्रवाहे
मज्जन्तोऽपि प्रमोदं परमपरनरा संगिनोगुर्यदीये
योगज्ज्वालायमानज्वलदनलशिखाक्लेशवल्लीविहोता
योगीन्द्रो वः सचन्द्रप्रभविभुरविभुर्मङ्गलं सर्वकालम्॥८२॥

इति योगीन्द्रदेवकृतामृताशीतिः समाप्ता ।

मङ्गलम्भूयात् ।

श्रीशिवकोट्याचार्यविरचिता

# रत्नमाला ।

सर्वज्ञं सर्ववागीशं वीरं मारमदापहं ।
प्रणमामि महामोहशान्तये मुक्तताप्तये ॥१॥

सारं यत्सर्वसारेषु वन्द्यं यद्वन्दितेष्वपि ।
अनेकान्तमयं वन्दे तदर्हद्वचनं सदा ॥२॥

सदावदातमहिमा सदा ध्यानपरायणः ।
सिद्धसेनमुनिर्जीयाद्भट्टारकपदेश्वरः ॥३॥

स्वामी समन्तभद्रो मेऽहर्निशं मानसेऽनघः ।
तिष्ठताज्जिनराजोद्यच्छासनाम्बुधिचन्द्रमाः ॥४॥

वर्द्धमानजिनाभावाद्भारते भव्यजन्तवः ।
कृतेन येन राजन्ते तदहं कथयामि वः ॥५॥

सम्यक्त्वं सर्वजन्तूनां श्रेयः श्रेयःपदार्थिनां ।
विना तेन व्रतः सर्वोऽप्यकल्प्यो मुक्तिहेतवे ॥६॥

निर्विकल्पश्चिदानन्दः परमेष्ठी सनातनः ।
दोषातीतो जिनो देवस्तदुपज्ञं श्रुतिः परा ॥७॥

निरम्बरो निरारम्भो नित्यानन्दपदार्थनः ।
धर्मदिक्कर्मधिक् साधुर्गुरुरित्युच्यते बुधैः ? ॥८॥

अमीषां पुण्यहेतूनां श्रद्धान तन्निगद्यते ।
तदेव परमं तत्त्वं तदेव परमं पदम् ॥९॥

विरत्या संयमेनापि हीनः सम्यक्त्ववान्नरः।
स देवं याति कर्माणि शीर्णयत्येव सर्वदा ॥१०॥

अबद्धायुष्कपक्षे तु नोत्पत्तिः सप्तभूमिषु।
मिथ्योपपादत्रितये सर्वस्त्रीषु च नान्यथा ॥११॥

महाव्रताणुव्रतयोरुपलब्धिर्निरीक्षते।
स्वर्गेऽन्यत्र न सम्भाव्यो व्रतलेशोऽपि धीधनैः ॥१२॥

संवेगादिपरः शान्तस्तत्त्वनिश्चयवान्नरः।
जन्तुर्जन्मजरातीतः पदवीमवगाहते ॥१३॥

अणुव्रतानि पञ्चैव त्रिप्रकारं गुणव्रतं।
शिक्षाव्रतानि चत्वारीत्येवं द्वादशधा व्रतम् ॥१४॥

हिंसातोऽसत्यतश्चौर्यात् परनार्याः परिग्रहात्।
विमतेर्विरतिः पञ्चाणुव्रतानि गृहेशिनाम् ॥१५॥

गुणव्रतानामाद्यं स्याद्दिग्व्रतं तद्द्वितीयकम्।
अनर्थदण्डविरतिस्तृतीयं प्रणिगद्यते ॥१६॥

भोगोपभोगसंख्यानं शिक्षाव्रतमिदं भवेत्।
सामायिकं प्रोषधोपवासोऽतिथिषु पूजनम् ॥१७॥

मारणान्तिकसल्लेख इत्येवं तच्चतुष्टयं।
देहिनः स्वर्गमोक्षैकसाधनं निश्चितक्रमम् ॥१८॥

मद्यमांसमधुत्यागसंयुक्ताणुव्रतानि नुः।
अष्टौ मूलगुणाः पञ्चोदुम्बरैश्चार्भकेष्वपि ॥१९॥

वस्त्रपूतं जलं पेयमन्यथा पापकारणं।
स्नानेऽपि शोधनं वारः करणीयं दयापरैः ॥२०॥

प्रतिमाः पालनीयाः स्युरेकादश गृहेशिनां ।
अपवर्गाधिरोहाय सोपानन्तीह ताः पराः ॥२१॥

कलौ काले वने वासो वर्ज्यते मुनिसत्तमैः ।
स्थीयते च जिनागारे ग्रामादिषु विशेषतः ॥२२॥

तेषां नैर्ग्रन्थ्यपूतानां मूलोत्तरगुणार्थिनां ।
नानायतिनिकायानां छद्मस्थज्ञानराजिनाम् ॥२३॥

ज्ञानसंयमशौचादिहेतूनां प्रासुकात्मनां ।
पुस्तपिच्छकमुख्यानां दानं दातुर्विमुक्तये ॥ २४ ॥

येनाद्यकाले यतीनां वैय्यावृत्यं कृतं मुदा ।
तेनैव शासनं जैन प्रोद्धृत शर्म्मकारणम् ॥२५॥

उत्तुंगतोरणोपेतं चैत्यागारमघक्षयं ।
कर्त्तव्यं श्रावकैः शक्त्यामरादिकमपि स्फुटम् ॥२६॥

येन श्रीमज्जिनेशस्य चैत्यागारमनिन्दितं ।
कारितं तेन भव्येन स्थापितं जिनशासनम् ॥२७॥

गोभूमिस्वर्णकच्छादिदानं वसतयेऽर्हतां ।
कर्त्तव्यं जीर्णचैत्यादिसमुद्धरणमप्यदः ॥२८॥

सिद्धान्ताचारशास्त्रेषु वाच्यमानेषु भक्तितः ।
धनव्ययो व्ययो नृणां जायतेऽत्र महर्द्धये ॥२९॥

दयादत्यादिभिर्नूनं धर्म्मसन्तानमुद्धरेत् ।
दीनानाथानपि प्राप्तान्विमुखान्नैव कल्पयेत् ॥३०॥

व्रतशीलानि यान्येव रक्षणीयानि सर्वदा ।
एकेनैकेन जायन्ते देहिनां दिव्यसिद्धयः ॥३१॥

मनोवचनकायैर्यो न जिघांसति देहिनः ।
स स्याद्गजादियुद्धेषु जयलक्ष्मीनिकेतनम् ॥३२॥
सुस्वरस्पष्टवागीष्टमतव्याख्यानदक्षिणः ।
श्रूणाद्यैर्निर्जिताराशिर्यश्चिरस्थैर्भवेत् ॥३३॥
चतुःसागरसीमाया भुवः स्यादधिपो नरः ।
परद्रव्यपराङ्मुखः सुवृत्तोपार्जितस्वकः ॥३४॥
मातृपुत्रीभगिन्यादिसंकल्पं परयोषिति ।
तन्वानः कामदेवः स्यान्मोक्षस्यापि च भाजनम् ॥३५॥
जायाः समग्रशोभाढ्याः सम्पदो जगतीतले ।
तास्तत्सर्वा अपि प्रायः परकान्ताविवर्ज्जनात् ॥ ३६ ॥
अतिकांक्षा हता येन ततस्तेन भवस्थितिः ।
ह्रस्विता निश्चिता वास्य कैवल्यसुखसङ्गतिः ॥३७॥
मद्यमांसमधुत्यागफलं केनानुवर्ण्यते ।
काकमांसनिवृत्याभूत्स्वर्गे खदिरसागरः ॥३८॥
मद्यस्यावद्यमूलस्य सेवनं पापकारणं ।
परत्रास्तामिहाप्युच्चैर्जननीं वांछयेदरम् ॥३९॥
गम्भूतोऽशुचिवस्तूनामप्यादाय रसान्तरम् ।
मधूयन्ति कथं तस्यापवित्रं पुण्यकर्मसु ॥४०॥
व्यसनानि प्रवर्ज्यानि नरेण सुधियाऽन्वहं ।
सेवितान्याहतानि स्युर्नरकायाश्रियेऽपि च ॥४१॥
छत्रचामरवाजीभरथपादातिसंयुतः ।
विराजन्ते नरा यत्र ते रात्र्याहारवर्जिनः ॥४२॥

---

१ 'मद्यन्ति' ऐसा पाठ पुस्तकमें दिया है।

दशन्ति तं न नागाद्या न ग्रसन्ति च राक्षसाः ।
न रोगाश्चापि जायन्ते यः स्मरेन्मंत्रमव्ययम् ॥४३॥
रात्रौ स्मृतनमस्कारः सुप्तः स्वप्नान् शुभाशुभान् ।
सत्यानेव समाप्नोति पुण्यं च चिनुते परम् ॥४४॥
नित्यनैमित्तिकाः कार्याः क्रियाः श्रेयोर्थिना मुदा ।
ताभिर्गूढमनस्को यत्पुण्यपण्यसमाश्रयः ॥४५॥
अष्टम्यां सिद्धभक्त्यामा श्रुतचारित्रशान्तयः ।
भवन्ति भक्तयो नूनं साधूनामपि सम्मतिः ॥४६॥
पाक्षिक्यः सिद्धचारित्रशान्तयः शान्तिकारणं ।
त्रिकालवंदनायुक्ता पाक्षिक्यपि सतां मता ॥४७॥
चतुर्दश्यां तिथौ सिद्धचैत्यश्रुतसमन्विते ।
गुरुशान्तिनुते नित्यं चैत्यपञ्चगुरू अपि ॥४८॥
नन्दीश्वरदिने सिद्धनन्दीश्वरगुरून्विता ।
शान्तिभक्तिः प्रकर्त्तव्या बलिपुष्पसमन्विता ॥४९॥
क्रियास्वन्यासु शास्त्रोक्तमार्गेण करणं मता ।
कुर्वन्नेवं क्रियां जैनो गृहस्थाचार्य उच्यते ॥५०॥
चिदानन्दं परं ज्योतिः केवलज्ञानलक्षणं ।
आत्मानं सर्वदा ध्यायेदेतत्तत्त्वोत्तमं नृणाम् ॥५१॥
गार्हस्थ्यं बाह्यरूपेण पालयन्नन्तरात्मयुत् ।
मुच्यते न पुनर्दुःखयोनावतति निश्चितम् ॥५२॥
कृतेन येन जीवस्य पुण्यबन्धः प्रजायते ।
तत्कर्त्तव्यं सदान्यत्र न कुर्यादतिकल्पितम् ॥५३॥

बौद्धचार्वाकसांख्यादिमिथ्यानयकुवादिनां ।
पोषणं माननं वापि दातुः पुण्याय नो भवेत् ॥५४॥
स्वकीयाः परकीया वा मर्यादालोपिनो नराः ।
न माननीयाः किं तेषां तपो वा श्रुतमेव च ॥५५॥
सुव्रतानि सुसंरक्षन्नित्यादिमहमुद्धरन् ।
सागारः पूज्यते देवैर्मान्यते च महात्मभिः ॥५६॥
अतीचारे व्रताद्येषु प्रायश्चित्तं गुरूदितं ।
आचरेज्जातिलोपं च न कुर्यादतियत्नतः ॥५७॥
श्रावकाध्ययनप्रोक्तकर्मणा गृहमेधिता ।
सम्मता सर्वजैनानां सा त्वन्या परिपन्थनात् ॥५८॥
पंचसूनाकृतं पापं यदेकत्र गृहाश्रमे ।
तत्सर्वमतये (ए?) वासौ दाता दानेन लुम्पति ॥५९॥
आहारभयभैषज्यशास्त्रदानादिभेदतः ।
चतुर्धा दानमाम्नातं जिनदेवेन योगिना ॥६०॥
मुहूर्त्ताद्गालितं तोयं प्रासुकं प्रहरद्वयं ।
उष्णोदकमहोरात्रं ततः सम्मूर्च्छितो भवेत् ॥६१॥
तिलतण्डुलतोयं च प्रासुकं भ्रामरीगृहे ।
न पानाय मतं तस्मान्मुखशुद्धिर्न जायते ॥६२॥
पाषाणोत्स्फुटितं तोयं घटीयंत्रेण ताडितं ।
सद्यः सन्तप्तवापीनां प्रासुकं जलमुच्यते ॥ ६३ ॥
देवर्षीणां प्रशौचाय स्नानाय च गृहार्थिनां ।
अप्रासुकं परं वारि महातीर्थजमप्यदः ॥ ६४ ॥

सर्वमेव विधिर्जैनः प्रमाणं लौकिकः सतां ।
यत्र न व्रतहानिः स्यात्सम्यक्त्वस्य च खंडनं ॥६५॥
चर्मपात्रगतं तोयं घृततैलं च वर्जयेत् ।
नवनीतं प्रसूनादिशाकं नाद्यात् कदाचन ॥६६॥
यो नित्यं पठति श्रीमान् रत्नमालामिमां परां ।
स शुद्धभावनो नूनं शिवकोटित्वमाप्नुयात् ॥६७॥

इति श्रीसमन्तभद्रस्वामिशिष्यशिवकोट्याचार्यविरचिता
रत्नमाला समाप्ता ।

---

अमृताशीतिः रत्नमाला चेति ग्रंथद्वयं केनचिदन्येन सम्पादितं अनयोः प्रेस पुस्तिका एव संप्राप्ता सा च दशरा-मशराकृपा अतीव अशुद्धा, अतोऽत्र विषये या अशुद्धयः संजाता भवन्ति तासु विषये क्षन्तव्योऽहं ।

श्रीमाघनन्दियोगीन्द्र–विरचितः

# शास्त्रसारसमुच्चयः ।

श्रीमन्नम्रामरस्तोमं प्राप्तानन्तचतुष्टयम् ।
नत्वा जिनाधिपं वक्ष्ये शास्त्रसारसमुच्चयम् ॥ १ ॥

अथ त्रिविधः कालो द्विविधः षड्विधो वा ॥ १ ॥ दशविधाः कल्पद्रुमाः ॥ २ ॥ चतुर्दश कुलकरा इति ॥ ३ ॥ षोडशभावनाः ॥ ४ ॥ चतुर्विंशतितीर्थकराः ॥ ५ ॥ चतुस्त्रिंशदतिशयाः ॥ ६ ॥ पंच महाकल्याणानि ॥ ७ ॥ घातिचतुष्टयम् ॥ ८ ॥ अष्टादश दोषाः ॥ ९ ॥ समवशरणैकादशभूमयः ॥ १० ॥ द्वादशगणाः ॥ ११ ॥ अष्टमहाप्रातिहार्याणि ॥ १२ ॥ अनन्तचतुष्टयमिति ॥ १३ ॥ द्वादशचक्रवर्तिनः ॥ १४ ॥ सप्ताङ्गानि ॥ १५ ॥ चतुर्दशरत्नानि ॥ १६ ॥ नवनिधयः ॥ १७ ॥ दशाङ्गभोगा इति ॥ १८ ॥ नवबलदेववासुदेवनारदाश्चेति ॥ १९ ॥ एकादशरुद्राः ॥ २० ॥

इति शास्त्रसारसमुच्चये प्रथमोऽध्यायः ॥ १ ॥

अथ त्रिविधो लोकः ॥ १ ॥ सप्तनरकाः ॥ २ ॥ एकान्नपंचाशत्पटलानि ॥ ३ ॥ इन्द्रकाणि च ॥ ४ ॥ चतुरुत्तरषट्छतनवसहस्रं श्रेणिबद्धानि ॥ ५ ॥ सप्तचत्वारिंशदुत्तरत्रिंशताधिकनवतिसहस्रालंकृतत्र्यशीतिलक्षं बिलानि प्रकीर्णकानि ॥ ६ ॥ एवं चतुरशीतिलक्षबिलानि ॥ ७ ॥ चतुर्विधं दुःखमिति ॥ ८ ॥ जम्बूद्वीप-

लवणसमुद्रादयोऽसंख्यातद्वीपसमुद्राः॥९॥तत्रार्धतृतीयद्वीपसमुद्रो मनुष्यक्षेत्रम्॥१०॥पण्णवतिकुभोगभूमयः॥११॥ पंचमन्दरगिरयः ॥१२॥जम्बूवृक्षाः॥१३॥शाल्मलयश्च॥१४॥ विंशतिर्यमकगिरयश्च ॥१५॥शतं सरांसि ॥१६॥ सहस्रं कनकाचलाः ॥१७॥चत्वारिंशद्दिग्गजनगाः ॥ १८ ॥ शतं वक्षारक्ष्माधराः ॥ १९ ॥ षष्ठिर्विभंगनद्यः ॥ २० ॥ षष्ठ्युत्तरशतं विदेहजनपदाः ॥ २१ ॥ पंचदशकर्मभूमयः ॥ २२ ॥ त्रिंशद्भोगभूमयः ॥ २३ ॥ चतुस्त्रिंशद्वर्षधरपर्वताः ॥ २४ ॥ त्रिंशत्सरोवराः ॥ २५ ॥ सप्ततिर्महानद्यः ॥ २६ ॥ विंशतिर्नाभिभूधराः ॥ २७ ॥ सप्तत्यधिकशतं विजयार्धपर्वताः ॥२८॥ वृषभगिरयश्चेति ॥२९॥ देवाश्चतुर्णिकायाः ॥३०॥ भवनवासिनो दशविधाः ॥३१॥ अष्टविधा व्यन्तराः ॥३२॥ पंचविधा ज्योतिष्काः ॥ ३३ ॥ द्वादशविधा वैमानिकाः ॥३४॥ षोडशस्वर्गाः ॥३५॥ नवग्रैवेयकाः ॥३६॥ नवानुदिशाः ॥३७॥ पंचानुत्तराः ॥३८॥ त्रिषष्टिपटलानि॥३९॥ इन्द्रकाणि च ॥४०॥ षोडशोत्तराष्टशतान्वितसप्तसहस्रं श्रेणिबद्धानि ॥४१॥ षट्चत्वारिंशदुत्तरैकशतानीतनवत्यशीतिसहस्रालङ्कृतचतुरशीतिलक्षं प्रकीर्णकानि ॥४२॥ त्रयोविंशत्युत्तरसप्तनवतिसहस्रान्वितचतुरशीतिलक्षमेवं विमानानि ॥४३॥ब्रह्मलोकालयाश्चतुर्विंशतिर्लौकान्तिकाः॥४४॥ अणिमाद्यष्टगुणाः॥४५॥

इति शास्त्रसारसमुच्चये द्वितीयोऽध्यायः ॥२॥

---

अथ पंचलब्धयः ॥१॥ करणं त्रिविधं ॥२॥ सम्यक्त्वं द्विविधम् ॥३॥ त्रिविधम् ॥४॥ दशविधं वा ॥५॥ तत्र वेदकस-

म्यक्त्वस्य पंचविंशतिर्मलानि ॥६॥ अष्टाङ्गानि ॥७॥ अष्टगुणाः ॥८॥ पंचातिचारा इति ॥९॥ एकादशनिलयाः ॥१०॥ त्रिविधो निर्वेगः ॥११॥ सप्त व्यसनानि ॥ १२ ॥ शल्यत्रयम् ॥ १३ ॥ अष्टौ मूलगुणाः ॥१४॥ पंचाणुव्रतानि॥१५॥ त्रीणि गुणव्रतानि ॥१६॥ शिक्षाव्रतानि चत्वारि॥१७॥व्रतशीलेषु पंच पंचातीचाराः ॥१८॥मौनंसमयाः सप्त॥१९॥अन्तरायाणि च॥२०॥श्रावकधर्मश्चतुर्विधः ॥२१॥ जैनाश्रमश्च ॥ २२ ॥ तत्र ब्रह्मचारिणः पंचविधाः ॥ २३ ॥ आर्यकर्माणि षट् ॥ २४ ॥ इज्या दशविधाः ॥२५॥ अर्थोपार्जनकर्माणि षट् ॥२६॥ दत्तिश्चतुर्विधा ॥२७॥ क्षत्रियो द्विविधः ॥२८॥ भिक्षुश्चतुर्विधः ॥२९॥ मुनयस्त्रिविधाः ॥३०॥ ऋषयश्चतुर्विधाः ॥ ३१ ॥ राजर्षयो द्विविधाः ॥ ३२ ॥ ब्रह्मर्षयश्च ॥३३॥ मरणं द्वित्रिचतुःपंचविधं वा ॥ ३४ ॥ तस्य पंचातिचारा इति ॥ ३५ ॥ द्वादशानुप्रेक्षाः ॥ ३६ ॥ यतिधर्मो दशविधः ॥३७॥ अष्टाविंशतिर्मूलगुणाः ॥ ३८ ॥ पंचमहाव्रतस्थैर्यार्थं भावनाः पंच पंच ॥ ३९ ॥ तिस्रो गुप्तयः ॥ ४० ॥ अष्टौ प्रवचनमातृकाः ॥४१॥ द्वाविंशतिपरीषहाः ॥४२॥ द्वादशविधं तपः ॥४३॥ दशविधानि प्रायश्चित्तानि ॥ ४४ ॥ आलोचनं च ॥ ४५ ॥ चतुर्विधो विनयः ॥ ४६ ॥ दशविधानि वैयावृत्यानि ॥ ४७ ॥ पंचविधः स्वाध्यायः ॥ ४८ ॥ द्विविधो व्युत्सर्गः ॥ ४९ ॥ ध्यानं चतुर्विधम् ॥ ५० ॥ आर्त-

---

१ मौनं सप्तस्थानमिति पाठान्तरं क्वचित्। २ अन्तरायाश्चेत्यपि क्वचित्पाठः। ३–४ सूत्रद्वयं कर्णाटवृत्तावेव। ५–६ इमौ शब्दौ कर्णाटटीकायां न स्तः। ७ गुप्तित्रयमितिसूत्रं टीकायां। ८–९ सूत्रद्वयं टीकायामेव।

रौद्रधर्मशुक्लं च ॥ ५१ ॥ धर्म्यं दशविधं वा ॥ ५२ ॥ अष्टर्द्धयः ॥ ५३ ॥ बुद्धिरष्टादशविधा ॥ ५४ ॥ क्रिया द्विविधा ॥ ५५ ॥ विक्रियैकादशविधा ॥ ५६ ॥ तपः सप्तविधम् ॥ ५७ ॥ बलं त्रिविधं ॥ ५८ ॥ भैषजमष्टविधं ॥ ५९ ॥ रसः षड्विधः ॥ ६० ॥ अक्षीणर्द्धिर्द्विविधश्चेति ॥ ६१ ॥ चतुस्त्रिंशदुत्तरगुणाः ॥ ६२ ॥ पंचविधा निर्ग्रन्थाः ॥ ६३ ॥ आचारश्च ॥ ६४ ॥ सामाचारं दशविधं ॥ ६५ ॥ सप्त परमस्थानानि ॥ ६६ ॥

इति शास्त्रसारसमुच्चये तृतीयोऽध्यायः ॥ ३ ॥

---

षड्द्रव्याणि ॥ १ ॥ पंचास्तिकायाः ॥ २ ॥ सप्त तत्वानि ॥ ३ ॥ नव पदार्थाः ॥ ४ ॥ चतुर्विधो न्यासः ॥ ५ ॥ द्विविधं प्रमाणं ॥ ६ ॥ पंच संज्ञानानि ॥ ७ ॥ त्रीण्यज्ञानानि ॥ ८ ॥ मतिज्ञानं षट्त्रिंशदुत्तरत्रिशतभेदम् ॥ ९ ॥ द्विविधं श्रुतज्ञानम् ॥ १० ॥ द्वादशाङ्गानि ॥ ११ ॥ चतुर्दशप्रकीर्णकानि ॥ १२ ॥ त्रिविधमवधिज्ञानम् ॥ १३ ॥ द्विविधं मनःपर्ययज्ञानम् ॥ १४ ॥ केवलमेकमसहायम् ॥ १५ ॥ नव नयाः ॥ १६ ॥ सप्त भङ्गाः इति ॥ १७ ॥ पंच भावाः ॥ १८ ॥ औपशमिको द्विविधः ॥ १९ ॥ क्षायिको नवविधः ॥ २० ॥ अष्टादशविधः क्षायोपशमिकः ॥ २१ ॥ औदयिकमेकविंशतिविधम् ॥ २२ ॥ पारिणामिकं त्रिविधम् ॥ २३ ॥ गुणजीवमार्गणास्थानानि प्रत्येकं चतुर्दश ॥ २४ ॥ षट् पर्याप्तयः ॥ २५ ॥ दश प्राणाः ॥ २६ ॥ चतस्रः संज्ञाः

---

१–२ आर्तं च । रौद्रमपि । धर्मध्यानं चतुर्विधं दशविधं वा । शुक्लध्यानं चतुर्विधं इति पाठः टीकायां । ३-४ सूत्रद्वयं टीकायां । ५ सूत्रमिदं टीकायामधिकं । ६ श्रुतमित्यपि पाठः । ७ सूत्रमिदं टीकायां नास्ति । ८–९–१० सूत्रत्रयं ३० सूत्रतोऽग्रे वर्तते टीकायां ।

॥ २७ ॥ द्विविधमेकेन्द्रियम् ॥ २८ ॥ त्रीणि विकलेन्द्रियाणि ॥ २९ ॥ पंचेन्द्रियं द्विविधम् ॥ ३० ॥ गतिश्चतुर्विधा ॥ ३१ ॥ पंचेन्द्रियाणि ॥ ३२ ॥ षड्जीवनिकायाः ॥३३॥ त्रिविधो योगः ॥ ३४ ॥ पंचदशविधो वा ॥ ३५ ॥ नवविधो वा ॥ ३६ ॥ चत्वारः कषायाः ॥ ३७ ॥ अष्टौ ज्ञानानि ॥३८॥ सप्त संयमाः ॥ ३९ ॥ चत्वारि दर्शनानि ॥४०॥ षड्लेश्याः ॥४१॥ द्विविधं भव्यत्वं ॥४२॥ षड्विधा सम्यक्त्वमार्गणा ॥ ४३ ॥ द्विविधं संज्ञित्वम् ॥ ४४ ॥ आहार्युपयोगश्चेति ॥ ४५ ॥ पुद्गलाकाश-कालास्रवाश्च प्रत्येकं द्विविधम् ॥ ४६ ॥ बन्धहेतवः पंचविधाः ॥ ४७ ॥ बन्धश्चतुर्विधः ॥ ४८ ॥ अष्टौ कर्माणि ॥ ४९ ॥ ज्ञानावरणीयं पंचविधम् ॥ ५० ॥ * दर्शनावरणीयं नवविधम् ॥ ५१ ॥ वेदनीयं द्विविधम् ॥ ५२ ॥ मोहनीयमष्टाविंशतिविधम् ॥ ५३ ॥ आयुश्चतुर्विधम् ॥ ५४ ॥ द्विचत्वारिंशद्विधं नाम ॥५५॥ द्विविधं गोत्रम् ॥५६॥ पंचविधमंतरायम् ॥५७॥ पुण्यं द्विविधं॥५८॥*पापं च ॥५९॥ संवरश्च ॥६०॥ एकादश निर्जराः ॥६१॥ त्रिविधो मोक्षहेतुः ॥६२॥ द्विविधो मोक्षः ॥६३॥ द्वादश सिद्धस्थान[1]द्वाराणि ॥६४॥ अष्टौ सिद्धगुणाः ॥६५॥

इति श्रीशास्त्रसारसमुच्चये चतुर्थोऽध्यायः ॥४॥

---

[2]श्रीमाघनन्दियोगीन्द्रः सिद्धान्ताम्बोधिचन्द्रमाः ।
अचीकरद्विचित्रार्थं शास्त्रसारसमुच्चयम् ॥ १ ॥

इति शास्त्रसारसमुच्चयः ।

---

*एतच्चिन्हमध्यगतः पाठः टीकायामधिकस्तेन मूले एव भवितव्यम्। १ सिद्धस्यानुयोगद्वाराणीति टीकापाठः। २ इयं प्रशस्तिका दौर्बलिजिनदासशास्त्रिणः पुस्तके।

श्रीप्रभाचन्द्रविरचितं

# अर्हत्प्रवचनम् ।

दृष्टं चराचरं येन केवलज्ञानचक्षुषा ।
प्रणम्य महावीरं नैदकान्तं प्रवक्ष्यते ॥ १ ॥

अथाऽतोऽर्हत्प्रवचनं सूत्रं व्याख्यास्यामः । तद्यथा;—

तत्रेमे षड्जीवनिकायाः ॥१॥ पंच महाव्रतानि ॥२॥ पंचाणुव्रतानि ॥३॥ त्रीणि गुणव्रतानि ॥४॥ चत्वारि शिक्षाव्रतानि ॥५॥ तिस्रो गुप्तयः ॥६॥ पंच समितयः ॥७॥ दश धर्मानुभावनाः ॥८॥ षोडशभावनाः ॥९॥ द्वादशानुप्रेक्षाः ॥१०॥ द्वाविंशतिपरीषहाः ॥११॥

इत्यर्हत्प्रवचने प्रथमोऽध्यायः ॥ १ ॥

---

तत्र नव पदार्थाः ॥ १ ॥ सप्त तत्वानि ॥ २ ॥ चतुर्विधो न्यासः ॥ ३ ॥ सप्त नयाः ॥ ४ ॥ चत्वारि प्रमाणानि ॥ ५ ॥ षड् द्रव्याणि ॥६॥ पंचास्तिकायाः ॥७॥ द्विविधो गुणः ॥८॥ पंच ज्ञानानि ॥ ९ ॥ त्रीण्यज्ञानानि ॥ १० ॥ चत्वारि दर्शनानि ॥११॥ द्वादशाङ्गानि ॥१२॥ चतुर्दश पूर्वाणि ॥ १३ ॥ द्विविधं तपः ॥१४॥ द्वादश प्रायश्चित्तानि ॥ १५ ॥ चतुर्विधो विनयः ॥१६॥ दश वैयावृत्यानि ॥१७॥ पंचविधः स्वाध्यायः ॥ १८ ॥ चत्वारि ध्यानानि ॥१९॥ द्विविधो व्युत्सर्गः ॥२०॥

इत्यर्हत्प्रवचने द्वितीयोऽध्यायः ॥ २ ॥

---

त्रिविधः कालः ॥१॥ षड्विधः कालसमयः ॥२॥ त्रिविधो लोकः ॥३॥ अर्धतृतीया द्वीपसमुद्राः ॥ ४ ॥ पंचदश क्षेत्राणि ॥५॥ चतुस्त्रिंशद्वर्षधरपर्वताः ॥६॥ पंचदश कर्मभूमयः ॥७॥ त्रिंशद्भोगभूमयः ॥८॥ सप्ताऽधोभूमयः ॥९॥ सप्तैव महानरकाः ॥१०॥ चतुर्दश कुलकराः ॥११॥ चतुर्विंशतितीर्थकराः ॥१२॥ नव बलदेवाः ॥१३॥ नव वासुदेवाः ॥१४॥ नव प्रतिवासुदेवाः ॥१५॥ एकादश रुद्राः ॥१६॥ द्वादश चक्रवर्तिनः ॥ १७॥ नव निधयः ॥१८॥ चतुर्दश रत्नानि ॥१९॥ द्विविधाः पुद्गलाः॥२०॥

इत्यर्हत्प्रवचने तृतीयोऽध्यायः ॥ ३ ॥

---

देवाश्चतुर्णिकायाः ॥१॥ भवनवासिनो दशविधाः॥२॥ व्यन्तरा अष्टविधाः ॥३॥ ज्योतिष्काः पंचविधाः ॥४॥ द्विविधा वैमानिकाः ॥५॥ द्विविधा कल्पस्थितिः ॥६॥ अहमिन्द्राश्चेति ॥७॥ पंच जीवगतयः ॥८॥ षट् पुद्गलगतयः ॥९॥ अष्टविध आत्मसद्भावः ॥१०॥ पंचविधं शरीरम् ॥११॥ अष्टगुणा ऋद्धिः ॥१२॥ पंचेन्द्रियाणि ॥ १३ ॥ षड्लेश्याः ॥ १४ ॥ द्विविधं शीलम् ॥ १५ ॥

इत्यर्हत्प्रवचने चतुर्थोऽध्यायः ॥ ४ ॥

---

त्रिविधो योगः ॥१॥ चत्वारः कषायाः ॥ २ ॥ त्रयो दोषाः ॥३॥ पंचास्रवाः॥४॥ त्रिविधः संवरः ॥५॥ द्विविधा निर्जरा ॥६॥ पंच लब्धयः ॥७॥ चतुर्विधो बन्धः ॥८॥ पंचविधा बन्धहेतवः

॥९॥ अष्टौ कर्माणि ॥१०॥ द्विविधो मोक्षः ॥११॥ चत्वारो मोक्षहेतवः ॥१२॥ त्रिविधो मोक्षमार्गः ॥१३॥ पंचविधा निर्ग्रन्थाः ॥१४॥ द्वादश सिद्धस्यानुयोगद्वाराणि ॥ १५ ॥ अष्टौ सिद्धगुणाः ॥१६॥ द्विविधाः सिद्धाः ॥ १७ ॥ वैराग्यं चेति १८॥

इत्यर्हत्प्रवचने पंचमोऽध्यायः ॥ ५ ॥

इति प्रभाचन्द्राचार्यविरचितमर्हत्प्रवचनम् ।

# आप्तस्वरूपम् ।

आप्तागमः प्रमाणं स्याद्यथावद्वस्तुसूचकः ।
यस्तु दोषैर्विनिर्मुक्तः सोऽयमाप्तो निरञ्जनः ॥१॥
दोषावरणमुक्तात्मा कृत्स्नं वेत्ति यथास्थितम् ।
सोऽर्हंस्तत्त्वागमं वक्तुं यो मुक्तोऽनृतकारणैः ॥२॥
आगमो ह्याप्तवचनमाप्तं दोषक्षयं विदुः ।
त्यक्तदोषोऽनृतं वाक्यं न ब्रूयादित्यसम्भवात् ॥३॥
रागाद्वा [1]द्वेषमोहाद्वा वाक्यमुच्यते ह्यनृतम् ।
यस्य तु नैव च दोषास्तस्यानृतकारणं नास्ति ? ॥४॥
पूर्वापरविरुद्धादेर्व्यपेतो दोषसंहतेः ।
द्योतकः सर्वभावानामाप्तव्याहृतिरागमः ॥५॥
ध्यानानलप्रतापेन दग्धे मोहेन्धने सति ।
शेषदोषास्ततो ध्वस्ता योगी निष्कल्मषायते ॥६॥
मोहकर्मरिपौ नष्टे सर्वे दोषाश्च विद्रुताः ।
छिन्नमूलतरोर्यद्वद् ध्वस्तं सैन्यमराजवत् ॥७॥
नष्टं छद्मस्थविज्ञानं नष्टं केशादिवर्धनम् ।
नष्टं देहमलं कृत्स्नं नष्टे घातिचतुष्टये ॥८॥
नष्टं मर्यादविज्ञानं नष्टं मानसगोचरम् ।
नष्टं कर्ममलं दुष्टं नष्टो वर्णात्मको ध्वनिः ॥९॥

---

१ द्वेषाद्वा मोहाद्वा पुस्तके-पाठः ।

नष्टाः क्षुत्तृड्भयस्वेदा नष्टं प्रत्येकबोधनम् ।
नष्टं भूमिगतस्पर्शं नष्टं चेन्द्रियजं सुखम् ।।१०।।
नष्टा सद्देहजा छाया नष्टा चेन्द्रियजा प्रभा ।
नष्टा सूर्यप्रभा तत्र सूतेऽनन्तचतुष्टये ।।११।।
तदा स्फटिकसंकाशं तेजोमूर्तिमयं वपुः ।
जायते क्षीणदोषस्य सप्तधातुविवर्जितम् ।।१२।।
सकलग्राहकं ज्ञानं युगपद्दर्शनं तदा ।
अव्याबाधसुखं वीर्यं एतदाप्तस्य लक्षणं ।।१३।।
त्रैलोक्यक्षोभका ह्येते जन्ममृत्युजरादयः ।
ध्वस्ता ध्यानाग्निना येन स आप्तः परिपठ्यते ।।१४।।
क्षुधा तृषा भयं द्वेषो रागो मोहश्च चिन्तनम् ।
जरा रुजा च मृत्युश्च स्वेदः खेदो मदो रतिः ।।१५।।
विस्मयो जननं निद्रा विषादोऽष्टादश ध्रुवाः ।
त्रिजगत्सर्वभूतानां दोषाः साधारणा इमे ।।१६।।

युग्मम् ।

एतैर्दोषैर्विनिर्मुक्तः सोऽयमाप्तो निरञ्जनः ।
विद्यन्ते येषु ते नित्यं तेऽत्र संसारिणः स्मृताः ।।१७।।
संसारो मोहनीयस्तु प्रोच्यतेऽत्र मनीषिभिः ।
संसारिभ्यः परो ह्यात्मा परमात्मेति भाषितः ।।१८।।
सर्वज्ञः सर्वतो भद्रः सर्वदृग्वदनो विभुः ।
सर्वभाषः सदा वन्द्यः सर्वसौख्यात्मको जिनः ।।१९।।
अर्हन् त्रैलोक्यसाम्राज्यं अर्हन् पूजां सुरेशिनाम् ।
हतवान् कर्मसम्भूतं अर्हन्नामा ततः स्मृतः ।। २० ।।

रागद्वेषादयो येन जिताः कर्ममहाभटाः ।
कालचक्रविनिर्मुक्तः स जिनः परिकीर्तितः ॥ २१ ॥
स स्वयम्भूः स्वयं भूतं सज्ज्ञानं यस्य केवलं ।
विश्वस्य ग्राहकं नित्यं युगपद्दर्शनं तदा ॥ २२ ॥
येनाप्तं परमैश्वर्यं[1] परानन्दसुखास्पदम् ।
बोधरूपं कृतार्थोऽसावीश्वरः पटुभिः स्मृतः ॥ २३ ॥
शिवं परमकल्याणं निर्वाणं शान्तमक्षयं ।
प्राप्तं मुक्तिपद येन स शिवः परिकीर्तितः ॥ २४ ॥
जन्ममृत्युजराख्यानि पुराणि ध्यानवन्हिना ।
दग्धानि येन देवेन तं नौमि त्रिपुरान्तकम् ॥ २५ ॥
महामोहादयो दोषा ध्वस्ता येन यदृच्छया ।
महाभवार्णवोत्तीर्णो महादेवः स कीर्तितः ॥ २६ ॥
महत्वादीश्वरत्वाच्च यो महेश्वरतां गतः ।
त्रैधातुकविनिर्मुक्तस्तं वन्दे परमेश्वरम् ॥ २७ ॥
तृतीयज्ञाननेत्रेण त्रैलोक्यं दर्पणायते ।
यस्यानवद्यचेष्टायां स त्रिलोचन उच्यते ॥ २८ ॥
येन दुःखार्णवे घोरे मग्नानां प्राणिनां दया- ।
सौख्यमूलः कृतो धर्मः शंकरः परिकीर्तितः ॥ २९ ॥
रौद्राणि कर्मजालानि शुक्लध्यानोग्रवन्हिना ।
दग्धानि येन रुद्रेण तं तु रुद्रं नमाम्यहम् ॥ ३० ॥
विश्वं हि द्रव्यपर्यायं विश्वं त्रैलोक्यगोचरम् ।
व्याप्तं ज्ञानत्विषा येन स विष्णुर्व्यापको जगत् ॥ ३१ ॥

१ 'सस्त्रिलोचनर......चेतः' पाठोऽयं पुस्तके ।

वासवाद्यैः सुरैः सर्वैः योऽर्च्यते मेरुमस्तके ।
प्राप्तवान् पंचकल्याणं वासुदेवस्ततो हि सः ॥३२॥
अनन्तदर्शनं ज्ञानं कर्मारिक्षयकारणम् ।
यस्यानन्तसुखं वीर्यं सोऽनन्तोऽनन्तसद्गुणः ॥३३॥
सर्वोत्तमगुणैर्युक्तं प्राप्तं सर्वोत्तमं पदम् ।
सर्वभूतहितो यस्मात्तेनासौ पुरुषोत्तमः ॥३४॥
प्राणिनां हितवेदोक्तं ? नैष्ठिकः सङ्गवर्जितः ।
सर्वभाषश्चतुर्वक्त्रो ब्रह्मासौ कामवर्जितः ॥३५॥
यस्य वाक्यामृतं पीत्वा भव्या मुक्तिमुपागताः ।
दत्तं येनाभयं दानं सत्वानां स पितामहः ॥३६॥
यस्य षण्णवमासानि रत्नवृष्टिः प्रवर्षिता ।
शक्रेण भक्तियुक्तेन रत्नगर्भस्ततो हि सः ॥३७॥
मतिश्रुतावधिज्ञानं सहजं यस्य बोधनम् ।
मोक्षमार्गे स्वयं बुद्धस्तेनासौ बुद्धसंज्ञितः ॥३८॥
केवलज्ञानबोधेन बुद्धवान् स जगत्त्रयम् ।
अनन्तज्ञानसंकीर्णं तं तु बुद्धं नमाम्यहम् ॥३९॥
सर्वार्थभाषया सम्यक् सर्वक्लेशप्रघातिनाम् ।
सत्वानां बोधको यस्तु बोधिसत्वस्ततो हि सः ॥४०॥
सर्वद्वन्द्वविनिर्मुक्तं स्थानमात्मस्वभावजम् ।
प्राप्तं परमनिर्वाणं येनासौ सुगतः स्मृतः ॥४१॥
सुप्रभातं सदा यस्य केवलज्ञानरश्मिना ।
लोकालोकप्रकाशेन सोऽस्तु भव्यदिवाकरः ॥४२॥

जन्ममृत्युजरारोगाः प्रदग्धा ध्यानवन्हिना ।
यस्यात्मज्योतिषां राशेः सोऽस्तु वैश्वानरः स्फुटम् ॥४३॥
एवमन्वर्थनामानि सर्वज्ञं सर्वलोचनम् ।
ईडितेनैव ? नामानि वेधोऽन्यत्र विचक्षणैः ॥४४॥
अर्हन् प्रजापतिर्बुद्धः परमेष्ठी जिनो जितः ।
लक्ष्मीभर्त्ता चतुर्वक्त्रो केवलज्ञानलोचनः ॥४५॥
अम्भोजनिलयो ब्रह्मा विष्णुरीशो वृषध्वजः ।
आतपत्रत्रयोद्भासी शंकरो नरकान्तकः ॥ ४६ ॥
निर्मलो निष्कलश्चैव विधाता धर्म एव च ।
परमपापनाशश्च परमज्योतिरव्ययम् ॥ ४७ ॥
योगीश्वरो महायोगी लोकनाथो भवान्तकः ।
विश्वचक्षुर्विभुः शम्भुर्जगच्छिखरिशेखरः ॥ ४८ ॥
लोकाग्रशिखरावासी सर्वलोकशरण्यकः ।
सर्वदेवाधिको देवो ह्यष्टमूर्तिर्दयाध्वजः ॥ ४९ ॥
सद्यो जातो महादेवो देवदेवः सनातनः ।
हिरण्यगर्भः सर्वात्मा पूतः पुण्यः पुनर्भवः ॥ ५० ॥
रत्नसिंहासनाध्यासी नैकचामरवीजितः ।
महामतिर्महातेजोऽकर्मा जन्मध्वान्तकः ॥ ५१ ॥
अच्युतः सुगतो ब्रह्मा लोकान्तो लोकभूषणः ।
देवदुन्दुभिनिर्घोषः सर्वज्ञः सर्वलोचनः ॥ ५२ ॥
अच्छेद्योऽनवभेद्यश्च सूक्ष्मो नित्यो निरञ्जनः ।
अजरो ह्यमरश्चैव शुद्धसिद्धो निरामयः ॥ ५३ ॥

अक्षयो ह्यव्ययः शान्तः शान्तिकल्याणकारकः ।
स्वयंभूर्विश्वदृश्वा च कुशलः पुरुषोत्तमः ॥ ५४ ॥

नामाष्टकसहस्रेण युक्त मोक्षपुरेश्वरं ।
ध्यायेत परमात्मानं मोक्षसौख्यप्रदायकम् ॥ ५५ ॥

शुद्धस्फटिकसंकाशं स्फुरन्तं ज्ञानतेजसा ।
गणैर्द्वादशभिर्युक्तं ध्यायेदर्हन्तमक्षयम् ॥ ५६ ॥

सिंहासनासितच्छत्रचामरादिविभूतिभिः ।
युक्तं मोक्षपुरं देवं ध्यायेन्नित्यमनाकुलम् ॥ ५७ ॥

कल्याणातिशयैराढ्यो नवकेवललब्धिमान् ।
समस्थितो जिनो देवः प्रातिहार्यपतिः स्मृतः ॥ ५८ ॥

सर्वज्ञः सर्वदृक् सार्वो निर्मलो निष्कलोऽव्ययः ।
वीतरागः पराध्येयो योगिनां योगगोचरः ॥ ५९ ॥

सर्वलक्षणसम्पूर्णं निर्मले मणिदर्पणे ।
संक्रान्तबिम्बसादृश्यं शान्तं संचेतयेऽद्भुतम् ॥ ६० ॥

येन जितं भवकारणमत्र
मोहमलं कलिकाममलं च ।
येन कृतं भवमोक्षसुतीर्थं
सोऽस्तु सुखाकरतीर्थसुकर्ता ॥ ६१ ॥

क्षीणचिरन्तनकर्मसमूहो
निष्ठितयोगसमस्तकलापः ।
कोमलदिव्यशरीरसुभासः
सिद्धिगुणाकरसौख्यनिविश ॥ ६२ ॥

निष्कलबोधविशुद्धसुदृष्टिः
पश्यति लोकविभावस्वभावम् ।
सूक्ष्मनिरञ्जनजीवघनो ऽसौ
तं प्रणमामि सदा परमाप्तम् ॥ ६३ ॥

क्षपितदुरितपक्षक्षीणनिःशेषदोषो
भवमरणविमुक्तः केवलज्ञानभानुः ।
परहृदयमतार्थग्राहकज्ञानकर्ता
ह्यमलवचनवक्ता भव्यनम्भुर्जिनाप्तः ॥ ६४ ॥

इतिश्री-आप्तस्वरूपं समाप्तम् ।

श्रीपोमराजसुतश्रीवादिराजप्रणीतं

# ज्ञानलोचनस्तोत्रम् ।

ज्ञानस्य विश्राम्यति तारतम्यं
परप्रकर्षादतिशायनाच्च ।
यस्मिन्न दोषावरणे तुलावद्-
दृष्टेष्टशिष्टोक्तनयप्रकाशे ॥ १ ॥

ध्यात्वा च यं ध्यायति नौति नुत्वा
नत्वा नमत्यत्र परं न लोकः ।
श्रुत्वाऽऽगमान् यस्य शृणोति नान्यान्
श्रीपार्श्वनाथं तमहं स्तवीमि ॥ २ ॥

युग्मम् ।

तृणाय मत्वाखिललोकराज्यं
निर्वेदगाढोऽसि विशुद्धभावैः ।
ध्यानैकतानेन च चेतसाभूः
कैवल्यमासाद्य जिनेश ! मुक्तः ॥ ३ ॥

वरं यथेष्टं वृणुतेऽत्र बर्याऽ-
भिभूय राजन्यकमाशु विश्वम् ।
गुरुं च बुद्धं कपिलं हरादीं-
स्तथा शिवश्रीः सततं भवंतम् ॥ ४ ॥

परैः प्रणीतानि कुशासनानि
दुरंतसंसारनिबंधनानि ।
त्वया तु तान्येव कृतानि संति
तीक्ष्णानि मर्माणि यथा प्रयोगात् ॥५॥

दाता न पाता न च धामधाता
कर्त्ता न हर्त्ता जगतो न भर्त्ता ।
दृश्यो न वश्यो न गुणागुणज्ञो
ध्येयः कथं केन स लक्ष्मणा त्वम् ॥ ६ ॥
दत्से कथं चेद्दृगिनस्त्वमिष्टं
चिंतामणिर्वा भविनां सुभावात् ।
मतं यदीत्थं तव सेवया किं
स्वभाववादो ह्यवितथ्य एव ॥ ७ ॥
संसारकूपं पतितान् सुजंतून्
यो धर्मरज्ज्वुद्धरणेन मुक्तिम् ।
नयत्यनंतावगमादिरूप-
स्तस्मै स्वभावाय नमो नमस्तात् ॥ ८ ॥
रणत्यमोघं सकलो जनस्त्वां
विब्बोकवृंदैरजितं सदा हि ।
पद्मालयापूजितपादयुग्मं
चिंतानवस्थाहरणं पराघ्यम् ॥ ९ ॥
णमो सव्वोसहिपत्ताणं ।

---

भणत्यमोघं सकलक्रियौघ-
मबोधतो देहिगणो न सिद्ध्यै ।
तथा जिनोक्तेरमला गुणास्ते
प्रीणंति भव्यानिह पंचभाद्रैः ॥ १० ॥
णमो सव्वोसहिजिणाणं ।

---

स्थितोऽयमात्मा वपुषि स्थितोऽच्छः
स्यात्कथ्वरः कर्मकलंकपंकैः ।
हेमाश्मवत्स्वर्द्धितत्स्वभाव-
निर्णीक्त तं त्वं जिन ! मुक्तिदोऽतः ॥ ११ ॥

अमित्रमित्रात्मविवर्द्धमान-
द्वेषानुरागाः परमात्ममूढाः ।
हिंसापकारान्यकलत्रसक्ता
व्यामोहभावं न कथं लभंते ॥ १२ ॥

तव स्तुतेरीश ! रसं रसज्ञा
जानाति या नच्छ्वणाच्छ्रुतिः सा ।
तदुत्तमांगं पदयोर्नतं यद्
ध्यायेच्च धीस्त्वां मनुते मनस्तत् ॥ १३ ॥

छन्नोऽजिनेनाग्रसवोऽस्थिभूजो
मेर्धंगतो वृद्धिमिहाज्ञताद्यैः ।
आत्मा द्विजश्चेच्छिखरेऽस्य जल्पे-
त्वद्गोत्रमंत्रं न तदाऽस्य भद्रम् ॥ १४ ॥

प्राणी विवर्त्तातुरतः सुखीह
किमन्यचिंताभिरितीव दृष्ट्वा ।
इभ्यं च निःस्वं सकलं रुजोनं
मनः समाधेयमतस्त्वदुक्त्या ॥ १५ ॥

हित्वांगनापद्धतिमेष शाखी
स्फुटः सदेशे भवतोऽस्त्यशोकः ।

निरीक्ष्य निर्विण्णमिमं विरागोऽ-
भवत्स्वयं भृत्यगतिर्हि सैषा ॥ १६ ॥
खादापतंती सुमनस्ततिः प्रा-
गस्यै जिनं यष्टुमसूययेव ।
त्वया जितेनावपुषेव हीना
निजेषु पंक्तिर्भवतः सभायाम् ॥ १७ ॥
ध्वनिर्ध्वनत्यक्रमवर्णरूपो
नानास्वभावो भुवि श्रुतिचित्ते ।
त्वत्तो न देवैरयमक्षरात्मा
जयत्ययं मेचकवज्जगत्याम् ॥ १८ ॥
प्रकीर्णकौघा मुनिराजहंसा
जिनं नमंतीव मुहुर्मुहुस्त्वाम् ।
चलक्षलेश्यातनया इवामी
बोधाब्धिफेनाः शिवभीरुहासाः ॥ १९ ॥
पीठत्रयं ते व्यवहारनाम
छत्रत्रयं निश्चयनामधेयम् ।
रत्नत्रयं दर्शयतीव मार्गं
मुक्तेस्त्वदग्रेक्षणतः क्षणेन ॥ २० ॥
भामंडले मारकतोपलाभे
निमग्नकायाश्च चतुर्णिकायाः ।
स्नांतीव तीर्थे परमागमाख्ये
देदीप्यमाने स्वदयारसेन ॥ २१ ॥

१ दिवः पतंती इत्यपि पाठः २ पुरस्तात् इत्यपि पाठः ३ स्वदयागुणेनेत्यपि पाठः ।—सम्पादकः ।

घातीनि कर्माणि जितान्यनेन
कालः समागच्छति नो समीपम् ।
इत्थं मुहुर्ज्ञापयतीव लोकान्
दंध्वन्यते दुंदुभिरंतरिक्षे ॥ २२ ॥
क्षुदादयोऽनंतसुखोदयात्तेऽ-
किंचित्करा घातिविघातनाथ ।
सत्त्वोदयाभ्यामविघातिनां किं
तोतुद्यतेंऽगं विविषाहिवत्ते ॥ २३ ॥
नाऽनाम्मि पश्यन् जिन ! नारकादीन्
हतानन्नंतांश्च हनिष्यमाणान् ।
चारित्रभंगात् खगतप्रसंगात्
कल्यानि चात्रातिशयो हि कश्चित् ॥ २४ ॥
लौकांतिकानां त्रिदिवातिगानां
पुंस्त्वोदये सत्यपि नांगनार्तिः ।
तथा ह्यसातोदयतो न पीडा
सामग्र्यभावाच्च फलोदयस्ते ॥ २५ ॥
योऽत्तीह शेते सतृषः सदोषो
मामुह्यते द्वेष्टि विषीदतीश ! ।
इत्येवमष्टादश संति दोषा
यस्मिन्नसौ भूरिभवाब्धिभारः ॥ २६ ॥
अद्वैतवादौघनिषेधकारी
एकांतविश्वासविलासहारी ।
मीमांसकस्त्वं सुगतो गुरुश्च
हिरण्यगर्भः कपिलो जिनोऽपि ॥ २७ ॥

हठेन दुष्टेन शठेन वैरा-
दुपद्रुतस्त्वं कमठेन येन ।
नीलाचलो वा चलितो न योगात्
स एव पद्मापतिनात्तगर्वः ॥ २८ ॥

श्रुत्वाऽनुकंपांकनिधिं शरण्यं
विज्ञापयाम्येष भवार्दितस्त्वाम् ।
अशक्यतायास्तव सद्गुणानां
स्तुतिं विधातुं गणनातिगानाम् ॥ २९ ॥

कुदेववेशंतकदासदास-
कुतत्वजाले भ्रमतो निपत्य ।
मिथ्यामिषं ग्लस्तमिदं भवाब्धा-
वुरे धृतं कौलिशगोलकं वा ॥ ३० ॥

अनाद्यविद्यामयमूर्च्छितांगं
कामोदरक्रोधहुताशतप्तम् ।
स्याद्वादपीयूषमहौषधेन त्रायस्व
मां मोहमहाहिदष्टम् ॥ ३१ ॥

हिंसाऽक्षमादिव्यसनप्रमाद-
कषायमिथ्यात्वकुबुद्धिपाशम् ।
व्रतच्युतं मां गुणदर्शनोनं
पातुं क्षमः को भुवने विना त्वाम् ॥ ३२ ॥

पुरार्चितं नो तव पादयुग्मं
मया त्रिशुद्ध्याऽखिलसौख्यदायि ।

परात्मयातिथ्यपरैधितत्व-
पात्रं हि गात्रं वरिवर्ति मेऽथ ॥ ३३ ॥
क्रोधाख्यहर्यक्षगृहीतकंठो
हतोऽस्मि मानाद्रिविचूर्णितांगः ।
मायाकुजायात्तसुकेशपाशो
लोभाह्वपंकौघनिमग्नमूर्तिः ॥ ३४ ॥
तारुण्यबाल्यांत्यदशासु किंचि-
त्कृतं मया नो सुकृतं कदापि ।
जानन्नपीत्थं तु तथैव वर्ते
जाग्रच्छयालुः करणानि किं वा ॥ ३५ ॥
दानं न तीर्थं न तपो जपश्च
नाध्यात्मचिंता न च पूज्यपूजा ।
श्रुतं श्रुतं न स्वपरोपकारि
हा ! हारितं नाथ ! जनुर्निरर्थम् ॥ ३६ ॥
भोगाशया भ्रांतमलं श्ववृन्त्या
धराधिपध्यानधरेण धान्याम् ।
अपास्य रुक्मं मयकारकूटं
गृहीतमज्ञानवशादधीश ! ॥ ३७ ॥
पंचास्यनागीहवसिंधुदावा-
रणज्वराद्यादिभवं भयं द्राक् ।
त्वद्गोत्रमंत्रस्मरणप्रभावा-
न्मित्रोदयाद्ध्वांतमिव प्रणश्येत् ॥ ३८ ॥
यतोऽरुचिः संसृतिदेहभोगा-
दनारतं मित्रकलत्रवर्गात् ।

आकृष्य चित्तं स्मरणात्त्वदीया-
नयंति कर्माणि पदं तदेव ॥ ३९ ॥
नाट्यं कृतं भूरिभवैरनंतं
कालं मया नाथ ! विचित्रवेषैः ।
हृष्टोऽसि दृष्ट्वा यदि देहि देयं
तदन्यथा चेदिह तद्धि वार्यम् ॥ ४० ॥
श्रद्धालुता मे यदनंगरंगे
कृपालुताऽभून्मम पापवर्गे ।
निद्रालुता शान्तरसप्रसंगे
तंद्रालुताध्यात्मविचारमार्गे ॥ ४१ ॥
भ्रांत्वा चिरं दैववशेन विश्वा
त्वदुक्तिभूः साधुपदार्थगर्भा ।
परैरगम्या नयरत्नशाला
तस्यां कुतो दुःखमहो स्थितानाम् ॥ ४२ ॥
हिताहितेऽर्थेऽथ हेतिहिता च ?
चिदात्मनो धर्मविचारहीना ।
अजात्तपाणीय ? मिवोद्गहंती
मतिर्मदीया जिननाथ ! नष्टा ॥४३॥
यद्यस्त्यनंतं त्वयि दर्शनं मे
तदेव दद्यादणुमात्रमद्य ।
ज्ञानं सुखं वीर्यमतोऽधिकं चे-
द्दद्यात्तदा को जिन ! दूरवर्ती ॥ ४४ ॥

---

१ 'अजाकृपाणीयमिवो' इति सुभाति ।

हिरुक् सुखहिरिद्रियं न हि भवेत्तमस्यादिकं
पृथक् तदथ नो वृषो न तमृते सदर्थागमः ।
इति प्रतिदिनं विभो! चरणवीक्षणं कामये
ततः कुरु कृपानिधे! सपदि लोचनानंदनम् ॥४५॥

स्तोत्रं कृतं परमदेवगुरुप्रसादा–
च्छ्रीपोमराजतनयेन सुवादिराजा ।
सज्ज्ञानलोचनमिदं पठतां मुदे स्यात्
दृग्दोषहारि जगतः परमोपकारि ॥४६॥

इति श्रीपोमराजतनयवादिराजविरचितं ज्ञानलोचनस्तोत्रम्
समाप्तिमगमत् ।

विष्णुसेनविरचितं

# समवशरणस्तोत्रम् ।

आर्या ।

वृषभाद्यानभिवंद्यान् वंदित्वा वीरपश्चिमांजिनेंद्रान् ।
भक्त्या नतोत्तमांगः स्तोष्ये तत्समवशरणानि ॥१॥
भूम्याः पंचसहस्रान् दंडानुत्क्रम्य समवशरणानाम् ।
जायंते गगनगताः सद्वृत्तैकेन्द्रनीलशिलाः ॥ २ ॥
द्वादशयोजनतस्ताः क्रमेण चार्द्धार्द्धयोजनन्यूनाः ।
तावद्यावन्नेमिश्चतुर्थभागोनिताः परतः ॥३॥
अवसर्पिण्यामेवं क्रमोऽन्यथोत्सर्पिण्यांक्रमो ज्ञेयः ।
आद्या विदेहजानां मतांतराद्विश्वतीर्थेशाम् ॥४॥
दिक्षु चतसृष्वपि भुजप्रमाणविंशतिसहस्रसोपानाः ।
एकादशभूमीकाः शीलचतुष्काश्च पंचवेदीकाः ॥५॥
प्रासादचैत्यखातीवल्ल्युपवनकेतवश्च कल्पतरुः ।
भवनं गणास्त्रिपीठान्याद्यादीन्यवनिनामानि ॥६॥
एकैकं जिनभवनं प्रासादान् पंच पंच चोल्लंघ्य ।
त्र्यस्राद्याः स्युर्वाप्यो वनखंडान्याद्यभूमितले ॥७॥
स्वच्छजलेनापूर्णं नानाविधजलचरैश्च संकीर्णम् ।
सोपानशोभिततटं प्रोत्फुल्लाब्जावृताखातम् ॥ ८ ॥
पुंनागनागकुब्जकवरशतपत्रातिमुक्तकाकलितो ।
सामरमिथुनलतालययुता तृतीयाऽवनी रम्या ॥९॥

उक्तं च;—

गाथा ।

उववणवाविजलोण सित्ता पिच्छंति क्यभवजादिं ।
तस्स णिरिक्खणमेत्ते सत्तभवातीदभाविजादाओ ॥ १ ॥ १

आर्या ।

वनभूरशोकसप्तच्छदचंपकचूतमद्भुतैर्भाति ।
क्रीडाद्रिचैत्यतरुयुक्प्रदक्षिणस्थैश्चतुर्दिक्षु ॥१०॥
सिंहगजवृषभबर्हिणमालांबरहंसपद्मचक्रांकाः ।
गरुडैर्ध्वजाश्च दशधेत्येकैकेप्यष्टशतसंख्याः ॥११॥
एतैश्चतुर्दिशास्थैश्चतुर्गुणैर्मुख्यकेतुभिर्भाति ।
साष्टशतेनाभिहतैर्मुख्यैः क्षुद्रध्वजैश्चान्यैः ॥ १२ ॥

चतुर्दिक्षु मुख्यध्वजसंख्या ४३२० । परिवारध्वजसंख्या ४६६५६० । सर्वध्वजसंख्या ४७०८८० ।

सर्वेषां स्तंभानां रुंद्रत्वमशीतिरंगुलान्यष्टौ ।
इष्वासनपंचकृतिरत्वंतरमाद्यो तु हानिरपरेषु ॥ १३ ॥

मुख्यध्वजस्तंभानां रुंद्रत्वमंगुलानि ८८ । मुख्यध्वजस्तंभांतरं धनुः २५ ।

हेमांदालकशबलैर्दशविधकल्पैश्च सिद्धतरुमिश्रैः ।
सुरखरनिकरसनाथैश्चकास्ति कल्पद्रुमा वसुधा ॥ १४ ॥

अनुष्टुप्छंदः ।

मृदंगभृंगरत्नांगाः पानभोजनपुष्पदाः ।
ज्योतिरालयवस्त्रांगा दीपांगैर्दशधा द्रुमाः ॥१५॥

आर्यावृत्तम् ।

सालत्रयमध्यस्थितपीठत्रयवर्तिचैत्यसिद्धतरू ।
जिनसिद्धप्रतिबिंबैरधःस्थितनिषण्णकैर्भातः ॥ १६ ॥

नृत्यद्भिर्गायद्भिर्जिनाभिषकोद्यतैरशेषसुरैः ।
बहुधेद्धप्रासादा भवंति भवनावनौ रम्याः ॥ १७ ॥
स्फाटिकशालस्यांतर्लक्ष्मीवरमंडपे गणक्ष्मायाम् ।
द्वादश कोष्ठाः स्फाटिकषोडशगुरुभित्तिभि र्भान्ति ॥ १८ ॥
ऋषिकल्पजवनितार्याज्योतिर्वनभवनयुवतिभावनजाः ।
ज्योतिष्ककल्पदेवा नरतिर्यंचो वसंति तेष्वनुपूर्वम् ॥ १९ ॥
वैडूर्योत्तमकांचनविलसद्वरसकलरत्नवर्णानि ।
अष्टचतुश्चतुरिष्वासोन्नतिर्भंति त्रिपीठानि ॥ २० ॥
प्रस्फुरितधर्मचक्रैर्यक्षपतिभिरुद्धृतैर्महाभक्त्या ।
चतुराशासु विराजति कृतार्चनं प्रथमपीठतलम् ॥ २१ ॥
अरिगजवृषहरिकमलांबरध्वजखगपतिपुष्पमालाख्यैः ।
विलसत्केतुभिरष्टभिरनुपमपूज्यं द्वितीयपीठतलम् ॥ २२ ॥
षट्शतरुंद्रायामा साधिकनवशतधनुःसमुत्तुंगा ।
प्रथमे शेषेषुना गंधकुटी स्यात्तृतीयपीठतले ॥ २३ ॥
रुंद्रत्वे ६०० । उदये ९०० ।

तन्मध्यस्थितसिंहासनमध्ये शोणमंबुजं रमणीयम् ।
दशशतदलसंयुक्तं तन्मध्ये कनककर्णिकायामुपरि ॥२४॥
चतुरंगुलगगनतले निविष्टवान् विमलकेवलज्ञानी ।
लोकालोकविलोकी धर्माधर्मौ जिनो वक्ति ॥२५॥
प्रहतघनघातिदोषश्चतुरधिकत्रिंशदतिशयैश्वर्ययुतः ।
सोऽनंतचतुष्टयभाक्कोट्यादित्यप्रकाशसंकाशवपुः ॥ २६ ॥
क्षुत्तृड्भयरुड्रागप्रमोहचिंता जरा रुजा मृत्युः ।
स्वेदः खेदमदोरतिविस्मयनिद्राजन्मोद्वेगः ॥२७॥

छत्रत्रयसिंहासनसुरदुंदुभिपुष्पवृष्टिभाषाशोकाः ।
भावलयचामराणीत्यष्टमहाप्रातिहार्यविभवसमेतः ॥२८॥

उक्तं च,—

पुव्वण्हे मज्झण्हे अवरण्हे मज्झिमाय रत्तीए ।
छच्छघडियाणिग्गयदिव्वज्झुणी कहइ सुत्तत्थे ॥ १ ॥

शार्दूलविक्रीडितवृत्तम् ।

गंभीरं मधुरं मनोहरतरं दोषैरपेतं हितं
कंठौष्ठादिवचोनिमित्तरहितं नो वातरोधोद्गतम् ।
स्पष्टं तत्तदभीष्टवस्तुकथकं निःशेषभाषात्मकं
दूरासन्नसमं समं निरुपमं जैनं वचः पातु नः ॥२९॥
यत्सर्वात्महितं न वर्णसहितं न स्पंदितौष्ठद्वयं
नो वांछाकलितं न दोषमलिनं न श्वासरुद्धक्रमम् ।
शातामर्षविषैः समं पशुगणैराकर्णितं कर्णिभि-
स्तन्नः सर्वविदः प्रणष्टविपदः पायादपूर्वं वचः॥३०॥

आर्या ।

खस्वचतुर्विंशांशो द्वयोश्चतुर्षु द्विताडितार्द्धं च ।
अर्द्धं त्रित्रिद्व्यष्टमभागाः पंचसु तथा परेऽर्द्धं च ॥३१॥
सालो वेदी वेदी सालो वेदी च..........सालो ।
वेदीत्यंतर्भवंति.........सर्वे बहिर्भागात् ॥३२॥
इंद्रधनुर्हैमे द्वे सुरक्तहैमे च हैमकार्जुनके ।
हैमी चार्कमयी सालो वेदी यथायोग्यम् ॥३३॥
धनुषः शतानि पंचाद्यो पंचाशद्दशैव पंचोनाः ।
अष्टसु पंचस्वष्टसु करस्य नव सप्त पार्श्वसन्मत्योः ॥३४॥

तीर्थंकरोत्सेधो यथा ५००, ४५०, ४००, ३५०, ३००, २५०, २००, १५०, १००, ९०, ८०, ७०, ६०, ५०, ४५, ४०, ३५, ३०, २५, २०, १५, १०, रत्नयः ९, ७ ।

चतुराहतजिनदैर्घ्यं वेदीसालेषु [illegible] ।
किंचित्साभ्यधिकं तत्तोरणतुंगत्वमुद्दतम् ॥३५॥
चर्याट्टालकभवनैः केतुभिराभांति वेदिकाः सालाः ।
मूला मूलात्क्रमपरिहान्या रहितेतरमूर्त्तयः क्रमशः ॥३६
द्वयो ? रजतस्य महाहरिन्मणिगणस्य गोपुरद्वारम् ।
एकं पट्ट च स्युर्द्वे नानामाणिक्यरचितानि ॥ ३७ ॥
ध्वजमानस्तंभाचलचैत्यप्रासादगोपुरस्तूपाः ।
द्वादशगुणजिनदैर्घ्या मंडपसिद्धार्थचैत्यसदशोकाः ॥३८
क्रोशव्यासाः प्रथमे न्यूनाश्चावीरतश्चतुर्वीथ्याः ।
बहिरंतः सालांतरदैर्घ्योभयदिक्र ? स्फाटिका साला॥३९॥
द्वारेषु त्रिषु दंडान् ज्योतिष्कान् बिभ्रति द्वयोर्यक्षाः ।
नागास्तद्द्वितयस्था द्वयोश्च कल्पामराः प्रवराः ॥ ४० ॥
मध्ये गोपुरमंतर्वीथ्याः स्तंभो नभो द्विराभाति ।
नर्त्तनसालो शून्यं सालास्तूपा नभश्चरमम् ॥ ४१ ॥
मानस्तंभाश्चोपरि सालत्रयमध्यगत्रिपीठानाम् ।
कुंडाष्टकसंयुक्ताश्चतुर्ह्रदाः संति चतुराशम् ॥ ४२ ॥
अस्त्रविमिश्रा मूलादुपरिष्टाद्वर्तुलाश्चतुर्दिक्कम् ।
मूर्ध्निस्थितजिनबिंबा ह्रदाभिधानान्यतो वक्ष्ये ॥ ४३ ॥
नंदोत्तरा च नंदा नंदवती नंदघोषनामा च ।
विजया च वैजयंती जयंतसंज्ञाऽपराजिताख्या च ॥४४॥

शोका सुप्रतिबुद्धा कुमुदान्या पुंडरीकनामा च।
हृदयानंदा च महानंदाख्या सुप्रतिबुद्धनामा च ॥ ४५ ॥
षोडश पूर्णा वापी प्रभंकनामा ततः परमरम्या।
आसां संपदमखिलां स्तोतुं शक्रो न शक्नोति ॥ ४६ ॥
धवलोत्तुंगत्रिभूमिसाले नृत्यस्य राजते द्वे द्वे।
वीथ्याः पार्श्वद्वितये धूपघटौ द्वौ च चतुरास्त्रौ ॥ ४७ ॥
द्वात्रिंशत्प्रेक्षणिकान्येकैकस्यां भवंति पृथुभूम्याम्।
एकैकप्रेक्षणिके द्वात्रिंशद्देवकन्याः स्युः ॥ ४८ ॥
अर्हत्प्रतिमाकीर्णाः स्तूपा नव नव भवंति चाभ्यर्च्याः।
अंतरिताः शतसंख्यै रत्नानां तोरणैरमलैः ॥ ४९ ॥
बाह्याभ्यंतरदेशे षट्त्रिंशद्गोपुरात्मनां संति।
द्वारोभयभागस्था मंगलनिधयः समस्तास्तु ॥ ५० ॥
संघाटकभृंगारच्छत्राब्दव्यजनशुक्तिचामरकलशाः।
मंगलमष्टविधं स्यादेकैकस्याष्टशतसंख्याः ॥५१॥
प्रत्येकं साष्टशते ताः कालमहाकालपांडुमाणवशंखाः।
नैसर्पपद्मपिंगलनानारत्नाश्च नव निधयः ॥५२॥
ऋतुयोग्यवस्तुभाजनधान्यायुधतूर्यहर्म्यवस्त्राणि।
आभरणरत्ननिकरान् क्रमेण निधयः प्रयच्छंति ॥५३॥
शतमकरतोरणाद्या धूलीसालस्य बाह्यभागाः स्युः।
अंतर्भागाः सर्वे प्रत्येकं रत्नतोरणशतास्तु ॥५४॥
प्राच्यां दिशि विजयाख्यं द्वारमपाच्यां च वैजयंताख्यम्।
प्रत्यक्ककुभि जयंतं स्यादपराजितमथोदीच्याम् ॥५५॥
यद्यप्यसंख्यगुणितक्षेत्रफलास्तत्र भव्यजीवाः स्युः।
जिनभक्तेः स्थितवंतस्तथापि निःशेषतः सर्वे ॥५६॥

संख्यातयोजनेऽपि प्रवेशनिर्गमयुजोऽत्र भव्याः स्युः ।
अंतर्मुहूर्त्तमात्रा जिनमाहात्म्येन वृद्धाद्याः ॥५७॥
मिथ्यादृष्टिरभव्योऽसंज्ञी जीवोऽत्र विद्यते नैव ।
पंश्चानध्यवसायो यः संदिग्धो विपर्यस्तः ॥५८॥
तत्र न मृत्युर्जन्म च विद्वेषो न च मन्मथोन्मादः ।
रोगांतकबुभुक्षाः पीडा च न विद्यते कापि ॥५९॥

अनुष्टुप्वृत्तम् ।

अंधाः पश्यंति रूपाणि शृण्वंति बधिराः श्रुतिम् ।
मूकाः स्पष्टं विभाषंते चंक्रम्यंते च पंगवः ॥६०॥

आर्यावृत्तम् ।

यः स्तुत्यैवं ध्यायति समवशरणजिनेश्वरं देवम् ।
तस्यैष भवति विभवः कतिपयदिवसैर्न संदेहः ॥६१॥
चत्वारिंशद्भवने द्वात्रिंशद्व्यंतरविमानेषु ।
चतुरधिकविंशतिश्चंद्राकौं सिंहोऽथ चक्रवर्तीन्द्राः ॥६२॥

कर्तुः प्रशस्तिः ।

शक्राज्ञया स्वभक्त्या धनदेवविनिर्मितं समवशरणम् ।
व्यावर्णितं त्रिविद्याधिगणिना विष्णुसेनेन ॥६३॥

इति श्रीविष्णुसेनविरचितं समवशरणस्तोत्रं
समाप्तम् ।

---

१ 'पश्चानध्यवसायो' इति पाठः श्रेयानवभाति ।

जयानंदसूरिविरचितं

# सर्वज्ञस्तवनम् ।

सटीकं ।

**देवाः प्रभो ! यं विधिनात्मशुद्धयै**
**भक्त्याः सुमेरोः शिखरेऽभ्यषिंचन् ।**
**संस्तूयसे त्वं स मया समोद-**
**मुन्मील्यते ज्ञानदृशा यथा मे ॥ १ ॥**

टीका—देवा इति—गीर्वाणभाषयार्थोच्चारणमन्वयस्तमन्वयं वाणारस्यां भद्रापदव्यव्याख्यानावसरे कथयंति स आदौ कथ्यते——यथा हे प्रभो ! त्वां देवा विधिनात्मशुद्धयै भक्त्याः शक्तिसकाशात् सुमेरोः शिखरेऽभ्यषिंचन्नस्नपयन् जन्मोत्सवमकार्षुः स त्वं मया समोदं सहर्षं यथा स्यात्तथा संस्तूयसे यथा मे ज्ञानदृशोन्मील्यत इत्यन्वयः । अभिपूर्वषिचीत् क्षरणे "ह्यस्तनी" अन् तुदादेशः "मुचादितृफगुफेति" नोऽन्तः अभ्यषिंचन् इयं कर्तृयुक्तिः । सम्पूर्वष्टुञ् स्तुतौ "षः सो" इति स्तुनिमित्तस्य षस्याभावान्नैमित्तिकस्य टस्याप्यभावः "निमित्ताभावे नैमित्तिकस्याप्यभावः" इति न्यायात् । "तत्साप्यानाप्यैति" कर्मणि वर्त्तमानात् क्यप्रत्ययः । "दीर्घश्च्वियङ्ति" दीर्घत्वं संस्तूयसे इति कर्मण्युक्तिः । उत्पूर्वकमील निमेषणे भावे आत्मनेपदं शेषं पूर्ववत् इयं भावे उक्तिः । अत्र काव्ये सप्त विभक्तयस्तिस्र उक्तयः संबोधनं क्रियाविशेषणं च कथितानि । ग्रंथांतरेऽष्टौ उक्तयस्ता अपि अधिकारात् कथ्यंते । यथा;—

**एककर्मा द्विकर्मा चाकर्मा कर्त्तरि कर्मणि ।**
**कर्मकर्त्तरि भावे च उक्तयोऽष्टविधाः स्मृताः ॥ १ ॥**

अस्य व्याख्या—यथा श्राद्धा देवान् पूजयंति इयं एककर्मा १ मित्रोऽजां ग्रामं नयति इयं द्विकर्मा २ देवदत्तः शेते इयमकर्मा ३ एतत् प्रकारत्रयं कर्त्तरि। अथ प्रकारत्रयं कर्मणि, यथा श्राद्धैर्देवाः पूज्यंते ४ मित्रेण अजा ग्रामं नीयते ५ देवदत्तेन शय्यते ६ आरोहंते हस्तिनं हस्तिपकास्तानारोहंतो हस्ती प्रयुंक्ते आरोहं(हयं)ते हस्तिनं हस्तिपकान् ७ वर्षासु मेघो गर्जति मयूरो नृत्यति ८ इत्यष्टप्रकारा उक्तयो ज्ञेयाः ॥१॥

**ध्यानानुकंपाधृतयः प्रधानो-**
**ल्लासिस्थिराः ज्ञानसुखक्षमं च।**
**सुनाथ! संति त्वयि सिद्धिसौधा-**
**धिरूढ! कर्मोज्झित! विश्वरुच्य! ॥२॥**

टीका—हे सुनाथ! हे सिद्धिसौधाधिरूढ! हे कर्मोज्झित! हे विश्वरुच्य! त्वयि प्रधानोल्लासिस्थिराः ध्यानानुकंपाधृतयः संति वर्त्तंते, च पुनः ज्ञानसुखक्षमं अस्ति इत्यन्वयः। ध्यानं च अनुकंपा च धृतिश्च ध्यानानुकंपाधृतयः, अत्र केवलविशेष्यैरितरेतरद्वंद्वः कथितः। प्रधानं च उल्लासिनी च स्थिरा च प्रधानोल्लासिस्थिराः अयं केवलविशेषणैः स एव प्रधानादीनि ध्यानादीनां विशेषणानि। ज्ञानं च सुखं च क्षमा च ज्ञानसुखक्षमं अयं समाहारद्वंद्वः, पूर्वार्द्धेन द्वंद्वः कथितः। शोभनश्चासौ नाथश्च सुनाथः संबुद्धौ सुनाथ! अत्र प्रथमातत्पुरुषः कथितः। सौधमधिरूढः सौधाधिरूढः सिद्धिरेव सौधाधिरूढः सिद्धिसौधाधिरूढः, अत्र द्वितीयातत्पुरुषः। कर्मभिरुज्झितः, अत्र तृतीयातत्पुरुषः। विश्वस्मै रुच्यः, अत्र चतुर्थीतत्पुरुषः कथितः। पंचमीतत्पुरुषषष्ठीतत्पुरुषसमासौ वक्ष्यमाणश्लोकपूर्वार्द्धेन ज्ञेयौ ॥ २ ॥

संसारभीतं जगदीश ! दीनं
मां रक्ष रक्षाक्षम ! रक्षणीयम् ।
प्रौढप्रसादं कुरु सौम्यदृष्ट्या
विलोकय स्वीयवचश्च देहि ॥ ३ ॥

टीका—संसाराद्भीतः संसारभीतः, अत्र पंचमीसमासः, जगतामीशो जगदीशः, अत्र षष्ठीतत्पुरुषसमासः । एवं तत्पुरुषसमासः संपूर्णः । प्रौढश्चासौ प्रसादश्च प्रौढप्रसादस्तं प्रौढप्रसादं, अत्र पुंसि कर्मधारयः, सौम्या चासौ दृष्टिश्चेति सौम्यदृष्टिस्तयेति स्त्रियां कर्मधारयः, स्वीयं च तद्वचश्चेति स्वीयवचः, इत्यत्र क्लीबे कर्मधारयसमासः, एवं कर्मधारयसमासः संपूर्णः । हे जगदीश ! हे रक्षाक्षम ! संसारभीतं दीनं रक्षणीयं मां त्वं रक्ष प्रौढप्रसादं त्वं कुरु, सौम्यदृष्ट्या मां विलोकय, च पुनर्मम स्वीयवचो देहि इति ॥ ३ ॥

वक्ष्यमाणश्लोकेन बहुव्रीहिसमासं प्रतिपादयन्नाह,—

नतेंद्र ! विद्रावितदोष ! दत्त-
दाना दरिद्रा अपि वीतदौःस्थ्याः ।
त्वया कृता भूरिधना अनंत-
ज्ञान ! द्विषान् सक्षम ! मंक्षु मासान् ॥ ४ ॥

टीका—हे नतेंद्र ! हे विद्रावितदोष ! हे अनंतज्ञान ! हे सक्षम ! त्वया दरिद्रा अपि लोका इत्यध्याहार्यः दत्तदाना वीतदौःस्थ्या भूरिधना द्विषान् द्वादश मासान् यावत् इत्यध्याहार्यं मंक्षु शीघ्रं यथा स्यात्तथा

१ रक्षायां क्षमो रक्षाक्षमः तत्सम्बुद्धौ हे रक्षाक्षम ! इति सप्तमी तत्पुरुषोऽपि ज्ञेयः ।—संशोधकः

कृता इत्यन्वयः। हे नतेंद्र ! नता इंद्रा यं इति नतेंद्र इति द्वितीयाबहुव्रीहिः १ विद्राविता दोषा येन स विद्रावितदोषस्तत्संबुद्धवित्यत्र तृतीयाबहुव्रीहिः २ दत्तं दानं येभ्यस्ते दत्तदाना इत्यत्र चतुर्थीबहुव्रीहिः ३ वीतं दौःस्थ्यं येभ्यस्ते वीतदौःस्थ्या इत्यत्र पंचमीबहुव्रीहिः ४ भूरि धनं यषां ते भूरिधना इत्यत्र षष्ठीबहुव्रीहिः ५ अनंतं ज्ञानं यस्मिन्नयं अनंतज्ञानस्तत्संबुद्धावित्यत्र सप्तमीबहुव्रीहिः ६ सह क्षमया वर्त्तते यः स सक्षम इत्यत्र सह पूर्वेण बहुव्रीहिः ७ । द्वि षट् द्विषाः "प्रमाणीसंख्याड्डः" इति सूत्रेण डप्रत्यय इति "सुज्वार्थे संख्या संख्यया संख्येये बहुव्रीहिः" समासो भवति इति सूत्रेण द्वादशार्थे बहुव्रीहिरष्टमो भेदः ८ इति ॥४॥

वक्ष्यमाणपद्येन अवशिष्टबहुव्रीहिं द्विगुं च प्रतिपादयन्नाह;—

**द्वित्रैर्भवैर्मुक्तिमना द्विपाद्या-**
**स्तव त्रिपूजां विदधत् त्रिसंध्यम् ॥**
**कल्याणकानां जिन ! पंचपर्वी-**
**माराध्य भव्यः क्षिपतेऽष्टकर्म ॥ ५ ॥**

टीका—द्वौ वा त्रयो वा द्वित्राः, "प्रमाणीसंख्याड्डः" इति अयं नवमो भेदः सुज्वार्थेति सूत्रेण विकल्पार्थः समासः ९ । प्रधानपदयोरपि यच्छब्देन बहुव्रीहिः समासो भवति यथा मुक्तौ मनो यस्य स मुक्तिमना इति दशमो भेदः बहुव्रीहिः १० । अथ द्विगुसमासः हे जिन ! तव द्विपाद्यास्त्रिपूजां विदधत् कल्याणकानां पंचपर्वीमाराध्य द्वित्रैर्भवैर्मुक्तिमना भव्यो अष्टकर्म क्षिपते इत्यन्वयः। द्वयोः पादयोः समाहारः द्विपादी तस्या द्विपाद्याः द्विपादीति "द्विगो"रिकारांतत्त्वान्नित्यं ङीः स्यात् । त्रिपूजां त्रिसंध्यमित्यादौ पंचपर्वी अष्टकर्म इत्यादौ "द्विगौ अनंतात्रंताभ्यां" विकल्पेन ङीः अन्यस्तु सर्वो नपुंसक इति वचनाच्छेषे सर्वे स्वरांते

व्यंजनांते च नपुंसके ज्ञेयं । क्षिपत इत्यत्र प्रेरणफलवति कर्त्तर्यात्मनेपदं तुदादेशः, अष्टकर्मक्षयान्मुक्तिप्राप्तिफलं । विदधदित्यत्र विपूर्वधाग् धातुः, शतृप्रत्यये द्वित्वे नौते च अंतो नो लुगिति नलोपे विदधदिति सिद्धम् ॥ ५ ॥

**साम्येन पश्यंस्त्रिजगद्विवेकी**
**श्रयन् प्रभो ! पंचसमित्युपैति ।**
**अपास्य सप्तभ्यधिसिद्धिमध्ये**
**सिद्धं जवेनोपभवादुपेशम् ॥ ६ ॥**

टीका—हे प्रभो ! साम्येन त्रिजगत् पश्यन्, एवं पंचसमिति श्रयन् सप्तभि अपास्य विवेकी नर उपभवान्(त्) अधिसिद्धिमध्ये सिद्धं उपेशं यथा स्यात्तथा जवेन वेगेन उपैति गच्छतीत्यर्थ इत्यन्वयः । शेषं स्व-रांतं व्यंजनांतं क्लीबे ज्ञेयमिति वचनात् त्रयाणां जगतां समाहारस्त्रिजगत् पंचानां समितीनां समाहारः पंचसमिति, सप्तानां भीनां समाहारः सप्तभि इत्यादौ सर्वत्र क्लीबत्वे ततः क्लीबे न्हस्वः । अनतो लुबीति द्वितीया-ल्लोपः सिद्धः । अधिसिद्धिमध्ये, ईशस्य समीपं उपेशं वीतरागसमीपं इत्यर्थः अत्र "विभक्तिसमीपसमृद्धि" इत्यादिसूत्रेणाव्ययीभावः । सिद्धीनां मध्ये मध्येसिद्धिरित्यत्र "पारे मध्येंतः षष्ठी चेति" षष्ठीसमासः । उदाहरणत्रयेऽपि क्रियाविशेषणात् । अथवा विवक्षातः कारकाणीति न्यायादुदाहरणत्रये सप्तमी कर्म वा अव्ययादिति विभक्तीनां लोपः । आका-रांताव्ययीभावस्यातः पंचमीवर्जविभक्तिनामम् स्यात् तदुदाहरणं उपेशं इति ज्ञेयं पंचमीवर्जनादुपभवानि (दिति) प्रत्युदाहरणं चेति ॥ ६ ॥

**भवेच्छुभायोपभवद्यथेष्टं,**
**श्रये सनाथोऽस्मि नमोऽस्तु दोषाः ।**
**दूरे प्रभावश्च गुरुः सुखं मे**
**विश्वार्च्य ! धीश्रीकृदुपद्विपादे ॥ ७ ॥**

टीका—हे विश्वार्च्यधीश्रीकृदुपद्विपादे ! भवतः समीपमुपभवत् शुभाय भवेत् १ उपभवद्ध्येयं श्रये २ उपभवदहं सनाथोऽस्मि भवत्समीपेनाहं स्वामिवानहमस्मीत्यर्थः ३ उपभवन्नमोऽस्तु ४ उपभवद्दोषा दूरे संतु ५ उपभवत्प्रभावो गुरुरस्ति ६ च पुनरुपभवद्भवत्समीपे सुखमस्तीत्यन्वयः ७ अत्र अन्त्यस्वरांतव्यंजनांतेभ्यः सप्तविभक्तीनामनुक्रमेण लोपस्योदाहरणानि ज्ञातव्यानि । भवतः समीपं उपभवत् इत्यव्ययीभावः सर्वविभक्तिषु दर्शितः । एवं षट्समासोदाहरणानि । अथ संक्षेपतः षट् समासानाह;—विश्वार्च्यधीश्रीकृदुपद्विपादे इति पदे धीश्च श्रीश्च धीश्रियौ अयं द्वंद्वः, विश्वेन अर्च्ये विश्वार्च्ये इति तत्पुरुषः, विश्वार्च्ये च ते धीश्रियौ चायं कर्मधारयः, विश्वार्च्यधीश्रियौ करोतीति विश्वार्च्यधीश्रीकृत्, द्वयोः पादयोः समाहारः द्विपादीति द्विगुः द्विपाद्याः समीपमुपद्विपादि क्लीबे न्हस्वः अयं अव्ययीभावः विश्वार्च्यधीश्रीकृदुपद्विपादि यस्य स विश्वार्च्यधीश्रीकृदुपद्विपादि इति बहुव्रीहिः । एते संक्षेपतः षट् समासाः कथिताः ॥ ७ ॥

मुक्त्वा भवं सौख्यमवाप्तुमंगी
धीमाँस्त्यजन् मोहमघस्य हंता ।
यो मुच्यमानस्तमसा शिवीयेत्
त्वत्सेविताकाम्यतु सोऽत्र नेतः ! ॥ ८ ॥

टीका—भवं मुक्त्वा सौख्यमवाप्तुं मोहं त्यजन् अघस्य हंता तमसा मुच्यमानः यो धीमान् शिवीयेत् हे नेतः ! अत्र भुवि स पुरुषः त्वत्सेविताकाम्यतु इत्यन्वयः । द्वाक्काले क्त्वाप्रत्ययः मुक्त्वा । अवाप्तये अवाप्तुं :“ क्रियायां क्रियार्थायां तुम् ” अंगमस्यास्तीत्यंगी यथानेकस्व-

रादिन् दीर्घश्च अंगी प्राणी। धीर्विद्यते यस्यासौ धीमान् "तदस्यास्त्य-स्मिन्" इति मतुप्रत्ययः "ऋदुदितनोते पदस्य" इति तल्लोपे दीर्घे च धी-मान्। त्यज हानौ त्यजतीति त्यजन् शतृप्रत्ययः अततोति तल्लोपे च। मोहं मोहनीयं कर्म। हनक् हिंसागत्योर्हंतीति हंता णक्तृ चौतृ (?) अघस्य पापस्य, "कृतः कर्मणीति" षष्ठी। मुच्यमान इत्यत्र मुच्धातोरा-नश् क्य अतोऽम् अतोमोंतेमुद्यआदिन् (?) केन तमसा। शिवं इच्छेत् शिवीयेत् अमाव्ययात् "क्यङ्श्चेति" क्यनप्रत्ययः क्यनि दीर्घे च, त्वां सेवते इत्येवं शीलस्त्वत्सेवी अजाते शीले णिन् त्वमौप्रत्ययोत्तरपद इति मांतावयवस्य युष्मदस्त्वादेशे त्वत्सेविनो भावस्त्वत्सेविता "भावे त्वतलौ" इत्यनेन तल्प्रत्ययः [illegible] त्वत्सेवितामिच्छतु त्वत्से-विताकाम्यतु "द्वितीयायां काम्य" इति काम्यः। पंचमीक्त्वातुम्-इन्मतुशतृचआनशक्यन्णिन्तल्काम्यादीनामुदाहरणानि ज्ञेयानि ॥ ८ ॥

**क्षेमेषु वृक्षत्सु घनायमानो**
**हितः पितेवामृतवद्दुरापः।**
**मम प्रभो! भव्यतरं स्वभृत्यी-**
**भावं जयानंदमय! प्रदेयाः ॥ ९ ॥**

टीका—हे प्रभो! हे जयानंदमय! वृक्षत्सु क्षेमेषु मंगलेषु किंविशि-ष्टेषु घनायमानः पितेव हितः अमृतवद्दुरापः भव्यतरं स्वभृत्यीभावं मम प्रदेया इत्यन्वयः। वृक्षा इवाचरंति वृक्षंति "कर्तुः क्विप्" वृक्षंतीति क्वौवि शतृप्रत्ययः तेषु वृक्षत्सु। क्षेमेषु किंविशिष्टेषु घन इवाचरति घनायते इति घनायमानः। आने मोंते च? दुःखेनाप्यते इति दुरापः "दुःख-कृच्छ्राद्यर्थे खल् प्रत्ययः"। न स्वभृत्यः अस्वभृत्यः अस्वभृत्यस्य

स्वभृत्यवद्भवनं इति स्वभृत्यीभावस्ते कृत्वा इत्यत्र अभूततद्भावार्थे प्रत्ययः। अतिशयेन भव्यमिति भव्यतरमतिशायनेऽर्थे तरप्प्रत्ययः। जयश्च आनंदश्च जयानंदौ तौ प्रकृतौ यस्मिन्निति जयानंदमयः "प्रकृतवचने मयट्" क्विप् नपुंसके। शतृक्यप्ख्यङ्क्विप्मयट्प्रत्ययोदाहरणानि ज्ञेयानि पक्षे "जयानंद" इति सूरिनामेति ॥ ९ ॥

इति जयानंदसूरिविरचितं विभक्त्युक्तिसमासक्रियाप्रत्ययोदाहरणरूपं श्रीसर्वज्ञस्तवनं समाप्तम् ।

# श्रीपार्श्वनाथसमस्यास्तोत्रम् ।

श्रीपार्श्वनाथं तमहं स्तवीमि
त्रैलोक्यलोकं प्रणिधामधामं ।
सामोदमुल्लासि यदीयकीर्ति-
रामामुखं चुंबति कार्तिकेयः ॥ १ ॥
तैरश्वयोगेन विवेकसेक-
मुक्तास्ति या साऽपि जिनावतंस ! ।
विलोकिते कांतिकलत्वदास्य-
चन्द्रोदये नृत्यति चक्रवाकी ॥ २ ॥
पुरः प्रकीर्णानि कपोलपाली-
तले तवाच्छे प्रतिबिम्बितानि ।
निभाल्य संदेग्धि बुधो जनः किं
चन्द्रस्य मध्ये कदलीफलानि ॥ ३ ॥
यैर्निर्जितैः पंचशरेण चक्रे
कटे कुठारः कमठे ठकारः ।
अकीर्तिनाट्यस्य च नादितोऽलं
साम्यं क्व तेषां सुखदां त्वयास्तु ॥ ४ ॥
अभव्यदौर्भव्यतयाङ्गभाजां
येषां त्वदास्ये सुभगेऽपि दृष्टे ।
संतापसंपत्तिरुदेति तेषा-
मयं शशी वन्हिकणान् प्रसूते ॥ ५ ॥

त्वद्दानलीलादलितप्रतापो
देव ! शुकुंभस्तव शक्तिमाप्तुम् ।
भृगोः पतन्नादमिमं तनोति
ठंठं ठठं ठंठ ठठं ठठं ठः ॥ ६ ॥

जनिमहे जिन ! ते सवनोदकैः
प्रसृमरैः रमरेश्वरभूधरे ।
विदलितेषु नगेषु किलाभवत्
उपरि मूलमधस्तरुपल्लवाः ॥ ७ ॥

रसना स्तवने नयनं वदने
श्रवणं वचने च करौ महने ।
तव देव ! विशां कृतिनां सततं
रमते रमते रमते रमते ॥ ८ ॥

विश्वैकनायक ! कला न हि या त्वदर्हा
कार्ये न या च कविता भवतः स्तवाय ।
लग्नो न यस्त्वयि भवो विभवश्च सा किं
सा किं स किं स किमिति प्रवदन्ति धीराः ॥९॥

अहीशेऽधस्तात्त्वमुपनमति जेतुं दितिसुतं
समादाय क्रोधान्मणिमधुपकांतं किल धनुः ।
अधोऽधो मैनाकं चरति जगतीनाथ ! समभूत्
धनुःकोटौ भृंगस्तदुपरि गिरिस्तत्र जलधिः ॥१०॥

जगच्चक्रं चक्रे चरणपरिचर्यैकरुचिना-
मुना त्वद्दासेन स्वमनसि समंतान्निगमनम् ।
तदान्यो देवस्त्वां तुलयति विभो ! चेद्भुवि भवेत्
धनुःकोटौ भृंगस्तदुपरि गिरिस्तत्र जलधिः ॥११॥

प्रीतां रूपवतीं सतीं जिनपतेऽर्हल्लक्ष्मिलीलावतीं
हित्वा रूपरसोज्झितां रमयसे यन्मुक्तिसीमंतिनीम् ।
तन्नूनं भवताऽपि तीर्थपतिना त्वेतत्स्फुटं निर्ममे
युक्तायुक्तविचारणा यदि भवेत्स्नेहाय दत्तं जलम् ॥१२॥
इत्थं योगींद्रचेतः कमलकमलभूर्मुक्तिकासारहंसः
कल्याणांकूरकंदः सममहिमरमामंजरीवल्लरीश्रीः ।
मंत्रद्रुन्मेषबीजं भुवनजनवनोल्लासलीलावतंसः
श्रीपार्श्वः स्यात्समस्यास्तवकुसुमकृताभ्यर्चनोऽभी-
ष्टलब्ध्यै ॥ १३ ॥

इति पार्श्वनाथसमस्यास्तोत्रम् ।

श्रीगुणभद्रविरचितं

# चित्रबंधस्तोत्रम् ।

ये तीर्थरथनेतारः संत्यत्र वृषभादयः ।
चित्रबंधेन तान् स्तौमि हारिणा चित्रकारिणा ॥१॥
वृषभो वः सतां कांतां वृद्धिं देयादनिंदिताम् ।
भावयामास यः स्वीयां भासं दमितदुर्नयाम् ॥ २ ॥

छत्रम् ।

न जितस्त्वं जिनाधीश ! कर्मौघैरजितो वरः ।
रसरत्नैरसारं मां रक्षं रक्षस्तेऽरतः ॥ ३ ॥

चमरं ।

संभवो वोऽस्तु सौख्याय शंभवैधानलोऽभयः ।
सद्धर्मं कर्ममोक्षाय समवीवदद्त्र यः ॥ ४ ॥

बीजपूरः ।

नक्षरश्रीश वादीनदीवार्द्धेऽभिनंदन ।
नंद नंद धनादाननदानाद्रक्ष रक्ष नः ॥ ५ ॥

चतुरारचक्रं ।

सुमते मतिमश्राम त्वमकाम यमद्रुम ।
नमस्याम इमं धाम शमस्य महमक्रमं ॥ ६ ॥

षोडशदलकमलं ।

पद्माभेन धृतो येन समयो नयपावनः ।
स्वलोकेन कृतामानः पूयाज्जिनः स नो मनः ॥ ७ ॥

अष्टदलकमलं ।

सुपार्श्वो मम निःकामः सुमतिं ददतां प्रभुः ।
सुखायाशु शुभं येन सुप्रोक्तममलं जने ॥ ८ ॥

स्वस्तिकं ।

सतः कुवलयानंदं ददाना विंदं शिवोस्विव ।
वंद्य चंद्राभ ते प्रापुः केऽमृतं न शुभौकसः ॥ ९ ॥

धनुः ।

पुष्याच्छ्रीपुष्पदंतोऽयं भोक्ता मुक्तेरनेकशः ।
शंखकुंदेंदुमुक्ताभो यमध्यानाय नो वपुः ॥ १० ॥

मुशलं ।

श्रीवृक्षांकस्तु सश्रीक ईडितो बलिभिर्जिनैः ।
शीतलः शीततां नेयात्कामवन्हि मम प्रभुः ॥ ११ ॥

श्रीवृक्षः ।

योजिनास्समान श्रेयसे सुरंजन ।
तव ज्ञान।धनानस तत्र सिद्धं वरं रसम् ॥ १२ ॥

नालिकेरः ।

वासुपूज्यः सुरैः स्नात्वा मेरौ जन्मनि यो नुतः ।
तं जिनं न जितं वंदे देवतर्पिततार्पितम् ॥ १३ ॥

त्रिशूलं ।

विमल त्वामहं चायेऽनंतसन्मतये जिनं ।
नवानंदद विख्यात तथ्यं तव वचोधनं ॥ १४ ॥

श्रीकरी ।

अनंतज्ञानसंयुक्त त्यक्तमदन पावन ।
नमाम्यनंतनामानं त्वां जिनं जन्मभंजनं ॥ १५ ॥

हलः ।

धर्मनाथ कुवादीश सर्वपक्षक्षयंकर ।
रसं पीत्वात्र ते वाचः प्राप मोक्षक्षितिं बुधः १६ ॥

वज्रं ।

नयशक्त्योद्धृतो येन नरकाज्जनकोऽन्वयः ।
शमास्पदः स वः शांतिः शांतिं कुर्याद्यमाशयः ॥१७॥

शक्तिः ।

कुंथुनाथ कुरूद्भूत कुंथुमुख्यदयास्पद ।
ददस्व धर्मचक्रेश शं नित्यं मम सद्यशः ॥ १८ ॥

भालः ।

त्वयार रविसंकाशतपसा साधितः स्मरः ।
तथारिचक्रं चक्रेण मां त्रायस्व यतीश्वर ॥ १९ ॥

शरः।

कंदर्पदर्पकालीन मल्ले त्वं मलजिद्भुवि ।
विवेककंदवियां नः संप्रयच्छ प्रभाधिकाम् ॥ २० ॥

कलशः ।

हित्वा मोहं य आत्मनं तरभावं बभार तम् ।
जिनं सुव्रतकं नौमि वर्णसाररसार्णवम् ॥ २१ ॥

रथः ।

कमलाकः कलानेककलितः कंकरो यकः ।
कं नमिकः करोत्वेकं कस्यास्माकं कलं सकः ॥ २२ ॥

कमलं ।

पापान्मुक्ताव मां देव मादेशस्थिर धीवर ।
रवधीरं जिनं मेने नेमे त्वां शंखशंकरम् ॥ २३ ॥

शंखः ।

पादसेवनया तापान्निर्वृतास्तव भूमिपाः ।
पार्श्वार्हन्न कथं कष्टामस्तुभ्यं तु कः स्तुतः ॥ २४ ॥

खड्गमुष्टिः ।

पाहि मां भवतो वीर रवीतोऽधिकसत्प्रभ ।
भणंति सन्मतित्वेन नत्वेति प्राऽत्र सत्त पाः ॥ २५ ॥

द्वाभ्यां खड्गश्च ।

पाहि मां भवतो वीर स्वीतोऽधिकसत्प्रभ ।
भणंति सन्मतित्वेन नत्वेति प्राऽत्र सत्त पाः ॥२६॥

मुरजबंधोऽपि ।

छत्रौघाकृतिभिर्मृदंगनिधनैश्चित्रैर्विचित्रार्थैर्नी
श्रीमंन्मगलकारिणां सुवृषभादीनां जिनानां स्तुतिं ।
यो नाधीत इमां स्तुतिं विनयतो मेधाविना संस्कृतां
पुंनागः कवितां स याति नृपतिः स्वर्गश्रियं चाश्नुते २७

पंचमंगलयुक्तानां पदान् वंदे जिनेशिनाम् ।
भागं देवादिबंधानां भालजित्पद्मतेशिनाम् ॥ १ ॥

छत्रबंधः ।

सर्वसद्गुणसंवासः सदाचारस्त्वनालसः ।
सद्धर्मो गुणभद्रः स संपायाद्वो महीनसः ॥ २ ॥

चमरं ।

मतिमंतं नमस्यामः मलेनास्पृष्टमुत्तमम् ।
मंगलाय मुनिं चेमं महामित्रद्विषोः समम् ॥ ३ ॥

चमरं ।

तर्काद्यर्थविशेषसार्थगणने दक्षः सतामग्रणीः
जंघाल्लश्रीगुणभद्रकीर्तिरमदो मोहांधकारोग्रगौः ।
बालत्वेऽप्यजडं कविं धृतिगुणश्रीशं जगुर्यं बुधाः
शुंभत्कीर्तिममुष्य कामदमिनं बौद्धादिमिथ्याहरं ॥४॥

कलशः ।

इति चित्रबंधस्तोत्रं समाप्तिमगात् ।

# महर्षिस्तोत्रम् ।

निर्वेदसौ[illegible]-
संविद्धिकस्वरमुदोद्धतदिव्यशक्तीन् ।
बुद्ध्यौषधीबलतपोरसविक्रियर्द्धि-
क्षेत्रक्रियर्द्धिकलितान् स्तुमहे महर्षीन् ॥ १ ॥

ये, केवलावधिमनःपर्यायिणो बीजकोष्ठबुद्धियुजः
संभिन्नश्रोतृतया भांतश्च पदानुसारितया ॥ २ ॥

दूरस्पर्शनरसनघ्राणश्रवणावलोकनसमर्थाः ।
सदशचतुर्दशपूर्वाष्टांगमहानिमित्तज्ञाः ॥ ३ ॥

प्रत्येकबुद्धवादिप्रज्ञाश्रवणाश्च बुद्धिऋद्धिपतीन् ।
तीव्रतपोऽस्तनिपक्षानष्टादशधाऽपि नानीडे ॥ ४ ॥

रोगाः सर्वे विण्मलामर्शजल्ल-
क्ष्वेलैः सर्वेणापि शाम्यंति येषां
सिद्धा दृष्ट्यास्यविषत्वेन ये च
त्रायंतां नस्तेऽष्टधाप्यौषधीशाः ॥ ५ ॥

आध्याय ह्यखिलश्रुतार्थममलं येऽन्तर्मुहूर्ते क्षमा-
सद्धत्कृत्स्नमधीयते श्रुतमविच्छिन्नं पठंतोऽपि च ।
उच्चैर्यान्ति न कंठहानिमखिलं लोकं रमंतेऽन्यतोऽ-
प्यंगुल्या न्यसितुं बलाय बलिनस्त्रेधाऽपि ते संतु नः ॥६॥

चरंति घोरमहदुग्रदीप्तं उग्रं तपो घोरगुणं त्रिगुप्ताः ।
अत्रापि ये घोरपराक्रमाश्च ते सप्तधाऽप्युत्तपसस्तपंतु ॥७॥

वाग्दृष्टी कुरुतोऽगिनां लघुविषावेशेन मृत्युं क्षुधा
येर्भुक्ते घृतदुग्धमध्वमृतवद्यत्पाणिपात्रार्पितम् ।
स्यादुर्भोजनमप्युतस्त्विदुदिता वाचानुगृह्णंति ये
तद्वत्तान् कृपयास्यदृग्विषघृताद्यास्राविणः स्तौमि तान् ॥८॥
वंदेऽणिममहिमलघिमगरिमैश्यावशिताप्रतीघातैः ।
प्राकाम्यकामरूपित्वांतर्धीश्च विक्रियर्द्धिगतान् ॥ ९ ॥
न क्षीयते चक्रिबलेऽपि भोजिते
यद्वत्तसेवित ? दुः सुराद्वः ।
वसंति यद्धाम्नि चतुःकरेऽपि
ते भांतु भयेऽक्षीणमहानसालयाः ॥ १० ॥
जंघाश्रेण्यग्निशिखाजलदलफलपुष्पबीजतंतुगतैः ।
चरणनाम्नः स्वैरं चरतश्च दिवाऽस्तु विक्रियर्द्धिगतान् ॥११॥
इत्यन्यतद्व्रतपोमहिमोदितर्द्धी-
नाचार्यपाठकयतीन् जगदेकभर्तॄन् ।
वंदारुदाश्रयति कामपि भावशुद्धिं
क्षिप्रं यया दुरितपाकमपाकरोति ॥ १२ ॥

इति महर्षिस्तुतिः संपूर्णा ।

# श्रीपार्श्वनाथस्तोत्रम् ।

## लक्ष्मीस्तोत्रापरनाम ।

### ( सटीकम् । )

**लक्ष्मीर्महस्तुल्यसती सती सती प्रवृद्धकालो विरतो रतो रतो ।**
**जरारुजाजन्महता हता हता पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥**

टीका—उ इति निश्चयेन हे साधो ! त्वं पार्श्वं फणे पार्श्वनाथसमीपे गच्छ स्तुतिं कुरु । कया ? गिरा वाण्या कृत्वा । क ? रामगिरौ नामध्येयपर्वते। कीदृशे पार्श्वे ? लक्ष्मीर्महस्तुल्यसती कोर्थः [illegible] वर्तमाने सतः । पुनः कथंभूते ? सती शोभमाने । पुनः कथंभूते पार्श्वे ? सती शाश्वते । अतः श्रीपार्श्वनाथात् प्रवृद्धकालो विरतः कोर्थः प्रचुरकालो गतः रतो येन महता पार्श्वेन जरारुजापद्धता, किंविशिष्टा जरारुजापत् ? हता कोर्थः केनापि न हता श्रीपार्श्वनाथस्य जिनेंद्रस्य तत्वादिकं गृहीत्वा विना न केनापि जरारुजापत् हता ॥ १ ॥

**अर्च्चेयमाद्यं सुमना मनामना यः सर्वदेशो भुवि नाविना विना ।**
**समस्तविज्ञानमयो मयोमयो पार्श्वं फणे रामगिरौ गिरौ गिरौ॥२॥**

टीका—अहं आद्यं प्रथमं पार्श्वं अर्च्चेयं पूजयामि, क ? तथा रामगिरौ पर्वते पूर्वोक्तप्रकारेण । कथंभूतोहं ? सुमनाः कोऽर्थः आर्त्तरौद्राद्रहितमनाः तच्छोभनचित्तः । पुनः कथंभूतोहं ? मनामना कोर्थः मनान् यत् (ये)सर्वज्ञान् न मन्यंते ते मनामना तान् अहं त्यजामि तान् पंचविधमिथ्यात्वान् त्यजित्वा (त्यक्त्वा) श्रीपार्श्वं जिनं पूजयामि यः पार्श्वनाथः सर्वेषु देशेषु वर्तते इति सर्वदेशः, पुनः कीदृशः श्रीपार्श्वनाथः ? अविना कोर्थः स्वामिना विना यस्य पार्श्वनाथस्य स्वामि (मी) नास्ति, पुनः कीदृशः पार्श्वः ? भुवि पृथिव्या विषये

ना पुरुषः प्रधानीकपुरुषः । पुनः कीदृशः पार्श्वः ? समस्तविज्ञानमयः कोऽर्थः विशेषेण समस्तनवपदार्थानां जीवाजीवादिकरूपारूपि-वस्त्वादिषु केवलज्ञानेन कृत्वा परमानन्दैः कृत्वा जानंति पश्यंति । पुनः कीदृशः ? मया कोऽर्थः बाह्याभ्यन्तरलक्ष्म्या कृत्वा शोभितः । पुनः कीदृशः ? उमया कोर्थः अत्यंतलावण्यकांतिसौभाग्यादिभिः शोभया कृत्वा उपलक्षितः मण्डितः ॥ २ ॥

**विनेष्ट जंतोः शरणं रणं रणं क्षमादितो यः कमठं मठं मठं ।**
**नरामरारामक्रमं क्रमं क्रमं पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥३॥**

टीका—यः पार्श्वनाथः कमठं विनेष्ट शिक्षयामास । किंविशिष्टं कमठं ? मठं कोर्थः मठयति कुतापसानां स्वामीत्यर्थः । पुनः कीदृशं कमठं ? मठं कोर्थः समदं अष्टमदसहितं । कथंभूतं पार्श्वं ? क्षमादितो गुणतः जंतोः शरणं कोर्थः क्षमादिगुणसंयुक्तानां प्राणिनां शरणीभूतं । पुनः कीदृशं पार्श्वं ? रणं कोर्थः तत्वार्थभाषिणं । कीदृशो कमठं ? रणं कोर्थः संग्रामकारकं । पुनः कीदृशं पार्श्वं ? नरामरारामक्रमं कोर्थः मनुष्यदेवानां क्रीडास्थानी-यचरणयुगलं । पुनः कीदृशं पार्श्वनाथं ? क्रमं कोर्थः उग्रवंशे उत्पन्नं इक्ष्वाकुवंश इत्यर्थं । पुनः कीदृशं पार्श्वं ? क्रमं क्रामत्यागत्या क्रामति भव्यानां हृदयानि कोर्थः आसन्नभव्यानां हृदयानि उल्लसंति ॥ ३ ॥

**अज्ञानसत्कामलतालतालता यदीयसद्भावनता नता नता ।**
**निर्वाणसौख्यं सुगता गतागता पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥**

टीका—अज्ञाने सति संतः विद्यमाना ये मनोरथाः कामाः शब्दादयो देहादिकभोगाः पुत्रकलत्रगृहधनादिकाः तेषां भोगानां लता वल्ली स वल्लीमि-(ए) व आलः अनर्थं तस्य अनर्थस्य योऽसौ तालः कोर्थः ताडनं स्यात् स कः श्रीपार्श्वनाथः तेन ताडनेन कृत्वा ता लक्ष्मीर्येषां नराणां प्रवर्त्तते अज्ञान-

सत्कामलतालताता कथ्यते। यस्य पार्श्वनाथस्य संबंधिनो भक्तपुरुषाः शुद्धभावेन नता नम्रीभूताः सन्तः तेषां नताः कथ्यते। कीदृशा भक्ताः पुरुषाः ? नताः कोर्थः सर्वैरपि नमस्कृताः सर्व्वैर्लोकैः नमस्कृताः। पुनः कीदृशा भक्ताः ? सुष्ठु अतिशयेन निर्व्वाणसौख्यं गताः। पुनः कीदृशाः भक्ताः पुरुषाः ? गतागताः कोर्थः गतं ज्ञाने अगतं अनष्टं येषां ते गतागता ज्ञानसहिता इत्यर्थः, अथवा अगता कोर्थः ? गतं नष्टं अगतं अज्ञानं येषां ते अगता ज्ञानसहिताः पुरुषाः इत्यर्थः, वाथवा आगता कोर्थः गतं नष्टं अगतं अज्ञानं येषां ते आगता अज्ञानरहिताः पुरुषा इत्यर्थः। पार्श्वं फणे राम पूर्व्वोक्तः अर्थ इति ॥ ५ ॥

**विवादिताशेषविधिर्विधिर्विधिर्बभूव सर्प्यावहरी हरी हरी।**
**त्रिज्ञानसज्ञानहरोहरोहरो पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥**

टीका—पुनः कीदृशः पार्श्वनाथः ? विवादिताशेषविधिः कोर्थः विवादिनां या विद्यैव लक्ष्मीस्तस्याः लक्ष्म्या यः शेषः अल्पीकरणं तत्र अल्पकरणे विधिः व्यापारो यस्य स व्यापारो भवति कोर्थः यस्य पार्श्वनाथस्य परवादीनां विद्यायां विषये सा विद्या तुच्छकरणाय व्यापारो अतिशक्तिरस्ति। पुनः कीदृशः पार्श्वः ? विधिः कोर्थः निज आचारत् तत्पर ( निजाचारात्तत्पर ) आचाररूपः। पुनः कीदृशः पार्श्वः ? विधिः कोर्थः चतुर्विधसंघस्य जिनधर्म्मेणोद्योतकर्त्ता जातः। पुनः कीदृशः पार्श्वः ? सर्प्यावहरी कोर्थः सर्प्याणां विघ्नं श्रीपार्श्वनाथस्य नामस्मरणेन क्षयं यातीति सर्प्यावहः। पुनः कीदृशः पार्श्वः ? हरिः इंद्रः (ई) लक्ष्मीः। पुनः हरिः सूर्यः, ई कामः, पुनः हरिः वायुः एते सर्व्वे ई गतौ धातौ प्रयोगात्, यान्ति गच्छंति सेवंति (ते) यं पार्श्वनाथं स सर्प्यावहरीहरीहरी। पुनः कीदृशः पार्श्वनाथः ? त्रिज्ञानः कोर्थः यः पार्श्वनाथो गर्भावतारसमये गर्भमध्ये मतिश्रुतावधि इति त्रिज्ञानलक्षणः। पुनः कीदृशः पार्श्वनाथः ? सज्ञानेन विराजितः

सज्ञानं कोर्थः केवलज्ञानेन कृत्वा भव्यानां चित्तं हरतीति त्रिज्ञानसज्ञानहरः पुनः कीदृशः पार्श्वनाथः ? अहः कोर्थः सुष्ठु केवलज्ञानप्रकाशकः ॥५॥

**यद्विश्वलोकैकगुरुं गुरुं गुरुं विराजिता येन वरं वरं वरं ।**
**तमालनीलांगभरं भरं भरं पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥**

टीका—कथंभूतं पार्श्वं ? यत् संचरणशीलो विनाशीय ईदृशो विश्वलोकः समस्तलोकः तस्य लोकस्य एकोऽद्वितीयो ज्ञानप्रकाशकः गुरुः श्रीपार्श्वनाथः तं पार्श्वनाथं । पुनः कीदृशं पार्श्वनाथं? गुरुं गुरुतरं गरिष्ठं । पुनः कीदृशं पार्श्वनाथं? गुरुं वाचस्पतिं वागीशं । पुनः किंविशिष्टं पार्श्वनाथं ? भरं कोर्थः पोषकं जगत्पोषकं । पुनः कीदृशं पार्श्वनाथं ? भरं कोर्थः भातीति भरः वन्हिरूपः तं भरं कांतितेजवान् इत्यर्थः । पुनः किंविशिष्टं ? तमालनीलांगभरं तमालनीलं अंगं तमालवन्नीलं अंगं बिभर्ति धारयतीति तमालनीलांगभरः तं । पुनः कीदृशं पार्श्वं ? विराजितः(तं) । पुनः कीदृशं पार्श्वं ? वरं मुक्तिलक्ष्म्या वरं शीलं स्वभावं । पुनः कीदृशं पार्श्वं ? वरं निजोपार्जिततत्वज्ञानस्य विभागं स्वभक्तेषु ददातीति वरं, परं तु मूककेवलिनां तत्वज्ञानं न ददाति, मूककेवली कोर्थः ? यावत् ध्वनिं न उच्छलति तावन्मूककेवली कथ्यते ॥६॥

**संरक्षितो दिग्भुवनं वनं वनं विराजिता येषु दिवै दिवै दिवैः ।**
**पादद्वये नूतसुरासुराः सुराः पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥७॥**

टीका—यस्य पार्श्वनाथस्य दिग्भुवनं दिशा एव भुवनं अस्ति, पुनः वनं जलकायं, पुनः वनं वनस्पतिकायं एषां त्रयाणां श्रीपार्श्वनाथः संरक्षति रक्षां करोति । पुनः यस्य पार्श्वनाथस्य पादद्वये नूताः स्तुतिकर्त्तारः पुरुषाः सुराऽसुरा वर्त्तते, पुनः सुराः सुष्ठु विराजते येषु नूतसुरासुरेषु, विराजिताः क ? श्रीपार्श्वनाथचरणविधिये शोभमाना बभूव ये के दिवा स्वर्गे नरात् आगच्छत् यस्य पार्श्वनाथस्य पादद्वये ई कामः वो वरुणः आ विष्णुः ई लक्ष्मीश्च वर्त्तते पुनः रा उत्कृष्टो दिवा प्रकाशं कुर्वन्ति ॥ ७ ॥

रराज नित्यं सकलाकला कला ममारतृष्णो वृजिनो जिनो जिनो।
संहारपूज्यं वृषभा सभा सभा पार्श्वं फणी रामगिरौ गिरौ गिरौ॥८॥

टीका—यत्र पार्श्वनाथे अं ब्रह्म रराजते शोभते। पुनः यत्र पार्श्वनाथे सकलाकला ज्ञानादिककला रराजते शोभते। पुनः कला कीदृशी शोभते? द्वासप्ततिमनोज्ञकला शोभते, कथंभूतः पार्श्वनाथः? अमारतृष्णः कोऽर्थः निष्कामः कामरहितः। पुनः कथंभूतः पार्श्वः? अवृजिनः निःपापः। पुनः कथंभूतः पार्श्वः जिनो कोऽर्थः कर्मजीतनसमर्थः द्विधारत्नत्रयैः। पुनः कीदृशः पार्श्वः? जिनः जिनान् गणधरादीन् देवादीन् यः पार्श्वः स अवतीति [आराधयंतीति] स जिनः। पुनः कीदृशः पार्श्वनाथः? सभा कोऽर्थः यस्य पार्श्वनाथस्य सभा पूज्या बभूव कैः संहाराः देवाः आभरणैः सह भूषितैः देवैः तैः देवैः पूज्यं यस्य पार्श्वस्य सभा, सा सभा पुनः कीदृशी? सभा [वृषभा] कोऽर्थः अमरदेवानाममरेन्द्राणां मुकुटरत्नतेजसा कृत्वा च पुना रत्नमयीसमवशरणस्य कांत्या कृत्वा शोभिता सभा सा सभा ॥ ८ ॥

शार्दूलविक्रीडितछंदः।

तर्के व्याकरणे च नाटकचये काव्याकुले कौशले
विख्यातो भुवि पद्मनंदिमुनिपस्तत्त्वस्य कोषं निधिः।
गंभीरं यमकाष्टकं पठति यः संस्तूयसा लभ्यते
श्रीपद्मप्रभदेवनिर्मितमिदं स्तोत्रं जगन्मंगलं ॥ ९ ॥

टीका—यः पुमान् इदं पार्श्वनाथस्य स्तोत्रं पठति यः पुरुषः संस्तूयसा कृत्वा संस्तवेन कृत्वा तत्त्वस्य कोषं निधिः लभ्यते। कथंभूतं स्तोत्रं श्रीपद्मप्रभदेवमुनिना निर्मितं निष्पादितं। पुनः कीदृशं स्तोत्रं? जगन्मंगलं त्रैलोक्यमंगलदायकं। पुनः कीदृशं स्तोत्रं? यमकाष्टकं गंभीरं कोऽर्थः तत्त्वादिकेन स्वात्मापरस्वरूपेण भरिता अत्रैव भुवि पृथिव्यां विषये श्रीप-

मनंदिमुनिपो विख्यातो बभूव । क्व ? तर्कशास्त्रे न केवलं तर्के चान्यत् व्याकरणेऽपि विख्यातोऽभूत् । पुनः नाटकचये समूहे नाटकशास्त्रसमूहे, पुनः काव्याकुले कौशले कोऽर्थः महत्तनवरसैः सह काव्यैः समूहैः कौशले प्रवीण-चतुरे अतः कारणात् पद्मनंदिमुनिः भुवि पृथिव्यां विख्यातोऽभूत् ॥९॥

इति श्रीपद्मनंदिमुनिविरचितं श्रीपार्श्वनाथस्तोत्रं टीकासहितं संपूर्णम् । *

---

* अस्य स्तोत्रस्य दशरा-मयरास्था एकैव प्रेस-पुस्तिका संप्राप्ता सा तु 'बाबू जुगलकिशोरजी' इत्येतैः संशोधिताप्यतीवाशुद्धा । टीकापि विलक्षणा, भाषासाहित्यदृष्टयाप्यशुद्धा भाषते, शब्दानामर्थमपि पूर्णतया न प्रकाशयति । स्तोत्रमिदं पद्मप्रभदेवनिर्मितमवभाति । अस्य संशोधने यो मम प्रमादः स क्षन्तव्यः पाठकैः ।—संशोधकः ।

# नेमिनाथस्तोत्रम् ।

( द्व्यक्षरी नेमिजिनस्तुतिः । )

मनोनान् नमोनेन नुन्नमन्नामिमाननं ।
नेमनामानमनमं मुनिनामिनमानुम ॥ १ ॥
नमामानामनिम्नान मामानानामनामिनां ।
नामिने नामिनामोमे नमिनम्ने नमे नमः ॥ २ ॥
मने नाम्नामिनं नाम नानानिम्नममानने ।
ननुमेमिममोनेना मोमानामानमन्निमा ॥ ३ ॥
मिममन्मनमामानिमानिर्नीमाननोन्मना ।
नानानामीमननेमी मनोमनिममानिनां ॥ ४ ॥
मनोमुम्निम्ननं नूनं मुम्नमन्माननोननं ।
नुम्नमे नोमुनानेमि नम्नाम्नोननमामनु ॥ ५ ॥
नोनमुन्मानमानेन मुनीनेनममाननं ।
मीनानमिनमम्नेमी मनूनां नामिमीममां ॥ ६ ॥
मुनिनमे नेमि नानां निमाने नेमिमानिनां ।
नेमिनामा नमानाना मनोमान ममं नुम ॥ ७ ॥
नेमीनमननं नेमि नमनं नेमिनाननं ।
नेमि नाम्नो नमाम्नान मानानून नमीममः ॥ ८ ॥

इति स्तुतिंधे ( ? ) पुरतः पठंते
नेमे निजव्यंजनयुग्मसिद्धिं ।
श्रीवर्द्धमानोद्यशालिनस्ते
स्युः सिद्धिलब्धापरिभोगयेप्पा ॥ ९ ॥

इति नेमिनाथस्तोत्रं संपूर्णम् ।*

---

* अस्य संशोधनं कापी-हूकापीरूपं ।

श्रीभानुकीर्तिविरचित

# शंखदेवाष्टकम् ।

---

शतमखशतवन्द्यो मोक्षकान्ताभिनन्द्यो
दलितमदनचापः प्राप्तकैवल्यरूपः ।
कुमतवनकुठारः शंखरत्नावतारः
त्रिभुवननुतदेवः पातु मां शंखदेवः ॥ १ ॥

अभिमतफलरूपो विश्वलोकप्रदीप-
स्तुहिनगगनमूर्तिः स्फारकल्याणकीर्तिः ।
सुकृतजनसवासो मोक्षलक्ष्मीविलासः
त्रिभुवननुतदेवः पातु मां शंखदेवः ॥ २ ॥

अगणितमहिमेशो ज्ञानबोधोपदेशः
सहजपरमकायः प्राप्तनिर्वाणगेहः ।
अधिगतपरमार्थो ज्ञानसज्ज्ञानतीर्थः
त्रिभुवननुतदेवः पातु मां शंखदेवः ॥ ३ ॥

गुणमणिगणधारो भव्यभाग्यावतारो
विबुधवनवसन्तो मोक्षलक्ष्मीसुकान्तः ।
त्यजतमलकलंको धौतसंसारपंकः
त्रिभुवननुतदेवः पातु मां शंखदेवः ॥ ४ ॥

दिविजमनुजपूज्यस्त्यक्तसाम्राज्यराज्यो
वृजिननिकरनाशः सर्वतत्त्वप्रकाशः ।

परिणतसुखरूपो निर्जितः कालकूप-
स्त्रिभुवननुतदेवः पातु मां शंखदेवः ॥ ५ ॥
विगतजननदोषः सर्वभाषानिभूषः
समवशरणनाथो जैनमार्गे सुतीर्थः ।
गणधरनुतराजः कोटिबालार्कतेज-
स्त्रिभुवन नुतदेवः पातु मां शंखदेवः ॥ ६ ॥
जितमनसिजरूपः कर्मनिर्मूलकोपः
विनयवनजभानुः वांछितः कामधेनुः ।
कुवलयवनमित्रो भारतीलोलनेत्र-
स्त्रिभुवन नुतदेवः पातु मां शंखदेवः ॥ ७ ॥
जिनपदकमलालिर्जैनभूते पिकालि-
र्मुनिपतिमुनिचन्द्रो शिष्यराजेन्द्रचन्द्रः ।
सकलविमलसूक्तिर्भानुकीर्तिप्रयुक्ति-
स्त्रिभुवननुतदेवः पातु मां शंखदेवः ॥ ८ ॥

इति शंखदेवाष्टकम् ।

श्रीयोगीन्द्रदेवविरचितं

# निजात्माष्टकम् ।

णिच्चं तेलोक्कचक्काहिवसयणमिया जे जिणिंदा य सिद्धा
अण्णे गंथत्थसत्था गमगभियमणा उवज्झायसूरिसाहू ।
सव्वे सुद्धप्पियादं अणुसरणगुणा मोक्खसंपत्तितम्मा
सोहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥१॥
णिस्सो णिव्वाणभंगो णिरुचि णिरुवभो णिक्कलो णिक्कलंको
अव्वाबाहो अणंतो अगुरुगलघुगो णाणिमज्झावसाणो ।
सम्भावत्थो सयंभू गयपयडिमलो सासओ सव्वकालं
सोहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥२॥
एक्को सण्णाणपिण्डो विमलणहणिहो उड्ढगामीसहाओ
णिच्चो वाएयतच्चो परसरसणिहो घिंतदेहप्पमाणो ।
सिद्धो सुद्धं सरूओ चिदुपरमगुणो अक्खओ जो णिरक्खो
सोहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥३॥
जोईणं झाणगम्मो परमसुहमहो कम्मणोकम्ममुक्को
कायाकारो अकाओ कलिकलसमलालेवचत्तो पवित्तो ।
समत्ताईगुणड्ढो गलियदहपरासाणुबंधो विसुद्धो
सोहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥४॥
णोइत्थिपुण्णपुंसो णिरयिसयसुहालोयमाणो समाणो
णिद्देसो णिव्विसाओ मणवयणसमारंभसंभेधचुंको ।

लोयालोयप्पयासो अविलयणिलयो णिव्विसेसो णिरीसो
सोऽहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥५॥
नादासंखप्पएसो समयमुवगओ णंतसोक्खावठाणा
दुत्तिण्हातीदभावो भवभयणभयो बंधमुत्तो अमुत्तो ।
अव्वत्तो णाणगेज्जो जरमरणचुदो जो परं बम्हरूओ
सोहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥६॥
सव्वणवण्णगंधाइयरविरहियो णिम्मभो णिव्विआरो
रूवातीदस्सरूओ सयलविमलसद्दस्सणण्णाणवीओ ।
इट्ठाणिट्ठप्पयोया सुहअसुहवियप्पा सया भावभूओ
सोहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥७॥
रूवे पिंडे पयत्थे ण कलपरिचये जोयिविंदेण णादे
अत्थे गंथे ण सत्थे ण करणकिरिया णावरे मंगचारे ।
साणंदाणंदरूओ अणुमहसुसुसंवेयणाभावपुव्वो
सोहं झायेमि णिच्चं परमपयगओ णिव्वियप्पो णियप्पो ॥८॥

इति योगीन्द्रदेवविरचितं निजात्माष्टकं समाप्तम् ।

अमितिगत्याचार्यकृतः

# सामायिकपाठः ।

एकद्वित्रिहृषीकप्रभृतयो ये पंचधावस्थिता
जीवाः संचरता मया दशदिशश्चित्तप्रमादात्मना ।
ते ध्वस्ता यदि लोटिता विघटिताः संघट्टिता मोटिता
मार्गालोचनमोचिना जिन ! तदा मिथ्याऽस्तु मे दुष्कृतं ॥१॥
अर्हद्भक्तिपरायणस्य विशदं जैनं वचोऽभ्यस्यतो
निर्जिह्वस्य परापवादवदने शक्तस्य सत्कीर्तने ।
चारित्रोद्यतचेतसः क्षपयतः कोपादि विद्वेषिणो
देवाऽध्यात्मसमाहितस्य सकलाः सर्पंतु मे वासराः ॥२॥
आलस्याकुलितेन सूक्ष्ममनसा सन्मार्गनिर्नाशिना
लोभक्रोधमदप्रमादमदनद्वेषादिदिग्धात्मना ।
यद्देवाचरितं विरुद्धमधिया चारित्रशुद्धेर्मया
मिथ्यादुष्कृतमस्तु भो जिनपते ! तत्त्वत्प्रसादेन मे ॥३॥
जीवाजीवपदार्थतत्त्वविदुषो बंधाश्रवौ रुंधतः
शश्वत्संवरनिर्जरे विदधतो मुक्तिश्रियं कांक्षतः ।
देहादेः परमात्मतत्त्वममलं मे पश्यतस्तत्त्वतो
धर्म्मध्यानसमाधिशुद्धमनसः कालः प्रयातु प्रभो ! ॥ ४ ॥
कषायमदनिर्जयः सकलसंगनिर्मुक्तता
चरित्रपरमोद्यमो जननदुःखतो भीरुता ।

मुनीन्द्रपदसेवना जिनवचोरुचिस्त्यागिता
हृषीकहरिनिग्रहो निकटनिर्वृतेर्जायते ॥ ५ ॥
विद्विष्टे वा प्रशमवति वा बांधवे वा रिपौ वा
मूर्खौघे वा बुधसदसि वा पत्तने वा वने वा ।
संपत्तौ वा मम विपदि वा जीविते वा मृतौ वा
कालो देव ! ब्रजतु सकलः कुर्वतस्तुल्यवृत्तिं ॥ ६ ॥
सुखे वा दुःखे वा व्यसनजनके वा सुहृदि वा
गृहे वाऽरण्ये वा कनकनिकरे वा दृषदि वा ।
प्रिये वाऽनिष्टे वा मम समधियो यांतु दिवसा
दधानस्य स्वांते तव जिनपते ! वाक्यमनघं ॥ ७ ॥
ये कार्यं रचयंति निंद्यमधमास्ते यांति निंद्यां गतिं
ये वंद्यं रचयन्ति वंद्यमतयस्ते यांति वंद्यां पुनः ।
ऊर्ध्वं यांति सुधागृहं विदधतः कूपं खनंतस्त्वधः
कुर्वन्तीति विबुध्य पापविमुखा धर्म्मं सदा कोविदाः ॥८॥
चेष्टाश्चित्तशरीरबाधनकरीः कुर्वंति चित्तेऽधमाः
सौख्यं यस्य चिकीर्षवोऽक्षवशगा लोकद्वयध्वंसिनीः ।
कायो यत्र विशीर्यते मशतया मेघो यथा शारद-
स्तत्रामी बत ! कुर्वते किमधियः पापोद्यमं सर्व्वदा ॥ ९ ॥
कांतेयं तनुभूरयं सुहृदयं मातेयमेषा स्वसा
जातोऽयं रिपुरेष पत्तनमिदं सद्मेदमेतद्धनं ।
एषा यावदुदेति बुद्धिरधमा संसारसंवर्द्धिनी
तावद्गच्छति निर्वृतिं बत ! कुतो दुःखद्रुमच्छेदिनीं ॥१०॥

नाहं कस्यचिदस्मि कश्चन न मे भावः परो विद्यते
मुक्त्वात्मानमपास्तकर्म्मसमितिं ज्ञानेक्षणालंकृतिं ।
यस्यैषा मतिरस्ति चेतसि सदा ज्ञातात्मतत्त्वस्थिते-
र्बंधस्तस्य न यंत्रितस्त्रिभुवनं सांसारिकैर्बंधनैः ॥ ११ ॥
चित्रोपायविवर्द्धितोऽपि न निजो देहोऽपि यत्रात्मनो
भावाः पुत्रकलत्रमित्रतनया जामातृतातादयः ।
तत्र स्वं निजपूर्वकर्म्मवशगाः केषां भवंति स्फुटं
विज्ञायेति मनीषिणा निजमतिः कार्या सदात्मस्थिता ॥१२॥
दुर्मदोच्छ्रितकर्म्मशैलदलने यो दुर्निवारः पविः
पोतो दुस्तरजन्मसिंधुतरणे यः सर्वसाधारणः ।
यो निःशेषशरीररक्षणविधौ शश्वत्पितेवादृतः
सर्वज्ञेन निवेदितः स भवतो धर्म्मः सदा पातु नः ॥ १३ ॥
यन्मात्रापदवाक्यवाच्यविकलं किंचिन्मया भाषितं
साऽघालासकषायदर्पविषयव्यामोहसक्तात्मनः ? ।
वाग्देवी जिनवक्त्रपद्मनिलया तन्मे क्षमित्वाखिलं
दत्त्वा ज्ञानविशुद्धिमूर्जिततमां देयादनिंद्यपदं ॥ १४ ॥
निःसारा भयदायिनोऽसुखकरा भोगाः सदा नश्वरा
निंद्यस्थानभवार्तिभावजनका विद्याविदां निंदिताः ।
नेत्थं चिंतयतोऽपि मे बत ! मतिर्व्यावर्त्तते भोगतः
कं पृच्छामि कमाश्रयामि कम्‌हं मूढः प्रपद्ये विधिं ॥ १५ ॥
मोहध्वांतमनेकदोषजनकं मे भस्तिं दीपका-
वुत्कीर्णाविव कीलिताविव हृदि स्यूताविवेन्द्रार्चितौ

आश्लिष्टाविव विंबिताविव सदा पादौ निखाताविव
स्थेयास्तां लिखिताविवाघदहनौ चद्राविवाहँस्तव ॥१६॥
संयोगेन दुरंतकल्मषभुवा दुःखं न किं प्रापितो
येन त्वं भवकानने मृतिजराव्याघ्रव्रजाध्यासिते।
संगस्तेन न जायते तव यथा स्वप्नेपि दुष्टात्मना
किंचित्कर्म तथा कुरुष्व हृदये कृत्वा मनो निश्चलं ॥१७॥
दुर्गंधेन मलीमसेन वपुषा स्वर्गापवर्गश्रियः
साध्यंते सुखकारणा यदि तदा संपद्यते का क्षतिः।
निर्माल्येन विगर्हितेन सुखदं रत्नं यदि प्राप्यते
लाभः केन न मन्यते बत! तदा लोकस्थितिं जानता ॥१८॥
मृत्यूत्पत्तिवियोगसंगमभयव्याध्याधिशोकादयः
सूद्यंते जिनशासनेन सहसा संसारविच्छेदिना।
सूर्येणेव समस्तलोचनपथप्रध्वंसबद्धोदया
हन्यंते तिमिरोत्कराः सुखहरा नक्षत्रविक्षेपिणा ॥ १९ ॥
चित्रारंभप्रचयनपरा सर्वदा लोकयात्रा
यस्य स्वांते स्फुरति न मुनेर्मुण्णती मुक्तियात्रां।
कृत्वात्मानं स्थिरतरमसावात्मतत्त्वप्रचारे
क्षिप्त्वाशेषं कलिलनिचयं ब्रह्मसद्म प्रयाति ॥ २० ॥
नो वृद्धा न विचक्षणा न मुनयो न ज्ञानिनो नाऽधमा
नो शूरा न विभीरवो न पशवो न स्वर्गिणो नांडजाः।
त्यज्यंते शमवर्जितेन सकला लोकत्रयव्यापिना
दुर्वारेण मनोभवेन नयता हस्त्यांगिनो वश्यतां ॥ २१ ॥

शश्वद्दुःसहदुःखदानचतुरो वैरी मनोभूरयं
ध्यानेनैव नियम्यते न तपसा संगेन न ज्ञानिनां ।
देहात्मव्यतिरेकबोधजनितं स्वाभाविकं निश्चलं
वैराग्यं परमं विहाय शमिना निर्वाणदानक्षमं ॥ २२ ॥
कः कालो मम कोऽधुना भवमहं वर्ते कथं सांप्रतं
किं कर्म्मात्र हितं परत्र मम किं किं मे निजं किं परं ।
इत्थं सर्व्वविचारणाविरहिता दूरीकृतात्मक्रिया
जन्मांभोधिविवर्तपातनपराः कुर्व्वंति सर्व्वाः क्रियाः ॥२३॥
येषां काननमालयं शशधरो दीपस्तमश्छेदको
भैक्ष्यं भोजनमुत्तमं वसुमती शय्या दिशस्त्वांबरं ।
संतोषामृतपानपुष्टवपुषो निर्धूय कर्माणि ते
धन्या यांति निवासमस्तविपदं दीनैर्दुरापं परैः ॥२४॥
माता मे मम गेहिनी मम गृहं मे बांधवा मेऽंगजा-
स्तातो मे मम संपदो मम सुखं मे सज्जना मे जनाः ।
इत्थं घोरममत्वतामसवशव्यस्तावबोधस्थितिः
शर्म्माधानविधानतः स्वहिततः प्राणी सनीश्वस्यते ॥२५॥
विख्यातौ सहचारितापरिगतावाजन्मनो यौ स्थिरौ
यत्राऽवार्यरयौ परस्परमिमौ विश्लिष्यतोंऽगांगिनौ ।
खेदस्तत्र मनीषिणां ननु कथं वाह्ये विमुक्ते सति
ज्ञात्वेतीह विमुच्यतामनुदिनं विश्लेषशोकव्यथां ॥२६॥
तिर्यंचस्तृणपर्णलब्धधृतयः सृष्टाः स्थलीशायिन-
श्चितानंतरलब्धभोगविभवा देवाः समं भोगिभिः ।

मर्त्यानां विधिना विरुद्धमनसा वृत्तिः कृता सा पुनः
कष्टं धर्म्मयशःसुखानि सहसा या सूदते चिंतिता ॥ २७ ॥
भजसि दिग्विजयोपायासि पातालमंगं
भ्रमसि धरणिपृष्ठं लिप्स्यसे स्वांतलक्ष्मीः ।
अभिलषसि विशुद्धां व्यापिनीं कीर्तिकांतां
प्रशमसुखसुखाब्धिं गाहसे त्वं न जातु ॥२८॥
भोक्तुं भोगिनितंबिनी सुखमधश्चितां पनीपत्यसे
प्राप्तुं राज्यमनन्यलभ्यविभवं क्षोणीं चनीकस्यसे ।
लब्धुं मन्मथमंथराः सुरवधूर्नीकं चनीस्कद्यसे
रे भ्रांत्या ह्यमृतोपमं जिनवचस्त्वं नापनीपद्यसे ॥२९॥
भीमे मन्मथलुब्धके बहुविधव्याध्याधिदीर्घद्रुमे
रौद्रारंभहृषीकपाशिकगणे मृत्यूद्धतैणद्विषि ? ।
मा त्वं चित्तकुरंगजन्मगहने जातु भ्रमी ईश्वर ?
प्राप्तुं ब्रह्मपदं दुरापमपरैर्यद्यस्ति वांछा तव ॥३०॥
व्यसननिहतिज्ञानोद्युक्तिगुणोज्वलसंगतः
करणविजितिर्जन्मत्रस्तिः कषायनिराकृतिः ।
जिनमतरतिः संगत्यक्तिस्तपश्चरणाध्वनि
तरितुमनसो जन्मांभोधिं भवंतु जिनेन्द्र ! मे ॥३१॥
विरव्याधाक्लिष्टे विषयसुखतृणास्वादनाशक्तचित्ता
निस्त्रिंशैर्[illegible]संतो जनहरिणगणाः सर्व्वतः संचरद्भिः ।
खाद्यंते यत्र सद्यो भवमरणजराश्वापदैर्भीमरूपै-
स्तत्रात्रस्थां न कुर्म्मो भवगहनवने दुःखदावाग्नितप्ते ॥३२॥

न वैद्या न पुत्रा न विप्रा न शक्रा
न कांता न माता न भृत्या न भूपाः ।
यमालिंगितं रक्षितुं संति शक्ता
विचिंत्येति कार्यं निजं कार्यमार्यैः ॥ २३ ॥

विचित्रैरुपायैः सदा पाल्यमानः
स्वकीयो न देहः समं यत्र याति ।
कथं बाह्यभूतानि वित्तानि तत्र
प्रबुद्ध्येति कृत्यो न कुत्रापि मोहः ॥ २४ ॥

शिष्टे दुष्टे सदसि विपिने कांचने लोष्ठवर्गे
सौख्ये दुःखे शुनि नरवरे संगमे यो वियोगे ।
शश्वद्धीरो भवति सदृशो द्वेषरागव्यपोढः
प्रौढा स्त्रीव प्रथितमहसस्तस्य सिद्धिः करस्था ॥ २५ ॥

अभ्यस्ताक्षकषायवैरिविजया विध्वस्तलोकक्रिया
बाह्याभ्यंतरसंगमांशविमुखाः कृत्वात्मवश्यं मनः ।
ये श्रेष्ठं भवभोगदेहविषयं वैराग्यमध्यासते
ते गच्छंति शिवालयं विकलिला लब्ध्वा समाधिं बुधाः ॥२६॥

संघस्तस्य न साधनं न गुरवो नो लोकपूजापरा
नो योग्यैस्तृणकाष्ठशैलधरणीपृष्ठे कृतः संस्तरः ।
कर्तात्मैव विशुद्ध्यतामयमलस्तस्यात्मतत्त्वस्थिरो
जानानो जलदुग्धयोरिव भिदां देहात्मनोः सर्वदा ॥ २७ ॥

विगलितविषयः स्वं शरीरे बुध्यते यः
पथिकमिव शरीरे नित्यमात्मानमात्मा ।

विषमभवपयोधिं लीलया लंघयित्वा
पशुपदमिव सद्यो यात्यसौ मोक्षलक्ष्मीं ॥ ३८॥

बाह्यं सौख्यं विषयजनितं मुच्यते यो दुरंतं
स्थेयं स्वस्थं निरुपममसौ सौख्यमाप्नोति पूतं ।
योऽन्यैर्जन्यश्रुतिविरतये कर्णयुग्मं पिधत्ते
तस्य च्छन्नो भवति नियतः कर्णमध्येऽपि घोषः ॥३९॥

संयोगेन विचित्रदुःखकरणे दक्षेण संपादिता-
मात्मीयां सकलत्रपुत्रसुहृदं यो मन्यते संपदं ।
नानापायसमृद्धिवर्द्धनपरां मन्ये ऋणोपार्जितां
लक्ष्मीमेष निराकृतामितिगतिर्ज्ञात्वा निजां तुष्यति ॥४०॥

सत्पक्षपाति कलेवरं बहुविधव्यापारजल्पोद्यतं
तन्मे किंचिदचेतनं न कुरुते मित्रस्य वा विद्विषः ।
आत्मा यः सुखदुःखकर्मजनको नाऽसौ मया दृश्यते
कस्याहं बत ! सर्वसंगविकलस्तुष्यामि रुष्यामि च ॥४१॥

क्रोधाबद्धधिया शरीरकमिदं यन्नाश्यते शत्रुणा
सार्धं तेन विचेतनेन मम नो काप्यस्ति संबंधता ।
संबंधो मम येन शश्वदचलो नात्मा स विध्वंसते
न क्वापीति विधीयते मतिमता विद्वेषरागोदयः ॥४२ ॥

एकत्राऽपि कलेवरे स्थितिधिया कर्माणि संकुर्वता
गुर्वी दुःखपरंपराऽनुपरता यत्रात्मना लभ्यते ।
तत्र स्थापयता विनष्टममतां विस्तारिणीं संपदं
का शक्रेण नृपेश्वरेण हरिणा न प्राप्यते कथ्यतां ॥ ४३ ॥

ये भावाः परिवर्धिता विदधते कायोपकारं पुन-
स्ते संसारपयोधिमज्जनपरा जीवापकारं सदा ।
जीवानुग्रहकारिणो विदधते कायापकारं पुन-
र्निश्चित्येति विमुच्यतेऽनयधिया कायोपकारि त्रिधा ॥४४॥
आत्मा ज्ञानी परममलं ज्ञानमासेव्यमानः
कायोऽज्ञानी वितरति पुनर्घोरमज्ञानमेव ।
सर्वत्रेदं जगति विदितं दीयते विद्यमानं
कश्चित्यागी न हि खकुसुमं क्वापि कस्यापि दत्ते ॥ ४५ ॥
कांक्षंतः सुखमात्मनोऽनवसितं हिंसापरैःकर्मभि-
र्दुःखोद्रेकमपास्तसंगधिषणाः कुर्वंति विकामिनः ।
बाधां किं न विवर्द्धयंति विविधैः कंडूयनैः कुष्ठिनः
सर्व्वांगावयवोपमर्दनपरैः खर्जूकषाकांक्षिणः ॥ ४६ ॥
व्यापारं परिमुच्य सर्व्वमपरं रत्नत्रयं निर्मलं
कुर्व्वाणो भृशमात्मनः सुहृदसावात्मप्रवृत्तोऽन्यथा ।
वैरी दुःसहजन्मगुप्तिभवने क्षिप्त्वा सदा यत्नेय-
त्यालोच्येति स तत्र जन्मचकितैः कार्यः स्थिरः कोविदैः ४७
मूढः संपद्विष्ठितो न विपदं संपत्तिविध्वंसिनीं
दुर्व्वारां जनमर्दनीमुपयतीमात्मात्मनः पश्यति ।
वृक्षव्याघ्रतरक्षुपन्नगमृगव्याधादिभिः संकुले
कक्षं वृक्षगतां हुताशनशिखां प्लोष्यन्तीमिव ॥ ४८ ॥
आत्मात्मानमशेषबाह्यविकलं व्यालोकयन्नात्मना
दुष्प्रापां परमात्मतामनुपमामापद्यते निश्चितं ।

१ निरवधि । २ वर्तिष्ठते । ३ पादपवत् ।

आत्मानं घनरूढकीचकचयः किं घर्षयन्नात्मना
वन्हित्वं प्रतिपद्यते न तरसा दुर्वारतेजोमयं ॥ ४९ ॥

व्यासक्तो निजकायकार्यकरणे यः सर्व्वदा यायते
मूढात्मा स कदाचनापि कुरुते नात्मीयकार्योद्यमं ।
दुर्वारेण नरेश्वरेण महति स्वार्थे हठाद्योजिते
भीतात्मा न कथंचनाऽपि तनुते कार्यं स्वकीयं जनः ॥५०॥

लक्ष्मीकीर्तिकलाकलापललनासौभाग्यभोग्योदया-
स्त्यज्यन्ते स्फुटमात्मनेह सकला एतैः सतामर्ज्जितैः ।
जन्मांभोधिनिमज्जिकर्मजनकैः किं साध्यते कांक्षितं
यत्कृत्वा परिमुच्यते न सुधियस्तत्रादरं कुर्व्वते ॥५१॥

हेया [पा] देयविचारणाऽस्ति न यतो न श्रेयसामागमो
वैराग्यं न न कर्म्मपर्व्वतभिदा नाप्यात्मतत्त्वस्थितिः ।
तत्कार्यं न कदाचनापि सुधियः स्वार्थोद्यताः कुर्व्वते
शीते जातु तुतुत्सवो न शिखिनं विध्यापयंते बुधाः ॥५२॥

कामक्रोधविषादमत्सरमदद्वेषप्रमादादिभिः
शुद्धध्यानविवृद्धिकारिमनसः स्थैर्यं यतः क्षिप्यते ।
काठिन्यं परितापदानचतुरैर्हेमो हुताशैरिव
त्याज्या ध्यानविधायिभिस्तत इमे कामादयो दूरतः ॥५३॥

व्यावृत्त्येन्द्रियगोचरोरुगहने लोलं चरिष्णुं चिरं
दुर्वारं हृदयोदरे स्थिरतरं कृत्वा मनोमर्कटं
ध्यानं ध्यायति मुक्तये भ्रमतेर्निर्मुक्तभोगस्पृहो
नोपायेन विना कृता हि विधयः सिद्धिं लभंते ध्रुवं ॥५४॥

चंद्रार्कग्रहतारकाप्रभृतयो यस्य व्यपायेऽखिला
जायंते भुवनप्रकाशकुशला ध्वांतप्रतानोपमाः ।
यद्विज्ञानमयप्रकाशविशदं यद्ध्यायते योगिभि-
स्तत्तत्वं परिचिंतनीयममलं देहस्थितं निश्चिलं ॥५५॥

मर्त्यं वेत्स्यशरीरमंदिरमिदं ? मृत्युद्विपेन्द्रः क्षणा-
दित्युच्छ्वासमिषेण मानसबहिर्निर्गत्य निर्गल्य किं ।
पश्यंतं न निरीक्षसेऽतिचकितं तस्यागतिं चेतनां
वंचनामरचेष्टितानि कुरुषे निर्धर्म्मकर्माधमं ॥५६॥

करिष्यामीदं कृतमिदमिदं कृत्यमधुना
करोमीति व्यग्रं नयसि सकलं कालमफलं ।
सदा रागद्वेषप्रचयनपरं स्वार्थविमुखं
न जैनेऽविकृत्वे वचसि रमसे निर्वृतिकरे ॥ ५७ ॥

कुर्वाणोऽपि निरंतरामनुदिनं बाधां विरुद्धक्रियां
धर्मारोपितमानसैर्न रुचिभिर्व्यापद्यते कश्चन ।
धर्म्मापोढधियः परस्परमिमे निघ्नंति निष्कारणं
यत्तद्धर्ममपास्य नास्ति भुवने रक्षाकरं देहिनां ॥ ५८ ॥

नानारंभपरायणैर्नरवरैरानर्घ्यं यस्त्यज्यते
दुःप्राप्योऽपि परिग्रहस्तृणमिव प्राणप्रयाणे पुनः ।
आदावेव विमुंच दुःखजनकं तत्त्वं त्रिधा दूरत-
श्चेतो मस्करिमोदकव्यसिकरं हास्यास्पदं मा व्यधाः ॥५९॥

स्वाभिप्रायवशाद्विभिन्नगतयो ये भ्रातृपुत्रादय-
स्तांस्त्वं मीलयितुं करोषि सततं चित्तप्रयासं वृथा

गच्छंतः परमाणवो दश दिशः कल्पांतवातेरिताः
  शक्यंते न कदाचनापि पुरुषैरेकत्र कर्तुं ध्रुवं ॥ ६० ॥

भोजंभोजमपाकृता हृदय ! ये भोगास्त्वयाऽनेकधा
  तांस्त्वं कांक्षसि किं पुनः पुनरहो तत्राऽग्निनिक्षेपिणः ।
तृप्तिस्तेषु कदाचिदस्ति तव नो तृष्णोदयं बिभ्रतो
  देशे चित्रमरीचिसंचयचिते वल्ली कुतो जायते ॥ ६१ ॥

शूरोऽहं शुभधीरहं पटुरहं सर्वाऽधिकश्रीरहं
  मान्योऽहं गुणवानहं विभुरहं पुंसामहमग्रणीः ।
इत्यात्मन्नपहाय दुष्कृतकरीं त्वं सर्वथा कल्पनां
  शश्वद्ध्याय तदात्मतत्त्वममलं नैःश्रेयसी श्रीर्यतः ॥ ६२ ॥

धृतविविधकषायग्रंथलिंगव्यवस्थं
  यदि यतिनिकुरुंबं जायते कर्मरिक्तं ।
भवति ननु तदानीं सिंहपोताऽविदार्यं ?
  शशकनलककुंभे हस्तियूथं प्रविष्टं ॥ ६३ ॥

कष्टं वंचनकारिणीष्वपि सदा नारीषु तृष्णा पराः
  शर्म्माशां न कदाचनाऽपि कुधियो मर्त्या विपर्याशया ।
मुंचंते मृगतृष्णिकास्विव मृगाः पानीयकांक्षा यतो
  धिक्तं मोहमनर्थदानकुशलं पुंसामनार्योदयं ॥ ६४ ॥

पापाऽनोकुहसंकुले भववने दुःखादिभिर्दुर्गमे
  यैरज्ञानवशः कषायविषयैस्त्वं पीडितोऽनेकधा ।
रे तान् ज्ञानमुपेत्य पूतमधुना विध्वंसयाऽशेषतो
  विद्वांसो न परित्यजंति समये शत्रूनऽहत्वा स्फुटं ॥ ६५ ॥

असिमसिकृषिविद्याशिल्पवाणिज्ययोगै-
स्तनुधनसुतहेतोः कर्म्म यादकरोषि ।
सकृदपि यदि तादृक् संयमार्थं विधत्से
सुखममलमनंतं किं तदा नाश्नुषेऽलं ॥ ६६ ॥
सुखजननपटूनां पावनानां गुणानां
भवति सपदि कर्त्ता सर्व्वलोकोपरिस्थः ।
त्रिदशशिखरिमूर्धाऽधिष्ठितस्येह पुंसः
स्वयमवनिरधस्ताज्जायते नाखिला किं ॥६७॥
दिनकरकरजाले शैत्यमुष्णत्वमिंदोः
सुरशिखरिणि जातु प्राप्यते जंगमत्वं ।
न पुनरिह कदाचिद् घोरसंसारचक्रे
स्फुटमसुखनिधाने भ्राम्यता शर्म्म पुंसा ॥६८॥
कार्यैः कर्म्मविनिर्मितैर्बहुविधैः स्थूलाणुदीर्घादिभि-
र्नात्मा याति कदाचनापि विकृतिं संबध्यमानः स्फुटं ।
रक्तारक्तसितासितादिवसनैरावेष्टमानोऽपि किं
रक्तारक्तसितासितादिगुणितामापद्यते विग्रहः ॥६९॥
गौरो रूपधरो दृढः परिदृढः स्थूलः कृशः कर्कशो
गीर्वाणो मनुजः पशुर्नरकभूः षंढः पुमानंगना ।
मिथ्या त्वं विदधासि कल्पनमिदं मूढोऽविबुध्यात्मनो
नित्यं ज्ञानमयस्वभावममलं सर्व्वव्यपायच्युतं ॥७०॥
सर्व्वारंभकषायसंगरहितं शुद्धोपयोगोद्यतं
तद्रूपं परमात्मनो विकलिलं बाह्यव्यपेक्षाऽतिगं ।

तन्निःश्रेयसकारणाय हृदये कार्यं सदा नापरं
कृत्यं क्वापि चिकीर्षवो न सुधियः कुर्वंति तद्ध्वंसकं ॥७१॥
यो जागर्ति शरीरकार्यकरणे वृत्तौ विधत्ते यतो
हेयादेयविचारशून्यहृदये नात्मक्रियायामसौ ।
स्वार्थं लब्धुमना विमुंचतु ततः शश्वच्छरीरादरं
कार्यस्य प्रतिबंधके न यतते निष्पत्तिकामः सुधीः ॥७२॥
भीतं मुंचति नांतको गतघृणो भैषीद्वृथा मा ततः
सौख्यं जातु न लभ्यतेऽभिलषितं त्वं माभिलाषीरिदं ।
प्रत्यागच्छति शोचितं न विगतं शोकं कृथा मा वृथा
प्रेक्षापूर्वविधायिनो विदधते कृत्यं निरर्थं कथं ॥७३॥
स्वस्थे कर्म्मणि शाश्वते विकलिले विद्वज्जनप्रार्थिते
संप्राप्ये रहसात्मना स्थिरधिया त्वं विद्यमाने सति ।
बाह्यं सौख्यमवाप्तुमंतविरसं किं खिद्यसे नश्वरं ।
रे सिद्धे शिवमंदिरे सति चरौ मा मूढ! भिक्षां भ्रमः ॥७४॥
अभिलषति पवित्रं स्थावरं शर्म लब्धु--
धनपरिजनलक्ष्मीं यः स्थिरीकृत्य मूढः ।
जिगमिषति पयोधेरेष पारं दुरापं
प्रलयसमयवीचीं निश्चलीकृत्य शंके ॥ ७५ ॥
ये दुःखं वितरंति घोरमनिशं लोकद्वये पोषिता
दुर्वारा विषयारयो विकरुणाः सर्वांगशर्म्मापहाः ।
प्रोच्यंते शिवकांक्षिभिः कथमसी जन्मावलीवर्द्धिनो
दुःखोद्रेकविवर्धनं न सुधियः कुर्वंति शर्म्मार्थिनः ॥७६॥

कुर्वाणः परिणाममेति विमलं स्वर्गापवर्गश्रियं
प्राणीकश्मलमुग्रदुःखजनिकां शुभ्रादिरीतिं यतः।
गृह्णाना ? परिणाममाद्यमपरं मुंचंति संतस्ततः
कुर्वंतीह कुतः कदाचिदहितं हित्वा हितं धीधनाः ॥७७॥
नरकगतिमशुद्धैः सुंदरैः स्वर्गवासं
शिवपदमनवद्यं याति शुद्धैरकर्मा।
स्फुटमिह परिणामैश्चेतनः पोष्यमानै–
रिति शिवपदकामैस्ते विधेया विशुद्धाः॥ ७८॥
श्वभ्राणामविसह्यमंतरहितं दुर्जल्पमन्योन्यजं
दाहच्छेदविभेदनादिजनितं दुःखं तिरश्चां परं।
नृणां रोगवियोगजन्ममरणं स्वर्गौकसां मानसं।
विश्वं वीक्ष्य सदेति कष्टकलितं कार्यामतिर्मुक्तये॥ ७९॥
कार्यं रूपमिव क्षणेन सलिले सांसारिकं सर्वथा
सर्वं नश्यति यत्नतेऽपि रचितं कृत्वाऽश्रमं दुष्करं।
यत्तत्रापि विधीयते बत! कुतो मूढ! प्रवृत्तिस्त्वया
कृत्ये क्वापि हि केवलश्रमकरे न व्याप्रियंते बुधाः॥ ८०॥
चित्रोपद्रवसंकुलामुरुमलां निःस्वस्थतां संसृतिं
मुक्तिं नित्यनिरंतरोन्नतसुखामापत्तिभिर्वर्जितां।
प्राणी कोपि कषायमोहितमतिर्नो तत्त्वतो बुध्यते
मुक्त्वा मुक्तिमनुत्तमामपरथा किं संसृतौ रज्यते॥८१॥
रे दुःखोदयकारणं गुरुतरं बध्नंति पापं जनाः
कुर्वाणा महकांक्षया बहुविधा हिंसापराः सत्क्रियाः।

नीरोगत्वचिकीर्षया विदधतो नापथ्ययुक्तीरमी
सर्वांगीणमहो व्यथादयकरं किं यांति रोगोदयं ॥ ८२ ॥

रौद्रैः कर्म्म महारिभिर्निरव ? वने योगिन् ! विचित्रैश्चिरं
नायं नायमवापितस्त्वमसुखं यैरुच्चकैर्दुःसहं ।
तान् रत्नत्रयभावनासिलतया न्यक्कृत्य निर्म्मूलतो
राज्यं सिद्धिमहापुरेऽनघसुखं निष्कंटकं निर्विश ॥ ८३ ॥

यो बाह्यार्थं तपसि यतते बाह्यमाप्नोतेऽसौ
यस्त्वात्मार्थं लघु स लभते पूतमात्मानमेव ।
न प्राप्यन्ते क्वचन कलमाः कोद्रवे रोप्यमाणे--
र्विज्ञायेत्थं कुशलमतयः कुर्वते स्वार्थमेव ॥८४॥

कांतासद्मशरीरजप्रभृतयो ये सर्वथाऽप्यात्मनो
भिन्नाः कर्मभवाः समीरणचला भावाबहिर्भाविनः ।
तैः संपत्तिमिहात्मनो गतधियो जानंति ये शर्म्मदां
स्वं संकल्पवसेन ते विदधते नाकीशलक्ष्मीः स्फुटं ॥ ८५ ॥

यद्भक्तानां भवति भुवने कर्म्मबंधाय पुंसां
नीरागाणां कलिमलमुखे तद्धि मोक्षाय वस्तु ।
यन्मृत्यर्थं दधिगुडघृतं संनिपाताकुलानां
नीरोगाणां वितरति परां तद्धि पुष्टिं प्रकृष्टां ॥८६॥

सम्यग्दर्शनबोधसंयमतपःशीलादिभाजोपि नो
संक्लेशो विनिवर्तते भवभृतो लोभानलं बिभ्रतः ।
बिभ्राणस्य विचित्ररत्ननिचितं दुष्पाप पारंपयः
संतापं किमुदन्वतो न कुरुते मध्यस्थितो वाडवः ॥ ८७ ॥

मोहांधानां स्फुरति हृदये बाह्यमात्मीयबुद्ध्या
निर्मोहानां व्यपगतमलः शाश्वदात्मैव नित्यः ।
यत्तद्भेदं यदि विविदिषा ते स्वकीयं स्वकीयै-
र्मोहं चित्त ! क्षपयसि तदा किं न दुष्टं क्षणेन ॥ ८८ ॥

स्वात्मारोपितशीलसंयमभरास्त्यक्तान्यसाहायकाः
कायेनापि विलक्षमाणहृदयाः साहायकं कुर्वते ।
तप्यंते परदुष्करं गुरुतपस्तत्रापि ये निस्पृहा
जन्मारण्यमतीत्य भूरिभयदं गच्छंति ते निर्वृतिं ॥ ८९ ॥

पूर्वं कर्म करोति दुःखमशुभं सौख्यं शुभं निर्मितं
विज्ञायेत्यशुभं निहंतुमनसो ये पोषयंते तपः ।
जायंते समसंयमैकनिधयस्ते दुर्लभा योगिनो
ये त्वत्रोभयकर्मनाशनपरास्तेषां किमत्रोच्यते ॥ ९० ॥

विच्छेद्यं यदुदीर्य कर्मरभसा संसारविस्तारकं
साधूनामुदयागतं स्वयमदं विच्छेदने कः श्रमः ।
यो गत्वा विजिगीषुणा बलवता वैरी हठाद्धन्यते
नाहत्वा गृहमागतः स्वयमसौ संत्यज्यते कोविदैः ॥ ९१ ॥

व्रजति भृशमधस्ताद्गृह्यमाणेऽर्थजाते
गतभरमुपरिष्टात्तत्र संत्यज्यमाने ।
हतकहृदयतद्वयेन ? यद्वत्तुलाग्रं
जहिहि दुरितहेतुं तेन संगं त्रिधापि ॥ ९२ ॥

सद्यो हंति दुरंतसंसृतिकरं यत्पूर्वकं पातकं
शुद्ध्यर्थं विमलं विधाय मलिनं तत्सेवते यस्तपः ।

शुद्धिं याति कदाचनापि गतधीर्नासाव्यावर्जकं ?
एकीकृत्य जलं मलाचिततनुः स्नातः कुतः शुद्ध्यति ॥९३॥

लब्ध्वा दुर्लभभेदयोः सपदि ये देहात्मनोरंतरं
दग्ध्वा ध्यानहुताशनेन मुनयः शुद्धेन कर्मेंधनं ।
लोकालोकविलोकिलोकनयना भूत्वा त्रिलोकार्चिताः
पंथानं कथयंति सिद्धिवसतेस्ते संतु नः शुद्धये ॥ ९४ ॥

येषां ज्ञानकृशानुरुज्वलतरः सम्यक्त्ववातेरितो
विस्पष्टीकृतसर्व्वतत्त्वसमितिर्दग्धे विपापैधसि ।
दत्तोत्तसिमनस्तमस्ततिहतिर्देदीप्यते सर्व्वदा
नाश्चर्यं रचयंति चित्रचरिताश्चारित्रिणः कस्य ते ॥ ९५ ॥

यावच्चेतसि बाह्यवस्तुविषयः स्नेहः स्थिरो वर्तते
तावन्नश्यति दुःखदानकुशलः कर्मप्रपंचः कथं ।
आर्द्रत्वे वसुधातलस्य सजटाः शुष्यंति किं पादपा
मृत्स्नातापनिपातरोधनपराः शाखोपशाखान्विताः ॥९६॥

चक्री चक्रमपाकरोति तपसे यत्तन्न चित्रं सतां
सूरीणां यदनश्वरीमनुपमां दत्ते तपः संपदं
तच्चित्रं परमं यदत्र विषयं गृह्णाति हित्वा तपो
दत्तेऽसौ यदनेकदुःखमवरे भीमे भवांभोनिधौ ॥९७॥

रामाः पापा विरामास्तनयपरिजना निर्मिता वह्नन्यर्था
गात्रं व्याध्याभिपात्रं जितपवनजवा मूढलक्ष्मीरशेषा
किं रे दृष्टं त्वयात्मन् ! भवगहनवने भ्राम्यता सौख्यहेतु-
र्येन त्वं स्वार्थनिष्ठो भवसि न सततं बाह्यमत्यस्य सर्व्वं ॥९८

सम्यक्त्वज्ञानवृत्तत्रयमनघमृते ज्ञानमात्रेण मूढा
लंघित्वा जन्मदुर्गं निरुपमितसुखां ये यियासंति सिद्धिं ।
ते सिश्रीषंति नूनं निजपुरमुदधिं बाहुयुग्मेन तीर्त्वा
कल्पांतोद्भूतवातक्षुभितजलचरासारकीर्णान्तरालं ॥ ९९ ॥

ये ज्ञात्वा भवमुक्तिकारणगणं बुद्ध्या सदा शुद्धया
कृत्वा चेतसि मुक्तिकारणगणं त्रेधा विमुच्यापरं ।
जन्मारण्यनिसूदनक्षमभरं जैनं तपः कुर्वते
तेषां जन्म च जीवितं च सकलं पुण्यात्मनां योगिनां॥१००॥

यो निःश्रेयसशर्म्मदानकुशलं संत्यज्य रत्नत्रयं
भीमं दुर्गमवेदनोदयकरं भोगं मिथः सेवते
मन्ये प्राणविपर्ययादिजनकं हालाहलं वल्भते
सद्यो जन्मजरांतकक्षयकरं पीयूषमत्यस्य सः ॥१०१॥

भवति भविनः सौख्यं दुःखं पुराकृतकर्मणः
स्फुरति हृदये रागो द्वेषः कदाचन मे कथं ।
मनसि समतां विज्ञायेत्थं तयोर्विदधाति यः
क्षपयति सुधीः पूर्वं पापं चिनोति न नूतनं ॥ १०२ ॥

क्षपयितुमनाः कर्म्मनिष्टं तपोभिरनिंदितै-
र्नयति रभसा वृद्धिं नीचः कषायपरायणः ।
बुधजनमतैः किं भैषज्यैर्निसूदितुमुद्यतः
प्रथयति गदं तं नापथ्यात् कदर्थितविग्रहं ॥ १०३ ॥

सद्रत्नत्रयपोषणाय वपुषस्ताज्यस्य रक्षा परा
दत्तंयेऽशनमात्रकं गतमलं धर्म्मार्थिभिर्दातृभिः ।

लज्जंते परिगृह्य मुक्तिविषये बद्धस्पृहा निस्पृहा-
स्ते गृह्णन्ति परिग्रहं दमधराः किं संयमध्वंसकं ॥ १०४ ॥
ये लोकोत्तरते च दर्शनपरां दूतीं विमुक्तिश्रिये
रोचंते जिनभारतीमनुपमां जल्पंति शृण्वंति च
लोके भूरिकषायदोषमलिने ते सज्जना दुर्लभा
ये कुर्व्वंति तदर्थमुत्तमधियस्तेषां किमत्रोच्यते ॥१०५॥
ये स्तुत्यां जन्मसिंधोरसुखमितिततेर्लीलया तारयित्वा
नित्यं निर्वाणलक्ष्मीं बुधसमितिमतां निर्मलामर्प्पयंते ।
स्वाधीनास्तेऽपि यत्तद्व्यपगतमतिभिर्ज्ञानसम्यक्त्वपूर्व्वाः
पोष्यंते नान्यपेक्षां मम परममुभौ विद्यते नात्र चित्रं ॥१०६॥
ध्रुवापायः कायः परिभवभवाः सर्वविभवाः
सदानार्या भार्याः स्वजनतनयाः कार्यविनयाः
असारे संसारे विगतशरणे दत्तमरणे
दुराराधे गाधे किमपि सुखदं नापदपदं ॥ १०७ ॥
असुरसुरत्रिभूनां हंति कालः श्रियं यो
भवति न मनुजानां विघ्नतस्तस्य खेदः
विचलयति गिरीणां चूलिकां यः समीरो
गृहशिखरपताका कंपते किं न तेन ॥ १०८ ॥
सकललोकमनोहरणक्षमाः
करणयौवनजीवितसंपदः
कमलपत्रपयोलवचंचलाः
किमपि न स्थिरमस्ति जगत्त्रये ॥ १०९ ॥
बलवतो महिषाधिपवाहनो
निरुनिलिंपपतीनपहंति यः

अपरमानववर्गविमर्दने,
भवति तस्य कदाचन न श्रमः ? ॥ ११० ॥
स्वजनसंगतिरेव विलाविनी
भवति यौवनिका जरसा रसा।
विपदवैति सखी वच संपदं
किमपि शर्मविधायि न दृश्यते ? ॥१११॥
सचिवमंत्रिपदातिपुरोहिता
स्त्रिदशखेचरदैत्यपुरंदराः ।
यमभटेन पुरस्कृतमातुरं
भवभृतं प्रभवंति न रक्षितुं ॥ ११२ ॥
वलकृतोऽशनतोपि विपद्यते
यदि जनो न तदापरथः कथं ।
यदि निहंति शिशुं जननी हिता
न परमस्ति तदा शरणं ध्रुवं ॥ ११३ ॥
विविधसंग्रहकल्मषमंगिनो
विदधतेंगकुटुंबकहेतवे ।
अनुभवंत्यसुखं पुनरेकका
नरकवासमुपेत्य सुदुस्सहं ॥ ११४ ॥
वसनवाहनभोजनमंदिरैः
सुखकरैश्चिरवासमुपासितं ।
व्रजति यत्र समं न कलेवरं
किमपरं चल ! तत्र गमिष्यति ॥११५॥
खचरनागसदो दमयंति ये
कथममी विषया न परं नरं ।

समददंतिमदं दलयंति ये
न हरिणं हरयो रहयंति ते ॥११६॥
मरणमेति विनश्यति जीवितं
द्युतिरटौति जरा परिवर्द्धते
प्रचुरमोहपिशाचवशीकृत-
स्तदपि नात्महिते रमते जनः ॥११७॥
जननमृत्युजरा नलदीपितं
जगदिदं सकलोऽपि विलोकते।
तदपि धर्म्ममतिं विदधाति नो
रमना विषयाकुलितो जनः ॥११८॥
कश्चन भजति धर्म्मं काप्यधर्म्मं दुरंतं
कश्चिदुभयमनेकं शुद्धबोधोऽपि गेही
कथमिति गृहवासः शुद्धिकारी मलाना-
मिति विमलमनस्कैस्त्यज्यते स त्रिधापि ॥११९॥
सर्वज्ञः सर्वदर्शी भवमरणजरातंकशोकव्यतीतो
लब्धात्मीयस्वभावः क्षतसकलमलः शश्वदात्मानपायः।
दक्षैः संकोचिताक्षैर्भवमृतिचकितैर्लोकयात्रानपेक्षै-
र्नष्टाबाधारमनीनस्थिरविशदसुखप्राप्तये चिंतनीयः ॥१२०॥
वृत्तविंशशतेनेति कुर्वता तत्त्वभावनां।
सद्योऽमितगतेरिष्टा निर्वृतिः क्रियते करे॥ १२१ ॥

इति द्वितीयभावना समाप्ता। *

---

* अस्याप्येव 'प्रेसकापी' संगता नापि प्रायोऽशुद्धा एव।

सिरिपउमणंदिमुणिणा रइयं

# धम्म-रसायणं ।

णमिऊण देवदेवं धरणिंदणरिंदइंदथुयचलणं ।
णाणं जस्स अणंतं लोयालोयं पयासेइ ॥ १ ॥

नत्वा देवदेवं धरणेन्द्रनरेन्द्रेन्द्रस्तुतचरणं ।
ज्ञानं यस्यानन्तं लोकालोकं प्रकाशयति ॥

बुहजणमणोहिरामं जाइजरामरणदुक्खणासयरं ।
इहपरलोयहिज (द)त्थं तं धम्मरसायणं वोच्छं ॥ २ ॥

बुधजनमनोऽभिरामं जातिजरामरणदुःखनाशकरं ।
इहपरलोकहितार्थं तं धर्मरसायनं वक्ष्ये ॥

धम्मो तिलोयबंधू धम्मो सरणं हवे तिहुयणस्स ।
धम्मेण पूयणीओ होइ णरो सव्वलोयस्स ॥ ३ ॥

धर्मः त्रिलोकबन्धुः धर्मः शरणं भवेत् त्रिभुवनस्य ।
धर्मेण पूजनीयः भवति नरः सर्वलोकस्य ॥

धम्मेण कुलं विउलं धम्मेण य दिव्वरूवमारोग्गं ।
धम्मेण जए कित्ती धम्मेण होइ सोहग्गं ॥ ४ ॥

धर्मेण कुलं विपुलं धर्मेण च दिव्यरूपमारोग्यं ।
धर्मेण जगति कीर्तिः धर्मेण भवति सौभाग्यं ॥

वरभवणजाणवाहणसयणासणयाणभोयणाणं च ।
वरजुवइवत्थभूसण संपत्ती होइ धम्मेण ॥ ५ ॥

वरभवनयानवाहनशयनासनयानभोजनानां च ।
वरयुवतिवस्त्रभूषणानां संप्राप्तिः भवति धर्मेण ॥

तं णत्थि जं ण लब्भइ धम्मेण कएण तिहुयणे सयले ।
जो पुण धम्मदरिद्दो सो पावइ सव्वदुक्खाइं ॥ ६ ॥

तन्नास्ति यन्न लभते धर्मेण कृतेन त्रिभुवने सकले ।
यः पुनः धर्मदरिद्रः स प्राप्नोति सर्वदुःखानि ॥

जो धम्मं ण करंतो इच्छइ सुक्खाइं कोइ णिब्बुद्धी ।
सो पीलऊण सिकयं इच्छइ तिल्लं णरो मूढो ॥ ७ ॥

यो धर्ममकुर्वन् इच्छति सुखानि कश्चित् निर्बुद्धिः ।
स पीलयित्वा सिकतामिच्छति तैलं नरो मूढः

सव्वो वि जणो धम्मं घोसइ[1] ण य कोइ जाणइ अहम्मं ।
धम्माधम्मविसेसं[2] णाऊण णरेण घेतव्वं ॥८॥

सर्वोऽपि जनः धर्मं घोषयति न च कश्चिज्जानाति अधर्मं ।
धर्माधर्मविशेषं ज्ञात्वा नरेण गृहीतव्यं ।

खीराइं जहा लोए सरिसाइं हवंति वण्णणामेण ।
रसभेएण य ताइं वि णाणागुणदोसजुत्ताइं ॥ ९ ॥

क्षीराणि यथा लोके सदृशानि भवन्ति वर्णनामभ्यां ।
रसभेदेन च तान्यपि नानागुणदोषयुक्तानि ॥

काइं वि खीराइं जए हवंति दुक्खावहाणि जीवाणं ।
काइं वि तुट्ठिं पुट्ठिं करंति वरवण्णमारोग्गं ॥ १० ॥

कान्यपि क्षीराणि जगति भवन्ति दुःखप्रदानि जीवानां ।
कान्यपि तुष्टिं पुष्टिं कुर्वन्ति वरवर्णमारोग्यम् ॥

---

१ घोसय णइ पुस्तके पाठः । २ धम्मधम्म पुस्तके पाठः ।

धम्मा य तहा लोए अणेयभेया हवंति णायव्वा।
णामेण समा सव्वे गुणेण पुण उत्तमा केई ॥ ११ ॥

धर्माश्च तथा लोके अनेकभेदा भवन्ति ज्ञातव्याः।
नाम्ना समाः सर्वे गुणेन पुनरुत्तमाः केचित् ॥

पावंति केइ दुक्खं णारयतिरियक्कुमाणुस्सजोणीसु।
पावंति पुणो दुक्खं केई पुणु हीणदेवत्ते ॥ १२ ॥

प्राप्नुवन्ति केचिद्दुःखं नारकतिर्यक्कुमानुषयोनिषु।
प्राप्नुवन्ति पुनर्दुःखं केचित् पुनः हीनदेवत्वे ॥

पावंति केइ धम्मादो माणुससोक्खाइं देवसोक्खाइं।
अव्वाबाहमणोवमअणंतसोक्खं च पावंति ॥ १३ ॥

प्राप्नुवन्ति केचिद्धर्मतः मानुषसौख्यानि देवसौख्यानि।
अव्याबाधमनुपमानन्तसौख्यं च प्राप्नुवन्ति ॥

तम्हा हु सव्वधम्मा परिक्खियव्वा णरेण कुसलेण
सो धम्मो गहियव्वो जो दोसेहिं विवज्जिओ विमलो॥१४॥

तस्माद्धि सर्वधर्माः परीक्षितव्या नरेण कुशलेन।
स धर्मो गृहीतव्यो यो दोषैर्विवर्जितो विमलः ॥

जत्थ वहो जीवाणं भासिज्जइ जत्थ अलियवयणं च।
जत्थ परदव्वहरणं सेविज्जइ जत्थ परयाणं ॥ १५ ॥

यत्र वधो जीवानां भाष्यते यत्रालीकवचनं च।
यत्र परद्रव्यहरणं सेव्यते यत्र पराङ्गना ॥

बहुआरंभपरिग्गहगहणं संतोसवज्जियं जत्थ।
पंचुंबरमहुमांसं भक्खिज्जइ जत्थ धम्मम्मि ॥ १६ ॥

बह्वारंभपरिग्रहग्रहणं सन्तोषवर्जितं यत्र।
पंचोदुम्बरमधुमांसानि भक्ष्यंते यत्र धर्मे ॥

डंभिज्जइ जत्थ जणो पिज्जइ मज्जं च जत्थ बहुदोसं ।
इच्छंति सो वि धम्मो केइ य अण्णाणिणो पुरिसा ॥ १७ ॥
दम्भ्यते यत्र जनः पीयते मद्यं च यत्र बहुदोषं ।
इच्छान्ति तमपि धर्मं केचिच्च अज्ञानिनः पुरुषाः ॥

जइ एरिसो वि धम्मो तो पुण सो केरिसो हवे पावो ।
जइ एरिसेण सग्गो तो णरयं गम्मए केण ॥ १८ ॥
यद्येतादृशोऽपि धर्मस्तर्हि पुनः सत्कीदृशं भवेत्पापं ।
यद्येतादृशेन स्वर्गः तर्हि नरके गम्यते केन ॥

जो एरिसियं धम्मं किज्जइ इच्छेइ सोक्ख भुंजेउं ।
वाविसा णिंबफलं सो इच्छइ अंबफलाइं ॥ १९ ॥
य एतादृशं धर्मं करोति इच्छति सौख्यं भोक्तुं ।
उप्त्वा निम्बफलं स इच्छति आम्रफलानि ॥

धम्मोत्ति भण्णमाणो करेइ जो एरिसं महापावं ।
सो उप्पज्जइ णरए अणेयदुक्खावहे भीमे ॥ २० ॥
धर्म इति मन्यमानः करोति यः एतादृशं महापापं ।
स उत्पद्यते नरके अनेकदुःखपथे भीमे ॥

तत्थुप्पण्णं संतं सहसा तं पिक्खिऊण णेरइया ।
सरिऊण पुव्ववइरं धावंति समंतदो भीमा ॥ २१ ॥
तत्रोत्पन्नं सन्तं सहसा तं प्रेक्ष्य नारकाः ।
स्मृत्वा पूर्ववैरं धावन्ति समन्ततो भीमाः ॥

असिसुफरसमोग्गरसत्तितिसूलेहिं सेल्लकोंतेहिं ।
कोहेण पज्जलंता पहरंति सरीरयं तस्स ॥ २२ ॥
असिसुफरशमुद्गरशक्तित्रिशूलैः शेल्लकुन्तैः ।
क्रोधेन प्रज्वलन्तः प्रहरंति शरीरकं तस्स ॥

गदापहारविद्धो मुच्छं गंतूण महियले पडइ ।
अइकंटएहिं तत्थ विभिज्जइ तिक्खेहिं सव्वंगं ॥ २३ ॥

गदाप्रहारविद्धः मूर्च्छां गत्वा महीतले पतति ।
अतिकंटकैः तत्र विभिद्यते तीक्ष्णैः सर्वाङ्गं ॥

लद्धूण चेयणाए पुणरवि चिंतेइ किं इमे सव्वे ।
पहरंति मज्झ देहं जंपंता कडुयवयणाइं ॥ २४ ॥

लब्ध्वा चेतनां पुनरपि चिन्तयति किं इमे सर्वे ।
प्रहरन्ति मम देहं जल्पन्तः कटुकवचनानि ॥

देवयपियरणिमित्तं मंतोसहिजागभयणिमित्तेण ।
जं मारिया वराया अणेय जीवा मए आसि ॥२५॥

देवतापितृनिमित्तं मन्त्रौषधियागभयनिमित्तेन ।
ये मारिता बराका अनेकजीवा मया आसन् ॥

जं परिमाणविरहिया परिग्गहा गिण्हिया मए आसि ।
जं खायं महुमंसं पंचुंवर जिव्हलुद्धेण ॥ २६ ॥

यत् परिमाणविरहिताः परिग्रहाः गृहीता मया आसन् ।
यत् खादितं मधुमांसं पंचोदुंबराणि जिव्हालुब्धेन ॥

जं भासियं असच्चं तेणिक्कजं मए कयं आसि ।
जं तिलमेत्तसुहत्थं परदारं सेवियं आसि ॥ २७ ॥

यद्भाषितं असत्यं स्तेनकृत्यं मया कृतं आसीत् ।
यत्तिलमात्रसुखार्थं परदाराः सेविता आसन् ॥

जं पीयं सुरपाणं जं च जणो डंभिओ मए सव्वो ।
तस्स हु पावस्स फलं जं जायं एरिसं दुक्खं ॥ २८॥

यत्पीता सुरा यश्च जनो दंभितो मया सर्वः ।
तस्य हि पापस्य फलं यज्जातं एतादृशं दुःखम् ॥

**णाऊण एव सव्वं पुव्वभवे जं कयं महापावं।**
**अइतिव्ववेयणाओ असहंतो णासए सिग्घं ॥ २९ ॥**

ज्ञात्वैवं सर्वं पूर्वभवे यत्कृतं महापापं।
अतितीव्रवेदनां असहमानः नश्यति शीघ्रं

**सो एवं णासंतो णरइयभयेण असरणो संतो।**
**पइसइ असिपत्तवणे अणेयदुक्खावहे भीमे ॥ ३० ॥**

स एवं नश्यन् नारकभयेन अशरणः सन्।
प्रविशति असिपत्रवनं अनेकदुःखपथे भीमे ॥

**तत्थ वि पडंति उवरिं फलाइं जट्टाइं असहणिज्जाइं।**
**लग्गंति जत्थ गत्ते सइ चुण्णं तत्थ कुव्वंति ॥ ३१ ॥**

तत्रापि पतन्ति उपरि फलानि जटानि असहनीयानि।
लगंति यत्र गात्रे सकृच्चूर्णं तत्र कुर्वन्ति ॥

**पत्ताइं पडंति तहा खंडयधारव्व सुट्ठु तिक्खाइं।**
**ताइं वि छिंदंति पुणो अंगोवंगाइं सव्वाइं ॥ ३२ ॥**

पत्राणि पतन्ति तथा खड्गधारावत् सुष्ठु तीक्ष्णानि।
तान्यपि छिन्दन्ति पुनः अङ्गोपाङ्गानि सर्वाणि ॥

**णीसरिऊं सो तत्थ वि असहंतो एरिसाइं दुक्खाइं।**
**वेएण धावमाणो पव्वयसिहरं समारुहइ ॥ ३३ ॥**

निःसृत्य स ततोऽपि असहमान एतादृशानि दुःखानि।
वेगेन धावन् पर्वतशिखरं समारोहति ॥

**तत्थ वि पव्वयसिहरे णाणाविहसावया परमभीमा।**
**तिक्खणहकुडिलदाढा खादंति सरीरयं तस्स ॥ ३४ ॥**

तत्रापि पर्वतशिखरे नानाविधश्वापदाः परमभीमाः।
तीक्ष्णनखकुटिलदाढाः खादन्ति शरीरं तस्य ॥

**तेसिं भएण पुणो धावंतो उत्तरेइ भूमीए ।**
**गच्छइ वेयरणीए तिण्हाए पीडिओ संतो ॥ ३५ ॥**

तेषां भयेन पुनः धावन् उत्तरति भूमौ ।
गच्छति वैतरण्यां तृष्णया पीडितः सन् ॥

**सुक्को विजिज्झकंठो तत्थ जलं गेण्हिऊण पिवमाणो ।**
**उण्हेण तेण डज्झइ हत्थम्मि मुहम्मि ओठम्मि ॥ ३६ ॥**

शुष्कः विध्यकण्ठः तत्र जलं गृहीत्वा पिबन् ।
उष्णेन तेन दह्यते हस्तेषु मुखे ओष्ठे ॥

**भुक्खाए संतत्तो अलहंतो किंचि अण्णमाहारं ।**
**वेयरणीए कूले गिण्हिव्वा मट्टियं खाइ ॥ ३७ ॥**

बुभुक्षया संतप्तः अलभमानः किंचिदन्नमाहारं ।
वैतरण्याः कूले गृहीत्वा मृत्तिकां खादति ॥

**ताए पुणो वि डज्झइ लोहंगारेहिं पज्जलंताए ।**
**घोराए कडुपाइअपूइयमयसाणगंधाए ॥ ३८ ॥**

तया पुनरपि दह्यते लोहाङ्गारैः प्रज्वलन्त्या ।
घोरया कटुकपूतिमयश्वगन्धया ॥

**सो एवं अच्छंतो णइकूले पिच्छिऊण णाइया ।**
**कडुयाइं जंपमाणा पुणरवि धावंति पाविट्ठा ॥ ३९ ॥**

तमेवं तिष्ठन्तं नदीकूले दृष्ट्वा नारकाः ।
कटुकानि जल्पन्तः पुनरपि धावन्ति पापिष्ठाः ॥

**वेएण वहंताए पत्ततेलव्व पज्जलंताए ।**
**वेयरणीए मज्झे चप्पंति अणप्पवसिया हु ॥ ४० ॥**

वेगेन वहन्त्याः प्रतप्ततैलवत् प्रज्वलन्त्याः ।
वैतरण्या मध्ये प्रविशन्ति अनात्मवशीका हि ॥

**तत्थ वि पावइ दुक्खं डज्झंतो पज्जलंतसलिलेण ।**
**छोडीजंतसरीरो तिक्खाहिँ सिलाहिँ घोराहिँ ॥४१॥**

तत्रापि प्राप्नोति दुःखं दहन् प्रज्वलितसलिलेन ।
स्फुटशरीरः तीक्ष्णाभिः शिलाभिः घोराभिः ॥

**सो एवं बुड्डंतो कह वि किलेसेहि तत्थ णीसरए ।**
**णीसरिओ वि हु संतो धरंति बंधंति णेरइया ॥ ४२ ॥**

स एवं ब्रुडन् कथमपि क्लेशैः ततो निःसरति ।
निःसृतमपि हि सन्तं धरन्ति बध्नन्ति नारकाः ॥

**जस्स रडंतस्स पुणो उण्हाए णिक्खंति सिगदाए ।**
**उद्धरिऊण सदेहं णासइ तं दुक्खमसहंतो ॥ ४३ ॥**

तं रुदन्तं पुनः उष्णायां निखनन्ति सिकतायां ।
उत्थाय स्वदेहं नाशयति तं दुःखमसहमानः ॥

**पुणरवि धरंति भीमा णेरइया तस्स पावयम्मस्स ।**
**मस्सडमच्छियं ? करंति हु दुहंति तह खारयंकम्मि ॥ ४४ ॥**

पुनरपि धरन्ति भीमा नारकास्तं पापकर्माणं ।
.... .... .... .... .... .... .... .... .. ॥

**णीसरिऊण वराओ णासंतो खारयंकमड्डुओ ? ।**
**पुव्वुत्तकमेण पुणो धरंति ते तस्स णारइया ॥ ४५ ॥**

निःसृत्य वराकः नश्यन् .... .... .... .... ।
पूर्वोक्तक्रमेण पुनः धरन्ति ते तं नारकाः ॥

**मरणभयभीरुयाणं जीवाणं जो हु जीवियं हरइ ।**
**णरयम्मि पावयम्मो पावइ तह बहुविहं दुक्खं ॥ ४६ ॥**

मरणभयभीरूणां जीवानां यो हि जीवितं हरति ।
नरके पापकर्मा प्राप्नोति तथा बहुविधं दुःखं ॥

**पीलंति जहा इक्खू जंते छुहिऊण तस्स अवसस्स ।**
**कुव्वंति चुणं ( ण्ण ) चुण्णं सव्वसरीरं मुसंढीहिं ॥ ४७ ॥**

पेलयन्ति यथा इक्षून् यंत्रे निधाय तमवशो ।
कुर्वन्ति चूर्णचूर्णं सर्वशरीरं मुशलैः ।

**चक्केहिं करकचेहिं य अंगं फाडंति रोवमाणस्स ।**
**सिंचंति पापयम्मा पुणरवि खारेण सलिलेण ॥४८॥**

चक्रैः क्रकचैश्च अङ्गं विदारयन्ति रुदत ।
सिंचन्ति पापकर्माणः पुनरपि क्षारेण सलिलेन ॥

**चंपंति सव्वदेहं तिक्खसलाएहिं अग्गिवण्णाहिं ।**
**णहसंधिपएसेसु य भिंदंति जलंति सूईहिं ॥ ४९ ॥**

छिदंति सर्वदेहं तीक्ष्णशलाकाभिः अग्निवर्णाभिः ।
नखसन्धिप्रदेशेषु च भिदन्ति ज्वलंताभिः सूचीभिः ॥

**पाडित्ता भूमीए पाएहि मलंति पावयम्मस्स ।**
**सिंघाडयाण उवरिं अंगे वेएण लोदंति ॥ ५० ॥**

पातयित्वा भूमौ पादैः मलन्ति पापकर्माणं ।
सिंघाटकानामुपरि अंगे वेगेन लोदन्ति ! ॥

**अलियस्स फलेण पुणो गीयाए चंपिदूण पाएहिं ।**
**तस्स य खणंति जीहा समूला हु णारइया ॥ ५१ ॥**

अलीकस्य फलेन पुनः........चंपित्वा पादैः ।
तस्य च खनन्ति जिव्हां समूलां हि नारकाः ॥

**खंडंति दो वि हत्था तेणिकफलेण तिक्खवंसीए ।**
**सूलम्मि छुहंति पुणो णारइया सुट्ठु तिक्खेहिं ॥ ५२ ॥**

खंडयन्ति द्वावपि हस्तौ स्तैन्यफलेन तीक्ष्णवंश्या ।
शूलैः स्पर्शयन्ति पुनः नारकाः सुष्ठु तीक्ष्णैः ॥

परदारस्स फलेण य आलिंगावंति लोहपडिमाओ ।
ताओ डहंति अंगं तत्ताओ अग्गिवण्णाओ ॥ ५३ ॥

परदाराणां फलेन च आलिङ्गयन्ति लोहप्रतिमाः ॥
ताः दहन्ति अंगं तप्ताः अग्निवर्णाः ॥

तत्ताइं भूसणाइं चित्ते परिहावंति अग्गिवण्णाइं ।
ताइ वि डहंति अंगं परमहिला (हि) सेण फलेण ॥ ५४ ॥

तप्तानि भूषणानि चित्ते परिधारयन्ति अग्निवर्णानि ।
तान्यपि दहन्ति अंगं परमहिलाभिलाषेण फलेन ॥

तस्स चडावंति पुणो णारइया कूडसम्मलीयाओ ।
तत्थ वि पावइ दुक्खं फाडिज्जंतम्मि देहम्मि ॥ ५५ ॥

ते आरोहयन्ति पुनः नारकाः कूटशाल्मलिषु ।
तत्रापि प्राप्नोति दुःखं विदारिते देहे ॥

जे परिमाणविरहिया परिग्गहा गेण्हिया भवे अण्णे ।
तेसिं फलेण गरुयं सिलिं चडावंति खंधम्मि ॥ ५६ ॥

ये परिमाणविरहिताः परिग्रहा गृहीता भवे अन्यस्मिन् ।
तेषां फलेन गुरुकां शिलां धरन्ति स्कन्धे ।

पायंति पज्जलंतं महुमज्जफलेण कलयं ? घोरं ।
पंचुंबरफलभक्खणफलेण खावंति अंगारं ॥ ५७ ॥

पाययन्ति प्रज्वलन्तं मधुमद्यफलेन लोहरसं घोरं ।
पंचोदुम्बरफलभक्षणफलेन खादयन्ति अङ्गाराणि ॥

मांसाहारफलेण य सव्वंगं सुहडव्व पोलंति ॥
वल्लूरम्मि पित्तया वा ? कप्पंति अणप्पवसियस्स ॥ ५८ ॥

मांसाहारफलेन च सर्वाङ्गं................ ।
..................कम्पयन्तिअनात्मवशस्य ॥

**कुंभीपागेसु पुणो देहं पचंति पावयम्मस्स ।**
**पीसंति पुणो पावा जं खंधं को वि भोगच्छी ॥ ५९ ॥**

कुंभीपाकेषु पुनः देहं पाचयंति पापकर्मणः।
पेषयंति पुनः पापा यत्स्कन्धं कोऽपि भोगार्थी ? ॥

**भूमीसमं देहं अल्लय चम्मं च तस्स खिल्लित्ता ।**
**धावंति दुट्ठहियया तिक्खतिसूलेहिं णेरइया ॥ ६० ॥**

.........................................

धावन्ति दुष्टहृदयास्तीक्ष्णत्रिशूलैः नारकाः ॥

**खायंति साणसीहावियवग्घा अयमणिहदंतेहिं ।**
**अट्ठावया सियाला मज्जारा किण्हसप्पा य ॥ ६१ ॥**

खादन्ति श्वसिंहवृकव्याघ्रा........दन्तैः।
अष्टापदाः शृगाला मार्जाराः कृष्णसर्पाश्च ॥

**वायस्सगिद्धकंका पिपीलिया तहा डंसा ।**
**मसगा य महुयरीओ जलुआओ तिक्खतुंडाओ ॥ ६२ ॥**

वायसगृध्रकंकाः पिपीलिका मत्कुणास्तथा दंशाः ।
मशकाश्च मधुकर्यः जलूकास्तीक्ष्णतुण्डाः ॥

**दंडंति एक्कपव्वं बहुदंडया हि णारइया ? ।**
**पुव्वकयपावयम्मा भासंता कडुयवयणाओ ॥ ६३ ॥**

दंडयन्ति एकपर्व बहुदंडका हि नारकाः ।
पूर्वकृतपापकर्माणो भाषमाणाः कटुकवचनानि ॥

**णारइयाणं वेरं छेत्तसहावेण होइ पावाणं ।**
**मज्जारमूसयाणं जह वेरं उलसप्पाणं ॥ ६४ ॥**

नारकाणां वैरं क्षेत्रस्वभावेन भवति पापानां ।
मार्जारमूषकानां यथा वैरं नकुलसर्पाणां ॥

सव्वे वि य णेरइया णपुंसया होंति हुंडसंठाणा ।
सव्वे वि भीमरूवा दुल्लेसा दव्वभावेण ॥ ६५ ॥

सर्वेऽपि च नारका नपुंसका भवन्ति हुंडकसंस्थानाः ।
सर्वेऽपि भीमरूपा दुर्लेश्या द्रव्यभावेन ॥

णिरए सहाव दुक्खं होइ सहावेण सीयउण्हे च ।
तह हुंति दुस्सहाओ घोराओ भुक्खतण्हाओ ॥ ६६ ॥

नरके स्वभावेन दुःखं भवति स्वभावेन शीतोष्णे च ।
तथा भवतः दुःसहे घोरे क्षुत्तृष्णे ॥

जइ वि खिविज्जे कोई णरए गिरिरायमेत्तलोहंडं ।
धरणियलमपावंतो उण्हेण विलिज्जए[1] सव्वो ॥ ६७ ॥

यद्यपि क्षिपेत् कश्चित् नरके गिरिराजमात्रलोहखंडं ।
धरणीतलमप्राप्नुवन् उष्णेन विलीयते सर्वः ॥

तित्तियमेत्तो लोहो पज्जलिओ सीयणरयमज्झम्मि ।
जइ पिक्खविज्जे कोई गडिज्ज[2] भूमिमपावंतो ॥ ६८ ॥

तावन्मात्रं लोहं प्रज्वलितं शीतनरकमध्ये ।
यदि प्रक्षिपेत् कश्चित् घनीभवति भूमिमप्राप्नुवन् ॥

णेरयाणं तण्हा तारसिया होइ पावयम्माणं ।
जा सव्वसमुद्देहिं य पीएहिं ण उवसमं जाइ ॥ ६९ ॥

नारकाणां तृष्णा तादृशी भवति पापकर्मणां ।
या सर्वसमुद्रेषु च पीतेषु न उपशमं याति ॥

तारिसिया होइ छुहा णरयम्मि अणोवमा परमघोरा ।
जा तिहुयणे वि सयले खद्धम्मि ण उवसमं जाइ ॥ ७० ॥

तादृशी भवति क्षुत् नरके अनुपमा परमघोरा ।
या त्रिभुवनेऽपि सकले खादिते न उपशमं याति ॥

---

१ द्रवीभवति । २ दवीभूतः ।

चुण्णीकओ वि देहो तक्खणमेत्तेण होइ संपुण्णो ।
तेसिं अउण्णयाले मिच्चू ण होइ पावाणं ॥ ७१ ॥

चूर्णीकृतोऽपि देहस्तत्क्षणमात्रेण भवति सम्पूर्णः ।
तेषामपूर्णकाले मृत्युर्न भवति पापानां ॥

उप्पण्णासमयपहुदी आमरणंतं महंति दुक्खाइं ।
अच्छिणिमीलयमेत्तं सोक्खं ण लहंति णेरइया ॥७२॥

उत्पन्नसमयप्रभृत्यामरणान्तं सहंते दुःखानि ।
अक्षिनिमीलनमात्रं सौख्यं न लभन्ते नारकाः ॥

एवं णरयगईए बहुप्पयाराइं होंति दुक्खाइं ।
बहुकालेण वि ताइं ण य सक्किज्जंति वण्णेउं ॥ ७३ ॥

एवं नरकगतौ बहुप्रकाराणि भवन्ति दुःखानि ।
बहुकालेनापि तानि न च शक्नुवन्ति वर्णयितुं ॥

इदी णरयगइ सम्मत्ता—इति नरकगतिः समाप्ता ।

उव्वरिऊण य जीवो णरयगईदो फलेण पावस्स ।
पुणरवि तिरियगईए पावेइ अणेयदुक्खाइं ॥ ७४ ॥

उद्धृत्य च जीवो नरकगतितः फलेन पापस्य ।
पुनरपि तिर्यग्गत्यां प्राप्नोति अनेकदुःखानि ॥

य (वा) हिज्जइ गुरुभारं णेच्छंतो पिट्टिऊण लोएहिं ।
पुव्वकयम्मो पावयछोडिज्जंतीए पुट्टीए ॥ ७५ ॥

वाह्यते गुरुभारं नेच्छन् ताडयित्वा लोकैः ।
पूर्वकृतकर्मा ..................पृष्ठ्या ।

ताडणतासणदुक्खं बंधण तह णासविंधणं दमणं ।
कण्णछेदणदुक्खं लंछण णिल्लंछणं चेय ॥ ७६ ॥

ताडनत्रासनदु:खं बन्धनं तथा नासावेधनं दमनं ।
कर्णच्छेदनदु:खं लाञ्छनं निर्लाञ्छनं चैव ॥

**सीउण्हं जलवरिसं चउमहिमारुवं छुहा तण्हा ।**
**णाणाविहवाहीओ सहइ तहा दंसमसया य ॥ ७७ ॥**

शीतोष्णे जलवर्षां..........क्षुधां तृष्णां ।
नानाविधव्याधींश्च सहते तथा दंशमशकांश्च ॥

**एइंदिएसु पंचसु अणेयजोणीसु वीरियविहूणो ।**
**भुंजंतो पावफलं चिरकालं हिंडए जीवो ॥ ७८ ॥**

एकेन्द्रियेषु पंचसु अनेकयोनिषु वीर्यविहीनः ।
भुंजानः पापफलं चिरकालं हिण्डते जीवः ॥

**खणणुत्तावणवालणवीहणविच्छेयणाइं दुक्खाइं ।**
**पुव्वकयपावकम्मो सहइ वराओ अणप्पवसो ॥ ७९ ॥**

खननोत्तापनज्वालनव्यजनविच्छेदनादिदु:खानि ।
पूर्वकृतपापकर्मा सहते वराकः अनात्मवशः ॥

**एवं तिरियगइ सम्मत्ता-एवं तिर्यग्गतिः समाप्ता ।**

---

**बहुवेयणाउलाए तिरियगईए भमित्तु चिरकालं ।**
**माणुसहवे वि पावइ पावस्स फलाइं दुक्खाइं ॥ ८० ॥**

बहुवेदनाकुलायां तिर्यग्गतौ भ्रमित्वा चिरकालं ।
मानुषभवेऽपि प्राप्नोति पापस्य फलानि दु:खानि ॥

**पारसियभिल्लबव्बरचंडालकुलेसु पावयम्मेसु ।**
**उप्पज्जिऊण जीवो भुंजइ णिरओवमं दुक्खं ॥ ८१ ॥**

पारसीकभिल्लबर्बरचंडालकुलेषु पापकर्मसु ।
उत्पद्य जीवो भुंक्ते नरकोपमं दु:खं ॥

जइ पावइ उच्चत्तं चिरकालं पाविऊण णीयत्तं ।
तत्थ वि गब्भभयहुदियं ? पावेइ अणेय दुक्खाइं ॥ ८२ ॥

यदि प्राप्नोति उच्चत्वं चिरकालं प्राप्य नीचत्वं ।
तत्रापि गर्भभवानि प्राप्नोति अनेकदुःखानि ॥

जम्मंधमूयबहिरो उप्पज्जइ सो फलेण पावस्स ।
उप्पण्णदिवसपहुदी पीडिज्जइ घोरवाहीहिं ॥ ८३ ॥

जन्मान्धमूकबधिर उत्पद्यते स फलेन पापस्य ।
उत्पन्नदिवसप्रभृतितः पीड्यते घोरव्याधिभिः ॥

णवजोव्वणं पि पत्तो इच्छियसुक्खं ण पावए किंपि ।
गच्छइ जोव्वणकालो सव्वो वि णिरच्छओ तस्स ॥ ८४ ॥

नवयौवनमपि प्राप्तः इच्छितसुखं न प्राप्नोति किमपि ।
गच्छति यौवनकालः सर्वोऽपि निरर्थकस्तस्य ॥

धणुबंधवविप्पहीणो भिक्खं भमिऊण भुंजए णिच्चं ।
पुव्वकयपावयम्मो सुयणो वि ण गच्छए मोक्खं ॥ ८५ ॥

धनबान्धवविप्रहीनो भिक्षां भ्रमित्वा भुंक्ते नित्यं ।
पूर्वकृतपापकर्मा, सुजनोऽपि न गच्छति सौख्यं ॥

पसुमणुयगईए एवं हिंसालियचोरियाइदोसेहिं ।
बहुदुक्खेहिं वराओ चिरकालं पावए जीओ ॥ ८६ ॥

पशुमनुष्यगतौ एवं हिंसालीकचौर्यादिदोषैः ।
बहुदुःखानि वराको चिरकालं प्राप्नोति जीवः ॥

एवं कुमाणुसगई सम्मत्ता-एवं कुमानुषगतिः समाप्ता ।

---

१ सोक्खं वा ।

सव्व ( ण्हु ) वयणवज्जिय बालतवं कुणइ णरो मूढो ।
सो पावेइ वर.......उपरलोण्हीदेवत्तं ॥ ८७ ॥

सर्ववचनं वर्जयित्वा बालतप: करोति नरो मूढः ।
स प्राप्नोति ........................ ॥

दट्ठूण अण्णदेवे महिड्ढिए दिव्ववण्णमारोगं ।
होऊण माणभंगो चित्ते उप्पज्जए दुक्खं ॥ ८८ ॥

दृष्ट्वा अन्यदेवेषु महर्धिकेषु दिव्यवर्णं आरोग्यं ।
भूत्वा मानभंग: चित्ते उत्पद्यते दुःखं ॥

तिलोयसव्वसरणं धम्मो सव्वण्हु भाविओ विमलो ।
तइयामएण गहिओ तेण महंतारिओ एहिं ॥ ८९ ॥

त्रिलोकसर्वशरणं धर्मः सर्वज्ञभावितो विमलः ।
तस्यागमेन गृहीतस्तेन महत्तारकः.......॥

छम्मासाउगसेसे विलाइ माला विणस्सए छाए ।
कंपंति कप्परुक्खा होइ विरागो य भोयाणं ॥ ९० ॥

षण्मासायुष्कशेषे विलीयते माला विनश्यति छाया ।
कम्पन्ते कल्पवृक्षा भवति विरागश्च भोगेभ्यः ॥

बहुणट्टगीयसाला णाणाविहकप्पतरुवराइण्णे ।
भो सुरलोयपहाणा णक्खयपडंतयं विसमं ॥ ९१ ॥

बहुनृत्यगीतसाला नानाविधकल्पतरुवराकीर्णाः ।
भोः सुरलोकप्रधाना: ..........विषमं ॥

वसियव्वं कुच्छीए कुणिमाए किमिकुलेहिं भरियाए ।
पीयव्वं कुणिमपयं जणणीए मे अहम्मेण ॥ ९२ ॥

वस्तव्यं कुत्सायां कुणपायां कृमिकुले भृतायां ।
पातव्य कुणपपयं जनन्या मया अधर्मेण ॥

सो एवं विलवंतो पुण्णवसाणम्मि असरणो संतो ।
मूलच्छिण्णो व्व दुमो णिवडइ हेट्ठामुहो दीणो ॥ ९३ ॥

स एवं विलपन् पुण्यावसानेऽशरणः सन् ।
मूलच्छिन्नोऽपि द्रुमः निपतति अधोमुखो दीनः ॥

एवं देवगई सम्मत्ता—एवं देवगतिः समाप्ता ।

---

एवं अणाइकाले जीओ संसारसायरे घोरे ।
परिहिंडइ अलहंतो धम्मं सव्वण्हुपण्णत्तं ॥९४॥

एवमनादिकाले जीवः संसारसागरे घोरे ।
परिहिंडते अलभमानो धर्मं सर्वज्ञप्रणीतं ॥

परिचइऊण कुधम्मं तम्हा सव्वण्हुभासिओ धम्मो ।
संसारुत्तरणट्ठं गहियव्वो बुद्धिमंतेहिं ॥९५॥

परित्यज्य कुधर्मं तस्मात् सर्वज्ञभाषितो धर्मः
संसारतरणार्थं गृहीतव्यो बुद्धिमद्भिः ॥

सव्वण्हू वि य णेया लोए बम्हाणहरिहराईया ।
तम्हा परिक्खियव्वा सव्वेण परेण कुसलेण ॥ ९६ ॥

सर्वज्ञा अपि च ज्ञेया लोके ब्रह्महरिहरादिकाः
तस्मात् परीक्षितव्या सर्वैः नरैः कुशलैः ॥

खट्टंगकपालहरो डमरुय वज्जंत भीसणायारो ।
णच्चइ पिसायसहिओ रयणीए पिउवणे भीमे ॥९७॥

खट्वाङ्गकपालहरः डमरुकं वादयन् भीषणाकारः ।
नृत्यति पिशाचसहितः रजन्यां पितृवने भीमे ॥

जो तिक्खदाढभीसणपिंगलणयणेहिं दाढिणमुहेण ।
भक्खेइ सव्वजीवे सो परमप्पो कहं होइ ॥ ९८ ॥

यः तीक्ष्णदाढाभीषणपिंगलनयनैः ........मुखेन ।
भक्षयति सर्वजीवान् स परमात्मा कथं भवति ॥

**अहवा सो परमप्पो जइ होइ जयम्मि दोसजुत्तो वि ।**
**ता भीसणरूओ ( पुण ) णिसायरो केरिसो होइ ॥ ९९ ॥**

अथवा स परमात्मा यदि भवति जगति दोषयुक्तोऽपि ।
तर्हि भीषणरूपः पुनः निशाचरः कीदृशो भवति ॥

**जो वहइ सिरे गंगा गिरिवधू वहइ अद्धदेहेण ।**
**णिच्चं भारक्कंतो कावडिवाहो जहा पुरिसो ॥ १०० ॥**

यो वहति शिरसि गंगां गिरिवधूं वहति अर्धदेहेन ।
नित्यं भाराक्रान्तः कावटिकावाहो यथा पुरुषः ॥

**जइ एरिसो वि लोए कामुम्मत्तो वि होइ परमप्पो ।**
**तो कामुम्मत्तमणा घरे घरे किं ण परमप्पा ॥ १०१ ॥**

यदि एतादृशोऽपि लोके कामोन्मत्तोऽपि भवति परमात्मा ।
तर्हि कामोन्मत्तमनसः गृहे गृहे किं न परमात्मानः ॥

**जो दहइ एयगामं वुच्चइ लोयम्मि सो वि पाविट्ठो ।**
**दड्ढं पि जेण तिउरं परमप्पत्तं कहं तस्स ॥ १०२ ॥**

यो दहति एकग्रामं उच्यते लोके सोऽपि पापिष्ठः ।
दग्धमपि येन त्रिपुरं परमात्मत्वं कथं तस्य ॥

**रण्णे तवं करंतो दट्ठूण तिलोत्तमाए लावण्णं ।**
**बम्मह सरेहिं विद्धो तवभट्ठो चउमुहो जाओ ॥ १०३ ॥**

अरण्ये तपः कुर्वन् दृष्ट्वा तिलोत्तमायाः लावण्यं ।
ब्रह्मा शरैः विद्धः तपोभ्रष्टः चतुर्मुखो जातः ॥

**कामग्गितत्तचित्तो इच्छयमाणो तिलोत्तमारूवं ।**
**जो रिच्छीभत्तारो जादो सो किं होइ परमप्पो ॥ १०४ ॥**

कामाग्नितप्तचित्तः इच्छन् तिलोत्तमारूपं ।
य ऋक्षिभर्ता जातः स किं भवति परमात्मा ॥

जइ एरिसो वि मूढो परमप्पा वुच्चए एवं ।
तो खरघोडाईया सव्वे वि य होंति परमप्पा ॥ १०५ ॥

यदि एतादृशोऽपि मूढः परमात्मा उच्यते एवं ।
तर्हि खराश्वादिकाः सर्वेऽपि न भवन्ति परमात्मानः ॥

जलथलआयासयले सव्वेसु वि पव्वएसु रुक्खेसु ।
तिणजलणकट्ठपाहण.........परिवसइ महुमहणो ॥१०६॥

जलस्थलाकाशतले सर्वेषु अपि पर्वतेषु वृक्षेषु ।
तृणज्वलनकाष्ठपाषाण..........परिवसति मधुमदः ॥

होऊण परमदेवो कण्हो परिवसइ जए सव्वे ।
तो छेयणाइओ सो पावइ सव्वं......किरियाओ ॥१०७॥

भूत्वा परमदेवः कृष्णः परिवसति जगति सर्वस्मिन् ।
तर्हि..........स प्राप्नोति सर्वं.......क्रियातः ॥

संसारम्मि वसंतो परमप्पो जइ जए हवे कण्हो ।
संसारत्था जीवा सव्वे ते किण्ण परमप्पा ॥ १०८ ॥

संसारे वसन् परमात्मा यदि जगति भवेत् कृष्णः ।
संसारस्था जीवाः सर्वे ते किं न परमात्मानः ॥

हरिहरबम्भाणो वि य महाबला सव्वलोयविक्खादा ।
तिण्णि वि एक्कसरीरा तिण्णि वि लोए वि परमप्पा ॥१०९॥

हरिहरब्रह्माणोऽपि च महाबला सर्वलोकविख्याताः ।
त्रयोऽपि एकशरीराः त्रयोऽपि लोकेऽपि परमात्मानः ॥

जइ होंहि एयमुत्ती बम्हाण तिलोयणाय महुमहणो ।
तो बम्हाणस्स सिरं हरेण किं कारणं छिण्णं ॥११०॥

यदि भवति एकमूर्तिः ब्रह्मा त्रिलोकनाथः मधुमदः।
तर्हि ब्रह्मणः शिरो हरेण किं कारणेन छिन्नं ॥

**णेच्छइ थावरजीवं जंगमजीवेसु संसओ जस्स।**
**मंसं जस्स अदोसं कह बुद्धो होइ परमप्पा ॥१११॥**

नेच्छति स्थावरजीवं जंगमजीवेषु संशयो यस्य।
मांसं यस्यादोषं कथं बुद्धो भवति परमात्मा ॥

**णियजणणीए पेट्टं जो फाडिऊण णिग्गओ बहिरं।**
**अण्णेसिं जीवाणं कह होइ दयावरो बुद्धो ॥११२॥**

निजजनन्या उदरं यो विदार्य निर्गतो बहिः।
अन्येषां जीवानां कथं भवति दयापरो बुद्धः ॥

**जो अप्पणो सरीरे ण समत्थो वाहिवेयणा छेउं।**
**अण्णेसिं जीवाणं कह वाहिं णासए सूरो ॥ ११३ ॥**

य आत्मनः शरीरे न समर्थो व्याधिवेदनां छेतुं।
अन्येषां जीवानां कथं व्याधिं नाशयति सूरः ॥

**ण समत्थो रक्खेउं सयमवि खे राहुणा गसिज्जंतो।**
**कह सो होइ समत्थो रक्खेउं अण्णजीवाणं ॥११४॥**

न समर्थो रक्षितुं स्वयमपि खे राहुना ग्रसमानः।
कथं स भवति समर्थो रक्षितुं अन्यजीवान् ॥

**जइ ते हवंति देवा एए सव्वे वि हरिहराईया।**
**तो तिक्खपहरणाइं गिण्हंति करेण णिकज्जं॥११५॥**

यदि ते भवन्ति देवा एते सर्वेऽपि हरिहरादिकाः।
तर्हि तीक्ष्णप्रहरणानि गृह्णन्ति करेण किमर्थं ॥

---

१ नियं पुस्तके। २ पोठ पुस्तके। ३ षहं पुस्तके। ४ सूर्यः।

जस्स त्थि भयं वि(चि)त्ते सो गिण्हइ आउहं करग्गेण ।
जस्स पुणो णत्थि भयं तस्साउहकारणं णत्थि ॥११६॥

यस्यास्ति भयं चित्ते स गृह्णाति आयुधं कराग्रेण ।
यस्य पुनर्नास्ति भयं तस्यायुधकारणं नास्ति ॥

छुहतण्हवाहिवेयणचिंताभयसोयपीडियसरीरा ।
संसारे हिंडंता ते सव्वण्हू कहं होंति ॥ ११७ ॥

क्षुधातृष्णाव्याधिवेदनाचिन्ताभयशोकपीडितशरीराः ।
संसारे हिंडमानाः ते सर्वज्ञा कथं भवन्ति ॥

छुह तण्हा भय दोसो राओ मोहो य चिंतणं वाही ।
जर मरण जम्म णिद्दा खेदो सेदो विसादो य ॥११८॥

क्षुधा तृष्णा भयं दोषो रागो मोहश्च चिन्ता व्याधिः ।
जरा मरणं जन्म निद्रा खेदः स्वेदो विषादश्च ॥

रइ जिंभओ य दप्पो एए दोसा तिलोयसत्ताणं ।
सव्वेसिं सामण्णा संसारे परिभमंताणं ॥ ११९ ॥

रतिर्जृंभा च दर्प एते दोषाः त्रिलोकसत्त्वानां ।
सर्वेषां सामान्याः संसारे परिभ्रमतां ॥

एए सव्वे दोसा जस्स ण विज्जंति छुहतिसाईया ।
सो होइ परमदेओ णिस्संदेहेण घेतव्वो ॥ १२० ॥

एते सर्वे दोषा यस्य न विद्यन्ते क्षुधातृषादिकाः ।
स भवति परमदेवो निःसन्देहेन गृहीतव्यः ॥

सिंहासणछत्तत्तयदिव्वोझुणिपुप्फविट्ठिचमराइं ।
भामंडलदुंदुहिओ वरतरु परमेट्ठिचिण्हत्थं ॥ १२१॥

सिंहासनच्छत्रत्रयदिव्यध्वनिपुष्पवृष्टिचामराणि ।
भामंडलदुंदुभी वरतरुः परमेष्ठिचिन्होत्थानि ॥

संपुण्णचंदवयणो जडमउडविवज्जिओ णिराहरणो ।
पहरणजुवइविमुक्को संतियरो होइ परमप्पा ॥ १२२ ॥

सम्पूर्णचन्द्रवदनः जटामुकुटविवर्जितो निराभरणः ।
प्रहरणयुवतिविमुक्तः शान्तिकरो भवति परमात्मा ॥

णिब्भूसणो वि सोहइ कोहोरायभओमणो ? णत्थि ।
जह्मा वियाररहिओ णिरंबरो मणोहरो तह्मा ॥ १२३ ॥

निर्भूषणोऽपि शोभते........................... ।
यस्माद्विकाररहितो निरम्बरो मनोहरस्तस्मात् ॥

जह्मा सो परमसुही परमसिवो वुच्चए जिणो तह्मा ।
देविंदाण वि देओ तह्मा णामं महादेओ ॥ १२४ ॥

यस्मात् स परमसुखी परमशिव उच्यते जिनस्तस्मात् ।
देवेन्द्राणामपि देवस्तस्मान्नाम्ना महादेवः ॥

अव्वावाहमणंतं जह्मा सोक्खं करेइ जीवाणं ।
तह्मा संकरणामो होइ जिणो णत्थि संदेहो ॥ १२५ ॥

अव्याबाधमनन्तं यस्मात् सुखं करोति जीवानां ।
तस्माच्छंकरनामा भवति जिनो नास्ति सन्देहः ॥

लोयालोयविदण्हू तह्मा णामं जिणस्स विण्हुत्ति ।
जह्मा सीयलवयणो तह्मा सो वुच्चए चंदो ॥ १२६ ॥

लोकालोकवित् तस्मात् नाम जिनस्य विष्णुरिति ।
यस्माच्छीतलवचनस्तस्मात् स उच्यते चन्द्रः ॥

अण्णाणाण विणासो विमलाण.......बोहयरो ।
कम्मासुर.......णिड्डहणो तेण जिणो वुच्चए सूरो ॥१२७॥

अज्ञानानां विनाशकः विमलानां....बोधकरः ।
कर्मा..........निर्दहनः तेन जिनं उच्यते सूरः ॥

**अण्णाणमोहिएहिं य पंचेंदियलोलुएहिं पुरिसेहिं ।**
**जिणणामाइं परेसिं कयाइं गुणवज्जयाणं पि ॥ १२८ ॥**

अज्ञानमोहितैश्च पंचेन्द्रियलोलुपैः पुरुषैः ।
जिननामानि परेषां कृतानि गुणवर्जितानामपि ॥

**जइ ईसरणाम णरो भिक्खं भमिऊण भुंजए को वि ।**
**ईसरस्स गुणविहूणो किं सच्चं ईसरो होइ ॥ १२९ ॥**

यदि ईश्वरनामा नरः भिक्षां भ्रमित्वा भुंक्ते कोऽपि ।
ईश्वरस्य गुणविहीनः किं सत्य ईश्वरो भवति ॥

**सव्वण्हूणाम हरी तह लोए हरिहराइया सव्वे ।**
**सव्वण्हुगुणविरहिया किं सव्वे होंति सव्वण्हू ॥ १३० ॥**

सर्वज्ञनामा हरिः तथा लोके हरिहरादिकाः सर्वे ।
सर्वज्ञगुणविरहिताः किं सर्वे भवन्ति सर्वज्ञाः ॥

**जइ इच्छय परमपयं अव्वाबाहं अणोवमं सोक्खं ।**
**तिहुवणवंदियचलणं णमह जिणंदं पयत्तेण ॥ १३१ ॥**

यदि इच्छति परमपदं अव्याबाधं अनुपमं सौख्यं ।
त्रिभुवनवंदितचरणं नमत जिनेन्द्रं प्रयत्नेन ॥

**जम्हा अरिहंत हवइ णिराउहो णिब्भयो हवे तम्हा**
**जह्मा हु अणंतसुहो इच्छीविरहिओ हवे तम्हा ॥ १६२ ॥**

यस्मात् अर्हन् भवति निरायुधः निर्भयो भवेत् तस्मात् ।
यस्माद्धि अनन्तसुखं स्त्रीविरहितो भवेत् तस्मात् ॥

**जम्हा छुहतण्हाओ तस्स ण पीडंति परमघोराओ ।**
**तम्हा असणं पाणं तिलोयणाहो ण सेवेइ ॥ १३३ ॥**

यस्मात् क्षुत्तृष्णे तं न पीडयतः परमघोरे ।
तस्मादशनं पानं त्रिलोकनाथो न सेवते ॥

पूजारिहो हु जह्मा धरणिंदणरिंदसुरवरिंदाणं ।
अरिरयरहस्समहणो अरहंतो वुच्चए तह्मा ॥ १३४ ॥

पूजार्हस्तु यस्मात् धरणेन्द्रनरेन्द्रसुरवरेन्द्राणां ।
अरिरजरहस्यमथनः अर्हन् उच्यते तस्मात् ॥

जियकोहो जियमाणो जियमायालोहमोह जियमयओ ।
जियमच्छरो य जह्मा तम्हा णामं जिणो उत्तो ॥ १३५ ॥

जितक्रोधो जितमानो जितमायालोभमोहः जितमदः ।
जितमत्सरश्च यस्मात्तस्मान्नाम जिनः उक्तः ॥

जम्मजरमरणतिदयं जम्हा दड्डं जिणेण णिस्सेसं ।
तम्हा तिउरविणासो होइ जिणे णत्थि संदेहो ॥ १३६ ॥

जन्मजरामरणत्रितयं यस्माद्दग्धं जिनेन निःशेषं ।
तस्मात्त्रिपुरविनाशो भवति जिने नास्ति सन्देहः ॥

अरहंतपरमदेवं जो वंदइ परमभत्तिसंजुत्तो ।
तेलोयवंदणीओ अइरेण य सो णरो होइ ॥ १३७ ॥

अर्हत्परमदेवं यो वन्दते परमभक्तिसंयुक्तः ।
त्रिलोकवन्दनीयोऽचिरेण च स नरो भवति ॥

जो जिणवरिंदपूअं कुणइ ससत्तीइ सो महापुरिसो ।
तेलोयपूअणीओ अइरेण य सो णरो होइ ॥ १३८ ॥

यो जिनवरेन्द्रपूजां करोति स्वशक्त्या स महापुरुषः ।
त्रिलोकपूजितोऽचिरेण च स नरो भवति ॥

सव्वण्हुपरिक्खा सम्मत्ता—सर्वज्ञपरीक्षा समाप्ता ।

धम्मो जिणेहिं भणिओ सायारो तह हवे अणायारो ।
एएसिं दोण्हं पि हु सारं खलु होइ सम्मत्तं ॥ १३९ ॥

धर्मो जिनैः भणितः सागारस्तथा भवेदनगारः ।
एतयोर्द्वयोरपि हि सारं खलु भवति सम्यक्त्वं ॥

सम्मत्तसलिलपवहो णिच्चं हियअम्मि पवट्टए जस्स ।
कम्मं वालुयवरणं तस्स बंधो च्चिय ण एइ ॥ १४० ॥

सम्यक्त्वसलिलप्रवाहो नित्यं हृदये प्रवर्तते यस्य ।
कर्म वालुकावरणं तस्य बन्धमेव नैति ॥

सम्मत्तरयणलब्भे णरयतिरिक्खेसु णत्थि उववाओ ।
जइ ण मुअइ सम्मत्तं अहव ण बंधाउओ पुव्वं ॥ १४१ ॥

सम्यक्त्वरत्नलब्धे नरकतिर्यक्षु नास्ति उपपादः ।
यदि न मुञ्चति सम्यक्त्वं अथवा न बंध आयुषः पूर्वं ॥

पंचयअणुव्वयाइं गुणव्वयाइं हवंति तिण्णेव ।
चत्तारि य सिक्खावययाइं सायारो एरिसो धम्मो ॥१४२॥

पंचाणुव्रतानि गुणव्रतानि भवन्ति त्रीण्येव ।
चत्वारि च शिक्षाव्रतानि सागार एतादृशो धर्मः ॥

देवयपियरणिमित्तं मंतोसहजंतभयणिमित्तेण ।
जीवा ण मारियव्वा पढमं तु अणुव्वयं होइ ॥ १४३ ॥

देवतापितृनिमित्तं मंत्रौषधयंत्रभयनिमित्तेन ।
जीवा न मारयितव्याः प्रथमं तु अणुव्रतं भवति ॥

वागादीहिं असच्चं परपीडयरं तु सच्चवयणं पि ।
वज्जंतस्स णरस्स हु बिदियं तु अणुव्वयं होइ ॥ १४४ ॥

---

१ ' बंधुच्चिय णासए तस्स ' इति दर्शनप्राभृते पाठान्तरम् ।

रागादिभिरसत्यं परपीडाकरं तु सत्यवचनमपि ।
वर्जतो नरस्य हि द्वितीयं तु अणुव्रतं भवति ॥

**गामे णयरे रण्णो नट्ठं पडियं च अहव विस्सरियं ।**
**णादाणं परदव्वं तिदियं तु अणुव्वयं होइ ॥ १४५ ॥**

ग्रामे नगरे अरण्ये नष्टं पतितं चाथवा विस्मृतं ।
नादानं परद्रव्यं तृतीयं तु अणुव्रतं भवति ॥

**मायावहिणिसमाओ दट्ठव्वाओ परस्स महिलाओ ।**
**सयदारे संतोसो अणुव्वयं तं चउत्थं तु ॥ १४६ ॥**

मातृस्वसृसमाना द्रष्टव्याः परस्य महिलाः ।
स्वदारे सन्तोषोऽणुव्रतं तच्चतुर्थं तु ॥

**धणधण्णदुपयचउप्पयखेत्तण्णच्छादियाण दव्वाणं ।**
**जं किज्जइ परिमाणं पंचमयं अणुव्वयं होइ ॥ १४७ ॥**

धनधान्यद्विपदचतुष्पदक्षेत्रान्याच्छादनानां द्रव्याणां ।
यत्क्रियते परिमाणं पंचमकं अणुव्रतं भवति ॥

**जं तु दिसावेरमणं गमणस्स दु जं च परिमाणं ।**
**तं च गुणव्वय पढमं भणियं जियरायदोसेहिं ॥ १४८ ॥**

यत्तु दिग्विरमणं गमनस्य तु यच्च परिमाणं ।
तच्च गुणव्रतं प्रथमं भणितं जितरागदोषैः ॥

**मज्जारसाणरज्जु वंड लोहो य अग्गिविससत्थं ।**
**सपरस्स घादहेदुं अण्णेसिं णेव दादव्वं ॥ १४९ ॥**

मार्जारश्वरज्जु........लोहश्च अग्निविषशस्त्राणि ।
स्वपरस्य घातहेतूनि अन्येषां नैव दातव्यानि ॥

**वहबंधपासछेदो तह गुरुभाराधिरोहणं चेव ।**
**ण वि कुणइ जो परेसिं विदियं तु गुणव्वयं होइ ॥ १५० ॥**

वधबन्धपाशच्छेदानि तथा गुरुभाराधिरोहणं चैव ।
नापि करोति यः फेषां द्वितीयं गुणव्रतं भवति ॥

**वच्छन्छभूसणाणं तंबोलाहरणगंधपुप्फाणं ।**
**जं किज्जइ परिमाणं तिदियं तु गुणव्वयं होइ ॥ १५१ ॥**

वस्त्रात्रभूषणानां ताम्बूलाभरणगंधपुष्पाणां ।
यत्क्रियते परिमाणं तृतीयं तु गुणव्रतं भवति ॥

**पंचणमोक्कारपयं मंगल लोगुत्तमं तहा सरणं ।**
**णिच्चं झाएयव्वं उभए सज्झाहिं हिययम्मि ॥ १५२ ॥**

पंचनमस्कारपदं मंगलं लोकोत्तमं तथा शरणं ।
नित्यं ध्यातव्यं उभयोः सन्ध्ययोः हृदये ॥

**रुद्दट्टविवज्जणं पि समदा सव्वेसु चेव भूदेसु ।**
**संजमसुहभावणा वि सिक्खा सा वुच्चए पढमा ॥ १५३ ॥**

रुद्रार्त्तविवर्जनमपि समता सर्वेषु चैव भूतेषु ।
संयमशुभभावना अपि शिक्षा सा उच्यते प्रथमा ॥

**उववासो कायव्वो मासे मासे चउस्सु पव्वेसु ।**
**हवदि य विदिया सिक्खा सा कहिया जिणवरिंदेहिं ॥ १५४ ॥**

उपवासः कर्त्तव्यो मासे मासे चतुर्षु पर्वसु ।
भवति च द्वितीया शिक्षा सा कथिता जिनेन्द्रैः ॥

**असणाइचउवियप्पो आहारो संजयाण दादव्वो ।**
**परमाए भत्तीए तिदिया सा वुच्चए सिक्खा ॥ १५५ ॥**

अशनादिचतुर्विकल्प आहारः संयतानां दातव्यः ।
परमया भक्त्या तृतीया सा उच्यते शिक्षा ॥

**चइऊण सव्वसंगे गहिऊणं तह महव्वए पंच ।**
**चरिमंते सण्णासं जं धिप्पइ सा चउत्थिया सिक्खा ॥ १५६ ॥**

त्यक्त्वा सर्वसङ्गान् गृहीत्वा तथा महाव्रतानि पंच ।
चरमान्ते सन्यासं यत् गृह्णाति सा चतुर्थी शिक्षा ॥

एयाइं वयाइं णरो जो पालइ जइ सुद्धसम्मत्तो ।
उप्पज्जिऊण सग्गे सो भुंजइ इच्छियं सोक्खं ॥ १५७ ॥

एतानि व्रतानि नरो यः पालयति यदि शुद्धसम्यक्त्वः ।
उत्पद्य स्वर्गे स भुंक्ते इच्छितं सौख्यं ॥

दिव्वाणि विमाणाणि य सुरलोए होंति पंचवण्णाइं ।
दित्तीए आयच्चं जिणंति चंदस्स कंतीए ॥ १५८ ॥

दिव्यानि विमानानि च सुरलोके भवन्ति पंचवर्णानि ।
दीप्त्या आदित्यं जीयन्ते चन्द्रं कान्त्या ॥

सोहंति ताइं णिच्चं पलंबवरहेमदामघंटाहिं ।
बहुविहकूडेहि तहा णाणाविहधयवडेहिं ॥ १५९ ॥

शोभन्ते तानि नित्यं प्रलंबवरहेमदामघंटाभिः ।
बहुविधकूटैः तथा नानाविधध्वजापताकाभिः ॥

तेसिं होंति समीवे बहुभेयजलासया परमरम्मा ।
सोहंति सव्वकालं फलपुप्फपवालपत्तेहिं ॥ १६० ॥

तेषां होंति समीपे बहुभेदजलाशयाः परमरम्याः ।
शोभन्ते सर्वकाले फलपुष्पप्रवालपत्रैः ॥

दट्ठूण य उप्पत्तिं केई विज्जंति सेयचमरेहिं ।
केई जयजयसद्दे कुव्वंति सुरा सउच्छाहा ॥ १६१ ॥

दृष्ट्वा चोत्पत्तिं केचित् वीजयन्ति श्वेतचमरैः ।
केचित् जयजयशब्दान् कुर्वन्ति सुराः सोत्साहाः ॥

वरमुरवदुंदुहिओ भेरीओ संखवेणुवीणाओ ।
पडुपडहझल्लरिओ वायंति सुरा सलीलाए ॥ १६२ ॥

वरमुरजदुन्दुभिरवाने भेर्यः शंखवेणुवीणाः।
पटुपटहझल्लर्यः वादयन्ति सुराः सलीलया॥

**गायंति अच्छराओ काओ वि मणोहराओ गीयाओ।**
**काओवि वरंगीओ णच्चंति विलासवेसाओ॥ १६३॥**

गायन्ति अप्सरसः का अपि मनोहराणि गीतानि।
का अपि वराङ्गा नृत्यन्ति विलासवेषाः॥

**को मज्झ इमो जम्मो रमणीओ आसमो इमो को वा।**
**कस्स इमो परिवारो एवं चिंतेइ सो देओ॥ १६४॥**

किं मम इदं जन्म रमणीयं आसीदियं को वा।
कस्यायं परिवार एवं चिन्तयति स देवः॥

**णाऊण देवलोयं पुणरवि उप्पत्तिकारणं देओ।**
**सव्वंगजायभासो वियसियवयणो य चिंतेइ॥ १६५॥**

ज्ञात्वा देवलोकं पुनरपि उत्पत्तिकारणं देवः।
सर्वाङ्गजातभासः विकसितवदनश्च चिन्तयति॥

**किं दत्तं वरदाणं को व मए सोहणो तवो चिण्णो।**
**जेण अहं सुरलोए उववण्णो सुद्धदंसणीए॥ १६६॥**

किं दत्तं वरदानं किं वा मया शोभनं तपः चिर्तः।
येनाहं सुरलोके उपपन्नः शुद्ध.............॥

**णाऊण णिरवसेसं पुव्वभवे य जिणपुज्जआ रइया।**
**तो कुणइ णमोकारं भत्तीए जिणवरिंदाणं॥ १६७॥**

ज्ञात्वा निरवशेषं पूर्वभवे च जिनपूजा रचिता।
ततः करोति नमस्कारं भक्त्या जिनवरेन्द्राणां॥

**पुणरवि पणमियमत्थो भणइ सुरो अंजलिं सिरे किच्चा।**
**धम्मायरियस्स णमो जेणाहं गाहिओ धम्मो॥ १६८॥**

पुनरपि प्रणतमस्तकः भणति सुरः अंजलिं शिरसि कृत्वा ।
धर्माचार्याय नमः येनाहं ग्राहितः धर्मः ॥

**सो मज्झ वंदणीओ अहिगमणीओ य पूअणीओ य ।**
**जस्स पसाएणाहं उप्पण्णो देवलोयम्मि ॥ १६९ ॥**

स मम वन्दनीयः अभिगमनीयश्च पूजनीयश्च ।
यस्य प्रसादेनाहं उत्पन्नो देवलोके ॥

**अहिसेहगिहं देवा णाऊण करंति तस्स अहिसेहं ।**
**पुणरवि अरुहं गेहं आणंति मणोहरं रम्मं ॥ १७० ॥**

अभिषेकगृहं देवा नीत्वा कुर्वन्ति तस्याभिषेकं ।
पुनरपि अर्हद्गृहं आनयन्ति मनोहरं रम्यं ॥

**बहुभूसणेहिं देहं भूसंता तस्स दि (व्व) मंतेहिं ।**
**अहिसिंचिऊण पुणरवि देवा बंधंति वरपट्टं ॥ १७१ ॥**

बहुभूषणैः देहं भूषयन् तस्य दिव्यमंत्रैः ।
अभिषिंच्य पुनरपि देवा बध्नन्ति वरपट्टम् ॥

**सिंहासणट्ठियस्स हु सुहगेहेसु सुट्ठु रमणीए ।**
**उवगम केइ देवा जोगाइं कहंति कम्माइं ॥ १७२ ॥**

सिंहासनस्थितस्य हि शुभगृहेषु सुष्ठु रमणीयेषु ।
उपगम्य केचिद्देवा योग्यानि कथयन्ति कर्माणि ॥ ?

**पढमं जिणंदपूयं अवि चलवरलोयणं पुणो पेच्छा ।**
**वरणाडयस्स पिच्छा तह माणिय दिव्वबहुआउ ॥ १७३ ॥**

प्रथमं जिनेन्द्रपूजा अपि चलवरलोचनं पुनः पश्चात् ।
वरनाटकं पश्चात् तथा........................... ॥

**पडिबोहिओ हु संतो अण्णेहिं सुरेहिं सुरवरो एवं ।**
**तो कुणइ महापूअं भत्तीए जिणवरिंदाणं ॥ १७४ ॥**

प्रतिबोधितो हि सन् अन्यैः सुरैः सुरवर एवं ।
ततः करोति महापूजां भक्त्या जिनवरेन्द्राणां ॥

**कुणइ पुणो वि य तुट्ठो अट्ठवेलाओयणं य सो देओ ।**
**वरणाडयं स पच्छा कुणइ पुणो पुव्वकयउत्ति ॥ १७५ ॥**

करोति पुनरपि च तुष्टः अष्टवेलालोचनं ? च स देवः ।
वरनाटकं स दृष्ट्वा करोति पुनः पूर्वकर्म इति ॥ ?

**दिव्वच्छराहिं य समं उत्तंगपउहाराहिं चिरकालं ।**
**अणुहवइ कामभोए अट्ठगुणरिद्धिसंपण्णो ॥ १७६ ॥**

दिव्याप्सरोभिश्च सम उत्तंगप्र....हाराभिः चिरकालं ।
अनुभवति कामभोगान् अष्टगुणर्द्धिसम्पन्नः ॥

**अणिमं महिमं लहिमं पत्ती पायम्म कामरूवित्तं ।**
**ईसत्तं च वसित्तं अट्ठगुणा होंति णायव्वा ॥ १७७ ॥**

अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यं कामरूपित्वं ।
ईशित्वं च वशित्वं अष्टगुणा भवन्ति ज्ञातव्याः ॥

**इय अट्ठगुणो देओ जरवाहिविवज्जिओ चिरं कालं ।**
**जिणधम्मस्स फलेण य दिव्वसुहं भुंजए जीओ ॥ १७८ ॥**

इति अष्टगुणो देवो जराव्याधिविवर्जितश्चिरं कालं ।
जिनधर्मस्य फलेन च दिव्यसुखं भुंक्ते जीवः ॥

**इति देवसुगइसम्मत्ता-इति देवसुगतिः समाप्ता ।**

---

**भुंजित्ता चिरकालं दिव्वं हियइच्छियं सुहं सग्गे ।**
**माणुसलोयम्मि पुणो उप्पज्जए उत्तमे वंसे ॥ १७९ ॥**

भुक्त्वा चिरकालं दिव्यं हृदयेप्सितं सुखं स्वर्गे ।
मानुषलोके पुनः उत्पद्यते उत्तमे वंशे ॥

भुंजित्ता मणुलोए सव्वे हियइच्छियं अविग्घेण ।
होऊण भोयविरओ जिणदिक्खं गिण्हए परमं ॥ १८० ॥

भुक्त्वा मनुजलोके सर्वान् हृदयेप्सितान् अविघ्नेन ।
भूत्वा भोगविरतो जिनदीक्षां गृह्णाति परमां ॥

डहिऊण य कम्मवणं उग्गेण तवाणलेण णिस्सेसं ।
आपुण्णभवं अणंतं सिद्धिसुहं पावए जीओ ॥ १८१ ॥

दग्ध्वा च कर्मवनं उग्रेण तपोऽनलेन निःशेषं ।
आपूर्णभवमनन्तं सिद्धिसुखं प्राप्नोति जीवः ॥

सुमणुसहिए वल्लहमणाइसिद्धं तओ समासेण ।
अणयारपरमधम्मं वोच्छामि समासओ पत्तो ॥ १८२ ॥

सुम..........वल्लभं अनादिसिद्धं ततः समासेन ।
अनगारपरमधर्मं वक्ष्ये समासतः प्राप्तं ॥

अट्ठदस पंच पंच य मूलगुणा सव्वतो सदाणयाराणं ।
उत्तरगुणा अणेया अणयारो एरिसो धम्मो ॥ १८३ ॥

अष्टादश पंच पंच च मूलगुणाः सर्वतः सदानगाराणां ।
उत्तरगुणा अनेके अनगार एतादृशो धर्मः ॥

जे सुद्धवीरपुरिसा जाइजरामरणदुक्खणिव्विण्णा ।
पालंति सुसुद्धभावा ते मूलगुणा य परिसेसा ॥ १८४ ॥

ये शुद्धवीरपुरुषा जातिजरामरणदुःखनिर्विण्णाः ।
पालयन्ति सुशुद्धभावास्ते मूलगुणान् च परिशेषान् ॥

इच्चेयावि सव्वे पालंति सविरियं अगूहंता ।
उवलुद्धयावधीरा संसारदुक्खक्खयंहाए ॥ १८५ ॥

इत्यादिकानपि सर्वान् पालयन्ति स्ववीर्यं अगूहमानाः ।
अपलुब्धका ? धीराः संसारदुःखक्षयेच्छया ॥

**हेमंते धिदिमंता णलिणिदलविणासियं महासीयं ।**
**संसारदुक्खभीए विसहंति चउंति य सीयं ॥ १८६ ॥**

हेमन्ते धृतिमन्तो नलिनीदलविनाशितं महाशीतं ।
संसारदुःखभयानपि सहन्ते चंडमिति च शीतं ॥

**जलमलमइलिअंगा पावमलविवज्जिया महामुणिणो ।**
**आइच्चस्साहिमुहं करंति आदावणं धीरा ॥ १८७ ॥**

जल्लमलमलिनिताङ्गाः पापमलविवर्जिता महामुनयः ।
आदित्यस्याभिमुखं कुर्वन्ति आतापनं धीराः ॥

**धारंधयारगहिले कापुरीसभयागरे परमभीमे ।**
**मुणिणो वसंति रण्णे तरुमूले वरिसयालम्मि ॥ १८८ ॥**

धारान्धकारगहने कापुरुषभयकरे परमभीमे ।
मुनयो वसन्ति अरण्ये तरुमूले वर्षाकाले ॥

**अणयारपरमधम्मं धीरा काऊण सुद्धसम्मत्ता ।**
**गच्छंति केई सग्गे केई सिज्झंति धुदकम्मा ॥ १८९ ॥**

अनगारपरधर्मं धीराः कृत्वा शुद्धसम्यक्त्वाः ।
गच्छन्ति केचित् स्वर्गे केचित् सिद्ध्यन्ति धुतकर्माणः ॥

**ण वि अत्थि माणुसाणं आदसमुत्थं चिय विसयातीदं ।**
**अव्वुच्छिण्णं च सुहं अणोवमं जं च सिद्धाणं ॥ १९० ॥**

नाप्यस्ति मनुजानां आत्मसमुत्थं एव विषयातीतं ।
अव्युच्छिन्नं च सुखं अनुपमं यच्च सिद्धानां ॥

**अट्ठविहकम्मवियडा ( ला ) सीदीभूदा णिरंजणा णिच्चा ।**
**अट्ठगुणा किदकिच्चा लोयग्गणिवासिणो सिद्धा ॥ १९१ ॥**

अष्टविधकर्मविकलाः शीतीभूता निरंजना नित्याः ।
अष्टगुणाः कृतकृत्या लोकाग्रनिवासिनः सिद्धाः ॥

सम्मत्त णाण दंसण वीरिय सुहमं तहेव अवगहणं ।
अगुरुलघुमव्वाबाहं अट्ठगुणा होंति सिद्धाणं ॥ १९२ ॥

सम्यक्त्वं ज्ञानं दर्शनं वीर्यं सूक्ष्मं तथैवावगाहनं ।
अगुरुलघु अव्याबाधं अष्टगुणा भवन्ति सिद्धानाम् ॥

भवियाण बोहणत्थं इय धम्मरसायणं समासेण ।
वरपउमणंदिमुणिणा रइयं जमणियमजुत्तेण ॥ १९३ ॥

भव्यानां बोधनार्थं इदं धर्मरसायनं समासेन ।
वरपद्मनन्दिमुनिना रचितं यमनियमयुक्तेन ॥

**इदि सिरिधम्मरसायणं सम्मत्तं ।**

श्रीमत्कुलभद्रविरचितः

# सार-समुच्चयः ।

देवदेवं जिनं नत्वा भवोद्भवविनाशनम् ।
वक्ष्येऽहं देशनां कांचिन्मतिहीनोऽपि भक्तितः ॥ १ ॥

संसारे पर्यटन् जंतुर्बहुयोनिसमाकुले ।
शारीरं मानसं दुःखं प्राप्नोति बत ! दारुणं ॥ २ ॥

आर्त्तध्यानरतो मूढो न करोत्यात्मनो हितं ।
तेनासौ सुमहत्क्लेशं परत्रेह च गच्छति ॥ ३ ॥

ज्ञानभावनया जीवो लभते हितमात्मनः ।
विनयाचारसम्पन्नो विषयेषु पराङ्मुखः ॥ ४ ॥

आत्मानं भावयेन्नित्यं ज्ञानेन विनयेन च ।
मा पुनर्म्रियमाणस्य पश्चात्तापो भविष्यति ॥ ५ ॥

तथापि सत्तपः कार्यं ज्ञानसद्भावभावितं ।
यथा विमलतां याति चेतोरत्नं सुदुस्तरम् ॥ ६ ॥

नृजन्मनः फलं सारं यदेतज्ज्ञानसेवनम् ।
अनिगूहितवीर्यस्य संयमस्य च धारणम् ॥ ७ ॥

ज्ञानध्यानोपवासैश्च परीषहजयैस्तथा ।
शीलसंयमयोगैश्च स्वात्मानं भावयेत् सदा ॥ ८ ॥

---

१ न लेभे हितमात्मनः क-पुस्तके। २ 'आयुना म्रियमाणस्य' इति -खपुस्तके शोधितपाठः । ३ 'सुदुर्धरं' ख-पुस्तके ।

ज्ञानाभ्यासः सदा कार्यो ध्याने चाध्ययने तथा ।
तपसो रक्षणं चैव यदीच्छेद्धितमात्मनः ॥ ९ ॥
ज्ञानादित्यो हृदि यस्य नित्यमुद्योतकारकः ।
तस्य निर्मलतां याति पंचेन्द्रियदिगङ्गना ॥ १० ॥
एतज्ज्ञानफलं नाम यच्चारित्रोद्यमः सदा ।
क्रियते पापनिर्मुक्तैः साधुसेवापरायणैः ॥ ११ ॥
सर्वद्वन्द्वं परित्यज्य निभृतेनान्तरात्मना ।
ज्ञानामृतं सदा पेयं चित्ताह्लादनमुत्तमम् ॥ १२ ॥
ज्ञानं नाम महारत्नं यन्न प्राप्तं कदाचन ।
संसारे भ्रमता भीमे नानादुःखविधायिनि ॥ १३ ॥
अधुना तत्त्वया प्राप्तं सम्यग्दर्शनसंयुतम् ।
प्रमादं मा पुनः कार्षीर्विषयास्वादलालसः ॥ १४ ॥
आत्मानं सततं रक्षेज्ज्ञानध्यानतपोबलैः ।
प्रमादिनोऽस्य जीवस्य शीलरत्नं विलुंपति ॥ १५ ॥
शीलरत्नं हृतं यस्य मोहध्वान्तमुपेयुषः ।
नानादुःखशताकीर्णे नरके पतनं ध्रुवम् ॥ १६ ॥
यावत् स्वास्थ्यं (स्थैर्यं) शरीरस्य यावच्चेन्द्रियसम्मदः ।
तावद्युक्तं तपः कर्तुं वार्द्धक्ये केवलं श्रमः ॥ १७ ॥
शुद्धे तपसि सद्वीर्यं ज्ञानं कर्मपरिक्षये ।
उपयोगिधनं पात्रे यस्य याति स पंडितः ॥ १८ ॥
गुरुशुश्रूषया जन्म चित्तं सद्ध्यानचिन्तया ।
श्रुतं यस्य समे याति विनियोगं स पुण्यभाक् ॥ १९ ॥

१ तपःसंरक्षणं ख-पुस्तके । २ 'विलुम्पते' ख-पुस्तके । ३ 'सम्मदः' ख-पुस्तके । ४ उपयोगं धनं प्राप्ते ख-पुस्तके ।

छित्वा स्नेहमयान् पाशान् भित्वा मोहमहार्गलाम् ।
सच्चारित्रसमायुक्तः शूरो मोक्षपथे स्थितः ॥ २० ॥
अहो मोहस्य माहात्म्यं विद्वांसो येऽपि मानवाः ।
मुह्यन्ते तेऽपि संसारे कामार्थरतितत्पराः ॥ २१ ॥
कामः क्रोधस्तथा लोभो रागो द्वेषश्च मत्सरः ।
मदो माया तथा मोहः कन्दर्पो दर्प एव च ॥ २२ ॥
एते हि रिपवो चौरा धर्मसर्वस्वहारिणः ।
एतैर्भ्रम्यते जीवः संसारे बहुदुःखदे ॥ २३ ॥
रागद्वेषमयो जीवः कामक्रोधवशे यतः ।
लोभमोहमदाविष्टः संसारे संसरत्यसौ ॥ २४ ॥
सम्यक्त्वज्ञानसम्पन्नो जैनभक्त जितेन्द्रियः ।
लोभमोहमदैस्त्यक्तो मोक्षभागी न संशयः ॥ २५ ॥
कामक्रोधस्तथा मोहस्त्रयोऽप्येते महाद्विपः ।
एतेन निर्जिता यावत्तावत्सौख्यं कुतो नृणाम् ॥ २६ ॥
नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः ।
नास्ति क्रोधसमो वन्हिर्नास्ति ज्ञानसमं सुखम् ॥ २७ ॥
कषायविषयार्त्तानां देहिनां नास्ति निर्वृतिः ।
तेषां च विरमे सौख्यं जायते परमाद्भुतम् ॥ २८ ॥
कषायविषयोरगैश्चात्मा च पीडितः सदा ।
चिकित्स्यतां प्रयत्नेन जिनवाक्सारभेषजैः ॥ २९ ॥

---

१ अस्मादग्रे अधस्तनः श्लोकोऽधिकः ख–पुस्तके ।
कर्मणा मोहनीयेन मोहितं सकलं जगत् ।
धन्या मोहं समुत्सार्य तपस्यन्ति महाधियाः ॥ १ ॥
२ ' विषयोयोगैश्चात्मा ' क–पुस्तके । ' विषयैं रोगैरात्मा ' ख–पुस्तके ।

विषयोरगदष्टस्य कषायविषमोहितः ।
संयमो हि महामंत्रस्त्राता सर्वत्र देहिनाम् ॥ ३० ॥
कषायकलुषो जीवो रागरंजितमानसः ।
चतुर्गतिभवाम्भोधौ भिन्ना नौरिव सीदति ॥ ३१ ॥
कषायवशगो जीवो कर्म बध्नाति दारुणम् ।
तेनासौ क्लेशमाप्नोति भवकोटिषु दारुणम् ॥ ३२ ॥
कषायविषयैश्चित्तं मिथ्यात्वेन च संयुतम् ।
संसारबीजतां याति विमुक्तं मोक्षबीजताम् ॥ ३३ ॥
कषायविषयं सौख्यं इन्द्रियाणां च संग्रहः ।
जायते परमोत्कृष्टमात्मनो भवभेदि यत् ॥ ३४॥
कषायान् शत्रुवत् पश्येद्विषयान् विषवत्तथा ।
मोहं च परमं व्याधिमेवं मर्त्यो विचक्षणः ॥ ३५ ॥
कषायविषयैश्चौरैर्धर्मरत्नं विलुप्यति ( ते ) ।
वैराग्यखड्गधाराभिः शूराः कुर्वन्ति रक्षणम् ॥ ३६ ॥
कषायकर्षणं कृत्वा विषयाणामसेवनम् ।
एतद्भो मानवाः ! पथ्यं सम्यग्दर्शनमुत्तमम् ॥ ३७ ॥
कषायातपतप्तानां विषयामयमोहिनाम् ।
संयोगायोगखिन्नानां सम्यक्त्वं परमं हितम् ॥ ३८ ॥
वरं नरकवासोऽपि सम्यक्त्वेन समायुतः ।
न तु सम्यक्त्वहीनस्य निवासो दिवि राजते ॥ ३९ ॥
सम्यक्त्वं परमं रत्नं शंकादिमलवर्जितम् ।
संसारदुःखदारिद्र्यं नाशयेत्सुविनिश्चितम् ॥ ४० ॥
सम्यक्त्वेन हि युक्तस्य ध्रुवं निर्वाणसंगमः ।
मिथ्यादृशोऽस्य जीवस्य संसारे भ्रमणं सदा ॥४१॥

१ 'मेवमूचुर्विचक्षणाः ख-पुस्तके । २ 'देवे गतिं सुनिश्चितं क-पुस्तके ।

पंडितोऽसौ विनीतोऽसौ धर्मज्ञः प्रियदर्शनः ।
यः सदाचारसम्पन्नः सम्यक्त्वदृढमानसः ॥४२॥
जरामरणरोगाणां सम्यक्त्वज्ञानभेषजैः ।
शमनं कुरुते यस्तु स च वैद्यो विधीयते ॥४३॥
जन्मान्तरार्जितं कर्म सम्यक्त्वज्ञानसंयमैः ।
निराकर्तुं सदा युक्तमपूर्वं च निरोधनम् ॥४४॥
सम्यक्त्वं भावयेत्क्षिप्रं सज्ज्ञानं चरणं तथा ।
कृच्छ्रात्सुचरितं प्राप्तं नृत्वं याति निरर्थकम् ॥४५॥
अतीतेनापि कालेन यन्न प्राप्तं कदाचन ।
तदिदानीं त्वया प्राप्तं सम्यग्दर्शनमुत्तमम् ॥४६॥
उत्तमे जन्मनि प्राप्ते चारित्रं कुरु यत्नतः ।
सद्धर्मे च परां भक्तिं शमे च परमां रतिम् ॥४७॥
अनादिकालजीवेन प्राप्तं दुःखं पुनः पुनः ।
मिथ्यामोहपरीतेन कषायवशवर्तिना ॥४८॥
सम्यक्त्वादित्यसंभिन्नं कर्मध्वान्तं विनश्यति ।
आसन्नभव्यसत्वानां काललब्ध्यादिसन्निधौ ॥४९॥
सम्यक्त्वभावशुद्धेन विषयासङ्गवर्जितः ।
कषायविरतेनैव भयदुःखं विहन्यते ॥५०॥
संसारध्वंसनं प्राप्य सम्यक्त्वं नाशयन्ति ये ।
वमन्ति तेऽमृतं पीत्वा सर्वव्याधिहरं पुनः ॥५१॥
मिथ्यात्वं परमं बीजं संसारस्य दुरात्मनः ।
तस्मात्तदेव मोक्तव्यं मोक्षसौख्यं जिघृक्षुणा ॥५२॥

१ संयमं क-पुस्तके । २ 'अपूर्वां च निरोधनाम्' ख-पुस्तके । ३ 'संभिन्न' ख-पुस्तके ।

आत्मतत्त्वं न जानन्ति मिथ्यामोहेन मोहिताः ।
मनुजा येन मानस्था विप्रलुब्धाः कुशासनैः ॥५३॥
दुःखस्य भीरवोऽप्येते सद्धर्मं न हि कुर्वते ।
कर्मणा मोहनीयेन मोहिता बहवो जनाः ॥५४॥
कथं न रमते चित्तं धर्मे चैकसुखप्रदे ।
देवानां दुःखभीरूणां प्रायो मिथ्यादृशो यतः ॥५५॥
दुःखं न शक्यते सोढुं पूर्वकर्मार्जितं नरैः ।
तस्मात् कुरुत सद्धर्मं येन तत्कर्म नश्यति ॥ ५६ ॥
सुकृतं तु भवेद्यस्य तेन यान्ति परिक्षयम् ।
दुःखोत्पादनभूतानि दुष्कर्माणि समन्ततः ॥ ५७ ॥
धर्म एव सदा कार्यो मुक्त्वा व्यापारमन्यतः ।
यः करोति परं सौख्यं यावन्निर्वाणसंगमः ॥ ५८ ॥
क्षणोऽपि समतिक्रान्ते सद्धर्मपरिवर्जिते ।
आत्मानं मुषितं मन्ये कषायेन्द्रियतस्करैः ॥ ५९ ॥
धर्मकार्ये मतिस्तावद्यावदायुर्दृढं तव ।
आयुःकर्मणि संक्षीणे पश्चात्त्वं किं करिष्यसि ॥६०॥
धर्ममाचर यत्नेन मा भवस्त्वं मृतोपमः ।
सद्धर्मं चेतसां पुंसां जीवितं सफलं भवेत् ॥ ६१ ॥
मृता नैव मृतास्ते तु ये नरा धर्मकारिणः ।
जीवंतोऽपि मृतास्ते वै ये नराः पापकारिणः ॥६२॥
धर्मामृतं सदा पेयं दुःखातङ्कविनाशनम् ।
यस्मिन् पीते परं सौख्यं जीवानां जायते सदा ॥६३॥

१ तत्वं ख—पुस्तके । २ आयुषि कर्मसंक्षीणे क—पुस्तके । ३ जीविनां क—पुस्तके ।

स धर्मो यो दयायुक्तः सर्वप्राणिहितप्रदः ।
स एवोत्तारणे शक्तो भवाम्भोधौ सुदुस्तरे ॥ ६४ ॥
यदा कंठगतप्राणो जीवोऽसौ परिवर्तते ।
नान्यः कश्चित्तदा त्राता मुक्त्वा धर्मं जिनोदितम् ॥६५॥
अल्पायुषा नरेणेह धर्मकर्मविजानता ।
न ज्ञायते कदा मृत्युर्भविष्यति न संशयः ॥ ६६ ॥
आयुर्यस्यापि देवज्ञैः परिज्ञाते हितान्तके ।
तस्यापि क्षीयते सद्यो निर्मलोत्तरयोगतः ॥ ६७ ॥
जिनैर्निगदितं धर्मं सर्वसौख्यमहानिधिम् ।
ये न तं प्रतिपद्यन्ते तेषां जन्मनिरर्थकम् ॥ ६८ ॥
हितं कर्म परित्यज्य पापकर्मसु रज्यते ।
तेन वै दह्यते चेतः शोचनीयो भविष्यति ॥ ६९ ॥
यदि नामाप्रियं दुःखं सुखं वा यदि वा प्रियम् ।
ततः कुरुत सद्धर्मं जिनानां जितजन्मनाम् ॥ ७० ॥
विशुद्धादेव संकल्पात्समं सद्भिरुपार्ज्यते ।
स्वल्पेनैव प्रयासेन चित्रमेतदहो परम् ॥७१॥
धर्म एव सदा त्राता जीवानां दुःखसंकटात् ।
तस्मात्कुरुत भो यत्नं यत्रानन्तसुखप्रदे ॥७२॥

---

१ अस्याग्रे भावप्राभृतस्येयं गाथा वर्तते ।

जीवविमुक्को सवओ दंसणमुक्को य होइ चलसवओ ।
सवओ लोयअपुज्जो लोउत्तरयम्मि चलसवओ ॥१॥

२ तस्य सः क—पुस्तके । ३ निमितोत्तारयोगतः क—पुस्तके । ४ 'तत्र प्रपद्यन्ते क । ५ तत्रा ख ।

यत्त्वया न कृतो धर्मः सदा मोक्षसुखावहः ।
प्रसन्नमनसा येन तेन दुःखी भवानिह ॥७३॥
यत्त्वया क्रियते कर्म विषयान्धेन दारुणम् ।
उदये तस्य सम्प्राप्ते कस्ते त्राता भविष्यति ॥७४॥
भुक्त्वाप्यनन्तरं भोगान् देवलोके यथेप्सितान् ।
यो हि तृप्तिं न सम्प्राप्तः स किं प्राप्स्यति सम्प्रति ॥७५॥
वरं हालाहलं भुक्तं विषं तद्भवनाशनम् ।
न तु भोगविषं भुक्तमनन्तभवदुःखदम् ॥७६॥
इन्द्रियप्रभवं सौख्यं सुखाभासं न तत्सुखम् ।
तच्च कर्मविबन्धाय दुःखदानैकपण्डितम् ॥७७॥
अक्षाश्वानिश्चलं धत्स्व विषयोत्पथगामिनः ।
वैराग्यप्रग्रहाकृष्टान् सन्मार्गे विनियोजयेत् ॥७८॥
अक्षाण्येव स्वकीयानि शत्रवो दुःखहेतवः ।
विषयेषु प्रवृत्तानि कषायवशवर्तिनः ॥ ७९ ॥
इन्द्रियाणां यदा छंदे वर्तते मोहसंगतः ।
तदात्मैव तव शत्रुरात्मनो दुःखबन्धनः ॥ ८० ॥
इन्द्रियाणि प्रवृत्तानि विषयेषु निरन्तरम् ।
सज्ज्ञानभावनाशक्त्या वारयन्तीह ते रताः ॥ ८१ ॥[1]
इन्द्रियेच्छारुजामर्त्यः[2] कुरुते यो ह्युपक्रमम् ।
तमेव मन्यते सौख्यं किं तु कष्टमतः परम् ॥ ८२ ॥
आत्माभिलापरागाणां यः समः क्रियते बुधैः ।
तदेव परमं तत्त्वमित्यूचुर्भवबेदिनः ॥ ८३ ॥

१ वारयन्ति हिते रताः ख । २ मन्त्यः ।

इन्द्रियाणां समे लाभं रागद्वेषजयेन च ।
आत्मानं योजयेत्सम्यक् संसृतिच्छेदकारणम् ॥ ८४ ॥
इन्द्रियाणि वशे यस्य यस्य दुष्टं न मानसम् ।
आत्मा धर्मरतो यस्य सफलं तस्य जीवितम् ॥ ८५ ॥
परनिन्दासु ये मूका निजश्लाघ्यपराङ्मुखाः ।
ईदृशैर्ये गुणैर्युक्ताः पूज्याः सर्वत्र विष्टपे ॥८६॥
प्राणान्तिकेऽपि सम्प्राप्ते वर्जनीयानि साधुना ।
परं लोकविरुद्धानि येनात्मा सुखमश्नुते ॥ ८७ ॥
स मानयति भूतानि यः सदा विनयान्वितः ।
स प्रियः सर्वलोकेऽस्मिन्नापमानं समश्नुते ॥ ८८ ॥
किम्पाकस्य फलं भक्ष्यं कदाचिदपि धीमता ।
विषयास्तु न भोक्तव्या यद्यपि स्युः सुपेशलाः ॥ ८९ ॥
स्त्रीसम्पर्कसमं सौख्यं वर्णयन्त्यबुधा जनाः ।
विचार्यमाणमेतद्धि दुःखानां बीजमुत्तमम् ॥ ९० ॥
स्मराग्निना प्रदग्धानि शरीराणि शरीरिणाम् ।
शमाम्भसा हि सिक्तानि निर्वृत्तिं नैव भेजिरे ॥ ९१ ॥
अग्निना तु प्रदग्धानां स(श)मोस्तीति यतोऽत्र वै ।
स्मरवह्निप्रदग्धानां स(श)मो नास्ति भवेष्वपि ॥ ९२ ॥
मदनोऽस्ति महाव्याधिर्दुश्चिकित्स्यः सदा बुधैः ।
संसारवर्धनेऽत्यर्थं दुःखोत्पादनतत्परः ॥ ९३ ॥
यावदस्य हि कामाग्निहृदये प्रज्वलत्यलम् ।
आश्रयन्ति हि कर्माणि तावदस्य निरन्तरम् ॥ ९४ ॥

१ युक्तास्ते पूज्याः सर्वविष्टपे ख. । २ परलोक ख. । ३ आश्रूयन्ति ख. ।
४ तावत्तस्य ख. ।

कामाहिदृढदष्टस्य तीव्रा भवंति वेदना ।
यदा सुमोहितो जन्तुः संसारे परिवर्तते ॥ ९५ ॥
दुःखानामाकरो यस्तु संसारस्य च वर्धनम् ।
स एव मदनो नाम नराणां स्मृतिसूदनः ॥ ९६ ॥
संकल्पाच्च समुद्भूतः कामसर्पोतिदारुणः ।
रागद्वेषद्विजिव्होऽसौ वशीकर्तुं न शक्यते ॥ ९७ ॥
दुष्टा येयमनङ्गेच्छा सेयं संसारवर्धिनी ।
दुःखस्योत्पादने शक्ता शक्ता चित्तस्य नाशने ॥ ९८ ॥
अहो ते धिषणाहीना ये स्मरस्य वशं गताः ।
कुर्वा कल्मषमात्मानं पातयन्ति भवार्णवे ॥ ९९ ॥
स्मरेणातीवरौद्रेण नरकावर्तपातिना ।
अहो खलीकृतो लोको धर्मामृतपराङ्मुखः ॥ १०० ॥
खरेण स्मरणादेव वैरं दैवनियोगतः ।
हृदये निहितं शल्यं प्राणिनां तापकारकम् ॥ १०१ ॥
तस्मात्कुरुत सद्वृत्तं जिनमार्गरताः सदा ।
ये सत्खंडितो याति स्मरशल्यं सुदुर्धरम् ॥ १०२ ॥
चित्तसंदूषकः कामस्तथा सद्गतिनाशनः ।
सद्वृत्तध्वंसनश्चासौ कामोऽनर्थपरम्परा ॥ १०३ ॥
दोषाणामाकरः कामो गुणानां च विनाशकृत् ।
पापस्य च निजो बन्धुः परापदां चैव संगमः ॥ १०४ ॥
पिशाचेनैव कामेन छिद्रितं सकलं जगत् ।
यंभ्रमेति परायत्तं भवाब्धौ स निरन्तरम् ॥ १०५ ॥

---

१ तीव्रभासातिवेदना. क. । २ यस्यासिमोहितो क. । ३ वन्दनः ख. । ४ संदूषणः ख । ५ निरन्तरः क ।

वैराग्यभावनामंत्रैस्तन्निवार्य महानलं ।
स्वच्छन्दवृत्तयो धीराः सिद्धिसौख्यं प्रपेदिरे ॥ १०६ ॥
कामी त्यजति सद्वृत्तं गुरोर्वाणीं ह्रियं तथा ।
गुणानां समुदायं च चेतः स्वास्थ्यं तथैव च ॥ १०७ ॥
तस्मात्कामः सदा हेयो मोक्षसौख्यं जिघृक्षुभिः ।
संसारं च परित्यक्तुं वाञ्छद्भिर्यतिसत्तमैः ॥ १०८ ॥
कामार्थौ वैरिणौ नित्यं विशुद्धध्यानरोधनौ ।
संत्यज्यतां महाक्रूरौ सुखं संजायते नृणाम् ॥ १०९ ॥
कामदाहो वरं सोढुं न तु शीलस्य खण्डनम् ।
शीलखंडनशीलानां नरके पतनं ध्रुवं ॥ ११० ॥
कामदाहः सदा नैव स्वल्पकालेन शाम्यति ।
सेवनाच्च महापापं[1] नरकावर्तपातनम् ॥ १११ ॥
सुतीव्रेणापि कामेन स्वल्पकालं तु वेदना ।
खंडनेन तु शीलस्य भवकोटिषु वेदना ॥ ११२ ॥
नियतं प्रशमं याति कामदाहः सुदारुणः ।
ज्ञानोपयोगसामर्थ्याद्विषं मंत्रपदैर्यथा ॥ ११३ ॥
असेवनमनङ्गस्य शमाय परमं स्मृतम् ।
सेवनाच्च परा वृद्धिः शमस्तु न कदाचन ॥ ११४ ॥
उपवासोऽवमोदर्यं रसानां त्यजनं तथा ।
अस्नानसेवनं चैव ताम्बूलस्य च वर्जनम् ॥ ११५ ॥
असेवेच्छानिरोधस्तु निरनुस्मरणं तथा ।
एते हि निर्जरोपाया मदनस्य महारिपोः ॥ ११६ ॥

१ महत्पापं ख ।

कामभिच्छानिरोधेन क्रोधं च क्षमया भृशं ।
जयेन्मानं मृदुत्वेन मोहं संज्ञानसेवया ॥ ११७ ॥
तस्मिन्नुपशमे प्राप्ते युक्तं सद्वृत्तधारणं ।
तृष्णां सुदूरतस्त्यक्त्वा विषान्नमिव भोजनं ॥ ११८ ॥
कर्मणां शोधनं श्रेष्ठं ब्रह्मचर्यंसुरक्षितं ।
सारभूतं चरित्रस्य देवैरपि सुपूजितम् ॥ ११९ ॥
या चैषा प्रमदा भाति लावण्यजलवाहिनी ।
सैषा वैतरणी घोरं दुःखोर्मिशतसंकुला[1] ॥ १२० ॥
संसारस्य च बीजानि दुःखानां राशयः पराः ।
पापस्य च निधानानि निर्मिता केन योषितः ॥ १२१ ॥[2]
इयं सा मदनज्वाला वन्हेरिव समुद्भुता ।
मनुष्यैर्यत्र[3] हूयंते यौवनानि धनानि च ॥ १२२ ॥
नरकावर्तपातिन्यः स्वर्गमार्गदृढार्गलाः ।
अनर्थानां विधायिन्यो योषितः केन निर्मिताः ॥१२३॥
कृमिजालशताकीर्णे दुर्गन्धमलपूरिते ।
विण्मूत्रसंभृते[4] स्त्रीणां का काये रमणीयता ॥ १२४ ॥
अहो ते सुखितां प्राप्ता ये कामानलवर्जिताः ।
सद्वृत्तं विधिनापाल्य यास्यन्ति पदमुत्तमं ॥ १२५ ॥

---

१ घोरा ख. । २ अस्मादग्रे श्लोकोऽयं ख-पुस्तके--
दर्शने हरते चित्तं स्पर्शने हरते धनम् ।
संयोगे हरते प्राणं नारी प्रत्यक्षराक्षसी ॥ १ ॥
३ नराणां ख. । ४ रक्तान्त्रसंभृते ख. ।

भोगार्थी यः करोत्यज्ञो निदानं मोहसंगतः ।
चूर्णीकरोत्यसौ रत्नं अनर्थसूत्रहेतुना ॥ १२६ ॥
भवभोगशरीरेषु भावनीयः सदा बुधैः ।
निर्वेदः परया बुद्ध्या कर्मारातिजिघृक्षुभिः ॥ १२७ ॥
यावन्न मृत्युवज्रेण देहशलो निपात्यते ।
नियुज्यतां मनस्तावत्कर्मारातिपरिक्षये ॥ १२८ ॥
त्यज कामार्थयोः संगं धर्मध्यानं सदा भज ।
छिंद्धि स्नेहमयान् पाशान् मानुष्यं प्राप दुर्लभम् ॥१२९॥
कथं ते भ्रष्टसद्वृत्त ! विषयानुपसेवने ।
पंचतां हरतां तेषां नरके तीव्रवेदना ॥ १३० ॥
सद्वृत्तभ्रष्टचित्तानां विषयासंगसंगिनाम् ।
तेषामिहैव दुःखानि भवन्ति नरकेषु च ॥ १३१ ॥
विषयास्वादलुब्धेन रागद्वेषवशात्मना ।
आत्मा च वंचितस्तेन यः शमं नापि सेवते ॥ १३२ ॥
आत्मनो[1] यत्कृतं कर्म भोक्तव्यं तदनेकधा ।
तस्मात् कर्मास्रवं रुद्ध्वा स्वेन्द्रियाणि वशं नयेत्॥१३३॥
इन्द्रियप्रसरं रुद्ध्वा स्वात्मानं वशमानयेत् ।
येन निर्वाणसौख्यस्य भाजनं त्वं प्रपत्स्यसे ॥ १३४ ॥
सम्पन्नेष्वपि भोगेषु महतां नास्ति गृद्धता ।
अन्येषां गृद्धिरेवास्ति शमस्तु न कदाचन ॥ १३५ ॥
षट्खंडाधिपतिश्चक्री परित्यज्य वसुन्धराम् ।
तृणवत् सर्वभोगाँश्च दीक्षा दैगम्बरी स्थिता ॥ १३६ ॥

१ आत्मानो क, आत्मनो ख ।

कृमितुल्यैः किमस्माभिः भोक्तव्यं वस्तु दुस्तरं ।[1]
तेनात्र गृहपंकेषु सीदामः किमनर्थकम् ॥ १३७॥
येन ते जनितं दुःखं भवाम्भोधौ सुदुस्तरम् ।
कर्मारातिमतीवाद्य[2] विजेतुं किं न वाञ्छसि ॥ १३८ ॥
अब्रह्मचारिणो नित्यं मांसभक्षणतत्पराः ।
शुचित्वं तेऽपि मन्यन्ते किन्तु चिन्त्यमतःपरम् ॥१३९॥
येन संक्षीयते कर्म संचयश्च न जायते ।
तदेवात्मविदा कार्यं मोक्षसौख्याभिलाषिणा ॥ १४० ॥
अनेकशस्त्वया प्राप्ता विविधा भोगसम्पदः ।
अप्सरोगणसंकीर्णे दिवि देवविराजिते ॥ १४१ ॥
पुनश्च नरके रौद्रे रौरवेऽत्यन्तभीतिदे ।
नानाप्रकारदुःखौघैः संस्थितोऽसि विधेर्वशात् ॥ १४२ ॥
तप्ततैलिकभल्लीषु पच्यमानेन यत्त्वया ।
संप्राप्तं परमं दुःखं तद्वक्तुं नैव पार्यते ॥ १४३ ॥
नानायंत्रेषु रौद्रेषु पीड्यमानेन वन्हिना ।
दुःसहा वेदना प्राप्ता पूर्वकर्मनियोगतः ॥१४४॥
विण्मूत्रपूरिते भीमे पूतिश्लेष्मावसाकुले ।
भूयो गर्भगृहे मातुर्दैवाद्यातोऽसि संस्थितिम् ॥ १४५ ॥
तिर्यग्गतौ च यद्दुःखं प्राप्तं छेदनभेदनैः ।
न शक्तस्तत् पुमान् वक्तुं जिव्हाकोटिशतैरपि ॥ १४६ ॥
संसृतौ नास्ति तत्सौख्यं यन्न[3] प्राप्तमनेकधा ।
देवमानवतिर्यक्षु भ्रमता जन्तुनानिशं ॥ १४७ ॥

---

१ भोक्तव्यं वस्तु सुंदरं ख. । २ तं कर्मारातिमत्युग्रं ख. । ३ चिन्न ख. ।

चतुर्गतिनिबन्धेऽस्मिन् संसारेऽत्यन्तभीतिदे ।
सुखदुःखान्यवाप्तानि भ्रमता शिशिरोष्मतः ॥ १४८ ॥
एवंविधमिदं कष्टं ज्ञात्वात्यन्तविनश्वरम् ।
कथं न यासि वैराग्यं धिगस्तु तव जीवितम् ॥१४९॥
जीवितं विद्युता तुल्यं संयोगाः स्वप्नसन्निभाः ।
सन्ध्यारागसमः स्नेहः शरीरं तृणबिन्दुवत् ॥ १५० ॥
शक्रचापसमा भोगाः सम्पदो जलदोपमाः ।
यौवनं जलरेखेव सर्वमेतदशाश्वतम् ॥ १५१ ॥
समानवयसो[1] दृष्ट्वा मृत्युना स्ववशीकृताः ।
कथं चेतः समो नास्ति मनागपि हितात्मनः ॥ १५२ ॥
सर्वाशुचिमये[2] काये नश्वरे व्याधिपीडिते ।
को हि विद्वान् रतिं गच्छेद्यस्यास्ति श्रुतसंगमः ॥१५३॥
चिरं सुखोषितः कामो भोजनाच्छादनादिभिः ।
विकृतिं याति सोऽप्यन्ते कास्था बाह्येषु वस्तुषु ॥१५४॥
नायातो बन्धुभिः सार्धं न गतो बन्धुभिः समं ।
वृथैव स्वजने स्नेहो नराणां मूढचेतसाम् ॥ १५५ ॥
जातेनावश्यमर्तव्यं प्राणिना प्राणधारिणा ।
अतः कुरुत मा शोकं मृते बन्धुजने बुधाः ॥ १५६ ॥
आत्मैकार्थं[3] परित्यज्य परकार्येषु यो[4] रतः ।
ममत्वरतचेतस्कः[5] स्वहितं भ्रंशमेष्यति[6] ॥ १५७ ॥
स्वहितं तु भवेज्ज्ञानं चारित्रं दर्शनं तथा ।
तपःसंरक्षणं चैव सर्वविद्भिस्तदुच्यते ॥ १५८ ॥

---

१ वयसा क. । २ सर्वामयेन कायेन क. । ३ आत्माकार्यं, पुस्तकद्वये । ४ ये रताः पुस्तकद्वये । ५ चेतस्काः क-ख. । ६ स्वहिताद्भ्रंशनेष्यति ख. ।

सुखसंभोगसंमूढा विषयास्वादलम्पटाः ।
स्वहिताद्वशमागत्य गृहवासं सिषेविरे ॥ १५९ ॥
वियोगा बहवो दृष्टा द्रव्याणां च परिक्षयात् ।
तथापि निर्घृणः चेतः सुखास्वादनलम्पटः ॥ १६० ॥
यथा च जायते चेतः सम्यक्शुद्धिं सुनिर्मलाम् ।
तथा ज्ञानविदा कार्यं प्रयत्नेनापि भूरिणा ॥ १६१ ॥
विशुद्धं मानसं यस्य रागादिमलवर्जितम् ।
संसाराग्र्यं फलं तस्य सकलं समुपस्थितम् ॥ १६२ ॥
संसारध्वंसने हीष्टं धृतिमिन्द्रियनिग्रहे ।
कषायविजये यत्नं नाभव्यो लब्धुमर्हति ॥ १६३ ॥
एतदेव परं ब्रह्म न विन्दन्तीह मोहिनः ।
यदेतच्चित्तनैर्मल्यं रागद्वेषादिवर्जितम् ॥ १६४ ॥
तथानुष्ठेयमेतद्धि पंडितेन हितैषिणा ।
यथा न विक्रियां याति मनोऽत्यर्थं विपत्स्वपि ॥१६५॥
धन्यास्ते मानवा लोके ये च प्राप्यापदां पराम् ।
विकृतिं नैव गच्छन्ति यतस्ते साधुमानसाः ॥ १६६ ॥
संक्लेशो न हि कर्तव्यः संक्लेशो बन्धकारणं ।
संक्लेशपरिणामेन जीवो दुःखस्य भाजनं ॥ १६७ ॥
संक्लेशपरिणामेन जीवः प्राप्नोति भूरिशः ।
सुमहत्कर्मसम्बन्धं भवकोटिषु दुःखदम् ॥ १६८ ॥
चित्तरत्नमसंक्लिष्टं महतामुत्तमं धनम् ।
येन सम्प्राप्यते स्थानं जरामरणवर्जितम् ॥ १६९ ॥
सम्पत्तौ विस्मिता नैव विपत्तौ नैव दुःखिताः ।
महतां लक्षणं ह्येतन्न तु द्रव्यसमागमः ॥१७०॥

आपत्सु सम्पतन्तीषु पूर्वकर्मनियोगतः ।
धैर्यमेव परं त्राणं न शुक्तमनुशोचनम् ॥ १७१ ॥
विशुद्धपरिणामेन शान्तिर्भवति सर्वतः ।
संक्लिष्टेन तु चित्तेन नास्ति शान्तिर्भवेष्वपि ॥ १७२ ॥
संक्लिष्टचेतसां पुंसां माया संसारवर्धिनी ।
विशुद्धचेतसो वृत्तिः सम्पत्तिवित्तदायिनी ॥ १७३ ॥
यदा चित्तविशुद्धः स्यादापदः सम्पदस्तथा ।
समस्तत्त्वविदां पुंसां सर्वं हि महतां महत् ॥ १७४ ॥
परोऽप्युत्पथमापन्नो निषेद्धुं युक्त एव सः ।
किं पुनः स्वमनोत्यर्थं विषयोत्पथयायिवत् ॥ १७५ ॥
अज्ञानाद्यदि मोहाद्यत्कृतं कर्म सुकुत्सितम् ।
व्यावर्तयेन्मनस्तस्मात् पुनस्तन्न समाचरेत् ॥ १७६ ॥
अचिरेणैव कालेन फलं प्राप्स्यसि दुर्मते ! ।
विपाकेऽतीव तिक्तस्य कर्मणो यत्त्वया कृतम् ॥१७७॥
वर्धमानं हितं कर्म संज्ञानाद्यो न शोधयेत् ।
सुप्रभूतार्णवसंग्रस्तः स पश्चात्परितप्यते ॥१७८॥
सुखभावकृते मूढाः किं न कुर्वन्ति मानवाः ।
येन सन्तापमायान्ति जन्मकोटिशतेष्वपि ॥१७९॥
परं च वंचयामीति यो हि मायां प्रयुज्यते ।

---

१ विशुद्धि. क । २ तदा ख. । ३ तत्त्वविदां पुंसां ख. । ४ यत्कृतं क. ५ त्यक्तस्य कर्णैव क. । ६ अस्मादग्रे ख-पुस्तके श्लोकोऽयं

स्वल्पेनैव कालेन फलं प्राप्स्यसि यत्कृतं ।
शश्वदात्मककर्मण्यां गोपयस्तुमनागपि ॥१॥

७ सुप्रभूतभूतसंग्रस्त ख. । ८ कृता क. ।

इहामुत्र च लोके वै तैरात्मा वंचितः सदा ॥१८०॥
पंचतासन्नतां प्राप्तं न कृतं सुकृतार्जनं ।
स मानुषेऽपि संप्राप्ते हा! गतं जन्म निष्फलम्? ॥१८१॥
कर्मपाशविमोक्षाय यत्नं यस्य न देहिनः ।
संसारे च महागुप्तौ बद्धः संतिष्ठते सदा ॥१८२॥
गृहचारकवासेऽस्मिन् विषयामिषलोभिनः ।
सीदंति नरशार्दूला बद्धा बान्धवबन्धनैः ॥१८३॥
गर्भवासेऽपि यद्दुःखं प्राप्तमत्रैव जन्मनि ।
अधुना विस्मृतं केन येनात्मानं न बुध्यसे ॥१८४॥
चतुरशीतिलक्षेषु योनीनां भ्रमता त्वया ।
प्राप्तानि दुःखशल्यानि नानाकाराणि मोहिना ॥१८५॥
कथं नोद्विजसे मूढ ! दुःखात् संसृतिसंभवात् ।
येन त्वं विषयासक्तो लोभेनास्मिन् वशीकृतः ॥१८६॥
यत्त्वयोपार्जितं कर्म भवकोटिषु पुष्कलं ।
तच्छेत्तुं चेन्न शक्तोऽसि गतं ते जन्म निष्फलम् ॥१८७॥
अज्ञानी क्षिपयेत्कर्म यज्जन्मशतकोटिभिः ।
तज्ज्ञानी तु त्रिगुप्तात्मा निहन्त्यन्तर्मुहूर्ततः ॥१८८॥
जीवितेनापि किं तेन कृता न निर्जरा तदा ।
कर्मणां संवरो वापि संसारासारकारिणाम् ॥१८९॥
स जातो येन जातेन स्वकृता पक्वपाचना ।
कर्मणां पाकघोराणां विविधेन महात्मनाम् ॥१९०॥
रोषे रोषं परं कृत्वा माने मानं विधाय च ।
सङ्गे सङ्गं परित्यज्य स्वात्माधीनसुखं कुरु ॥१९१॥

---

१ अधुना किं विस्मृतं तेन ख. । २ कर्मणां क. । ३ तेन ख. । ४ निबुद्धेन ख. ।

परिग्रहे महाद्वेषो मुक्तौ च रतिरुत्तमा ।
सद्ध्याने चित्तमेकाग्रं रौद्रार्ते नैव संस्थितम् ॥ १९२ ॥
धर्मस्य संचये यत्नं कर्मणां च परिक्षये ।
साधूनां नेहितं चित्तं सर्वपापप्रणाशनम् ॥१९३॥
मानस्तंभं दृढं भंक्त्वा लोभाद्रिं च विदार्य वै ।
मायावल्लीं समुत्पाट्य क्रोधशत्रुं निहत्य च ॥ १९४ ॥
यथाख्यातं हितं प्राप्य चारित्रं ध्यानतत्परः ।
कर्मणां प्रक्षयं कृत्वा प्राप्नोति परमं पदम् ॥ १९५ ॥
संगादिरहिता धीरा रागादिमलवर्जिताः ।
शान्ता दान्तास्तपोभूषा मुक्तिकांक्षणतत्पराः ॥१९६॥
मनोवाक्काययोगेषु प्रणिधानपरायणाः ।
वृत्ताढ्या ध्यानसम्पन्नास्ते पात्रं करुणापराः ॥ १९७ ॥
श्रुतिभावनया युक्ता शुभभावनयान्विताः ।
तत्त्वार्थाहितचेतस्कास्ते पात्रं दातुरुत्तमाः ॥ १९८ ॥
धृतिभावनया दुःखं सत्त्वभावनया भयम् ।
ज्ञानभावनया कर्म नाशयन्ति न संशयः ॥ १९९ ॥
अग्रहो[1] हि शमे येषां विग्रहं कर्मशत्रुभिः ।
विषयेषु निरासक्तास्ते पात्रं यतिसत्तमाः ॥२००॥
निःसंगिनोऽपि वृत्ताढ्या निस्नेहाः सुश्रुतिप्रियाः ।
अभूषा पि तपोभूषास्ते पात्रं योगिनः सदा ॥२०१॥
यैर्ममत्वं सदा त्यक्तं स्वकायेऽपि मनीषिभिः ।
ते पात्रं संयतात्मानः सर्वसत्त्वहिते रताः ॥ २०२ ॥

1 अग्राह्ये हि समे ख. ।

परीषहजये शक्तं शक्तं कर्मपरिक्षये ।
ज्ञानध्यानतपोभूषं शुद्धाचारपरायणं ॥ २०३ ॥
प्रशान्तमानसं सौख्यं प्रशान्तकरणं शुभं ।
प्रशान्तारिमहामोहकामक्रोधनिसूदनम् ॥ २०४ ॥
निन्दास्तुतिसमं धीरं शरीरेऽपि च निस्पृहं ।
जितेन्द्रियं जितक्रोधं जितलोभमहाभटं ॥ २०५॥
रागद्वेषविनिर्मुक्तं सिद्धिसंगमनोत्सुकम् ।
ज्ञानध्यानरतं[1] नित्यं नित्यं च प्रशमे स्थितम् ॥२०६॥
एवं विधं हि यो दृष्ट्वा स्वगृहाङ्गणमागतम् ।
मात्सर्यं कुरुते मोहात् क्रिया तस्य न विद्यते ॥ २०७ ॥

चतुर्भिः कुलकम् ।

मायां निरासिकां कृत्वा तृष्णां च परमौजसः ।
रागद्वेषौ समुत्सार्य प्रयाता पदमक्षयम् ॥ २०८ ॥
धीराणामपि ते धीरा ये निराकुलचेतसः ।
कर्मशत्रुमहासैन्यं ये जयन्ति तपोबलात् ॥ २०९ ॥
परीषहजये शूराः शूराश्चेन्द्रियनिग्रहे ।
कषायविजये शूरास्ते शूरा गदिता बुधैः ॥ २१० ॥
नादत्तेऽभिनवं कर्म सच्चारित्रनिविष्टधीः ।
पुराणं निर्जयेद्गाढं विशुद्धध्यानसंगतः ॥ २११ ॥
संसारावासनिर्विण्णाः शिवसौख्यसमुत्सुकाः ।
सद्भिस्ते गदिताः प्राज्ञाः शेषाः स्वार्थस्य[2] वंचकाः ॥२१२॥
समता सर्वभूतेषु यः करोति सुमानसः ।
ममत्वभावनिर्मुक्तो यात्यसौ पदमव्ययम् ॥ २१३ ॥

---

१ ज्ञानध्यानरतो क । २ स्वार्थस्य ख. ।

इन्द्रियाणां जये शूराः कर्मबन्धे च कातराः ।
तत्त्वार्थाहितचेतस्काः स्वशरीरेऽपि निस्पृहाः ॥ २१४ ॥
परीषहमहारातिवननिर्दलनक्षमाः ।
कषायविजये शूराः स शूर इति कथ्यते ॥२१५॥
संसारध्वंसिनीं चर्यां ये कुर्वंति सदा नराः ।
रागद्वेषहतिं कृत्वा ते यान्ति परमं पदम् ॥ २१६ ॥
मलैस्तु रहिता धीरा मलदग्धाङ्गयष्टयः ।
सद्ब्रह्मचारिणो नित्यं ज्ञानाभ्यासं सिषेविरे ॥ २१७ ॥
ज्ञानभावनया शक्ता निभृतेनान्तरात्मनः ।
अप्रमत्तं गुणं प्राप्य लभन्ते हितमात्मनः ॥ २१८ ॥
संसारावासभीरूणां त्यक्तान्तर्बाह्यसंगिनाम् ।
विषयेभ्यो निवृत्तानां श्लाघ्यं तेषां हि जीवितम्॥२१९॥
समः शत्रौ च मित्रे च समो मानापमानयोः ।
लाभालाभे समो नित्यं लोष्टकांचनयोस्तथा ॥ २२० ॥
सम्यक्त्वभावनाशुद्धं ज्ञानसेवापरायणं ।
चारित्राचरणासक्तमक्षीणसुखकांक्षिणम् ॥२२१॥
ईदृशं श्रमणं दृष्ट्वा यो न मन्येत दुष्टधीः ।
नृजन्मनिष्फलं सारं संहारयति सर्वथा ॥२२२॥
रागादिवर्जनं सङ्गं परित्यज्य दृढव्रताः ।
धीरा निर्मलचेतस्काः तपस्यन्ति महाधियः ॥२२३॥
संसारोद्विग्नचित्तानां निःश्रेयससुखैषिणाम् ।
सर्वसंगनिवृत्तानां धन्यं तेषां हि जीवितम् ॥२२४॥

१ परमां गतिं ख. । २ दिग्धा० ख. । ३ सिषा ख. । ४ निभृतैरन्तरात्मनः ख. । ५ परित्यक्त क. । ६ प्रपश्यन्ति क. । ७ महद्धियाः क. ।

सप्तभीस्थानमुक्तानां यत्रास्तमितशायिनाम् ।
त्रिकालयोगयुक्तानां जीवितं सफलं भवेत् ॥२२५॥
आर्तरौद्रपरित्यागाद् धर्मशुक्लसमाश्रयात् ।
जीवः प्राप्नोति निर्वाणमनन्तसुखमच्युतं ॥२२६॥
आत्मानं विनयांम्याशु विषयेषु पराङ्मुखः ।
साधयेत्स्वहितं प्राज्ञो ज्ञानाभ्यासरतो यतिः ॥२२७॥
यथा संगपरित्यागस्तथा कर्मविमोचनम् ।
यथा च कर्मणां छेदस्तथासन्नं परं पदम् ॥२२८॥
यत्परित्यज्य गन्तव्यं तत्स्वकीयं कथं भवेत् ।
इत्यालोच्य शरीरेऽपि विद्वान् तां च परित्यजेत् ॥२२९॥
नूनं नात्मा प्रियस्तेषां ये रताः संगसंग्रहे ।
समासीनाः प्रक्रांतस्थाः स्वीकर्तुं नैवशक्यतं ॥२३०॥
शरीरमात्रसंगेन भवेदारंभवर्धनम् ।
तदशाश्वतमत्राणं तस्मिन् विद्वान् रतिं त्यजेत् ॥२३१॥
संगात्संजायते गृद्धिर्गृद्धौ वाञ्छति संचयम् ।
संचयाद्वर्धते लोभो लोभाद्दुःखपरंपरा ॥२३२॥
ममत्वाज्जायते लोभो लोभाद्रागश्च जायते ।
रागाच्च जायते द्वेषो द्वेषाद्दुःखपरंपरा ॥२३३॥
निर्ममत्वं परं तत्वं निर्ममत्वं परं सुखं ।
निर्ममत्वं परं बीजं मोक्षस्य कथितं बुधैः ॥२३४॥
निर्ममत्वे सदा सौख्यं संसारस्थितिच्छेदनम् ।
जायते परमोत्कृष्टमात्मनः संस्थिते सति ॥२३५॥

---

१ विनयाभ्यासे ख. । २ विद्वानाद्यो परित्यजेत् ख. । ३ मंत्राणां क, मात्राणां ख. । ४ भेदनं क. ।

अर्थो मूलमनर्थानामर्थो निर्वृतिनाशनम् ।
कषायोत्पादकश्चार्थो दुःखानां च विधायकः ॥ २३६ ॥
भामोज्झितानि वित्तानि त्वया सर्वाणि संसृतौ ।
पुनस्तेषु रतिः कथं भुक्तवान्त इवौदने ॥ २३७ ॥
को वा वित्तं समादाय परलोकं गतः पुमान् ।
येन तृष्णाग्निसंतप्तः कर्म बध्नाति दारुणम् ॥ २३८ ॥
तृष्णान्धा नैव पश्यन्ति हितं वा यदि वाहितम् ।
सन्तोषाञ्जनमासाद्य पश्यन्ति सुधियो जनाः ॥ २३९ ॥
सन्तोषसारसद्रत्नं समादाय विचक्षणाः ।
भवन्ति सुखिनो नित्यं मोक्षसन्मार्गवर्तिनः ॥ २४० ॥
तृष्णानलप्रदीप्तानां सुसौख्यं तु कुतो नृणाम् ।
दुःखमेव सदा तेषां ये रता धनसंचये ॥ २४१ ॥
सन्तुष्टाः सुखिनो नित्यमसन्तुष्टाः सुदुःखिताः ।
उभयोरन्तरं ज्ञात्वा सन्तोषे क्रियतां रतिः ॥ २४२ ॥
द्रव्याशां दूरतस्त्यक्त्वा सन्तोषं कुरु सन्मते ! ।
मा पुनर्दीर्घसंसारे पर्यटिष्यसि निश्चितम् ॥ २४३ ॥
ईश्वरो नाम सन्तोषी यो प्रार्थयते परम् ।
प्रार्थना महतामत्र परं दारिद्र्यकारणम् ॥ २४४ ॥
हृदयं दह्यतेऽत्यर्थं तृष्णाग्निपरितापितं ।
न शक्यं शमनं कर्तुं विना सन्तोषवारिणा ॥ २४५ ॥
यैः सन्तोषामृतं पीतं निर्ममत्वेन वासितं ।
त्यक्तं तैर्मानसं दुःखं दुर्जनेनेव सौहृदं ॥ २४६ ॥

---

१ कथं ख. । २ क्रियते क । ३ सन्तोषोदकं ख. । ४ दुर्जनैनैव क ।

यैः सन्तोषमृतं पीतं तृष्णातृट्प्रणाशनं।
तैश्च निर्वाणसौख्यस्य कारणं समुपार्जितम् ॥ २४७॥
सन्तोषं[1] लोभनाशाय रतिं च सुखशान्तये।
ज्ञानं च तपसां वृद्धौ धारयन्ति दिगम्बराः ॥ २४८ ॥
ज्ञानदर्शनसम्पन्न आत्मा चैको ध्रुवो मम।
शेषा भावाश्च मे बाह्या सर्वे संयोगलक्षणाः ॥ २४९ ॥
संयोगमूलजीवेन प्राप्ता दुःखपरंपरा।
तस्मात्संयोगसम्बन्धं त्रिविधेन परित्यजेत् ॥ २५०॥
ये हि जीवादयो भावाः सर्वज्ञैर्भाषिताः पुराः।
अन्यथा च क्रियास्तेषां चिंततार्थनिरर्थकाः[3] ॥ २५१ ॥
यथा च कुरुते जन्तुर्भमत्वं विपरीतधीः।
तथा हि बन्धमायाति कर्मणस्तु समन्ततः ॥ २५२ ॥
अज्ञानाभूतचित्तानां रागद्वेषरतात्मनाम्।
आरंभेषु प्रवृत्तानां हितं तस्य न भीतवत् ॥ २५३ ॥
परिग्रहपरिष्वङ्गाद्रागद्वेषश्च जायते।
रागद्वेषौ महाबन्धः कर्मणां भवकारणम् ॥ २५४ ॥
सर्वसङ्गान्[4] पशून् ? कृत्वा ध्यानाग्निनाहुतिं क्षिपेत्।
कर्माणि समिधश्चैव योगोऽयं सुमहाफलम् ॥ २५५ ॥
राजसूयसहस्राणि अश्वमेधशतानि च।
अनन्तभागतुल्यानि न स्युस्तेन कदाचन ॥२५६॥
सा प्रज्ञा या शमे याति विनियोगपुराहिता।
शेषा च निर्दया प्रज्ञा कर्मोपार्जनकारिणी ॥२५७॥

---

१ संतोषो क। २ धृतिः ख.। ३ चिन्तात्र निरर्थकाः ख। ४ सर्वसंगात् पसून् कृत्वा ख.

प्रज्ञाङ्गना सदा सेव्या पुरुषेण सुखावहा ।
हेयोपादेयतत्वज्ञा या रता सर्वकर्मणि ॥ २५८ ॥
दयाङ्गना सदा सेव्या सर्वकाल[1]फलप्रदा ।
सेवितासौ करोत्याशु मानसं करुणात्मनम्[2] ॥ २५९ ॥
मैत्र्यङ्गना सदोपास्या हृदयानन्दकारिणी ।
या विधत्ते कृतोपास्तिश्चित्तं विद्वेषवर्जितं ॥ २६० ॥
सर्वसत्वे दया मैत्री यः करोति सुमानसः ।
जयत्यसावरीन् सर्वान् बाह्याभ्यन्तरसंस्थितान् ॥२६१॥
शर्मं नयन्ति भूतानि ये शक्ता देशनाविधा ।
कालादिलब्धियुक्तानि[3] प्रत्यहं तस्य निर्जरा ॥ २६२ ॥
शमो हि न भवेद्येषां ते नराः पशुसन्निभाः ।
समृद्धा अपि तच्छास्त्रे[4] कामार्थरति सङ्गिनः ॥ २६३ ॥
भ्रान्तं ( न्त्रं ) नरकतिर्यक्षु भ्रमतोऽपि निरन्तरं ।
यतोऽसौ[5] विद्यते नैव समो दुरितवन्धिनः[6] ॥२६४॥
मनसाल्हादिनी सेव्या सर्वकालसुखप्रदा ।
उपसेव्या त्वया भद्र ! क्षमा नाम कुलाङ्गना ॥ २६५ ॥
क्षमया क्षीयते कर्म[7] दुःखदं पूर्वसंचितं ।
चित्तं च जायते शुद्धि विद्वेषभयवार्जितम् ॥२६६॥
प्रज्ञा[8] तथा च मैत्री च समता करुणा क्षमा ।
सम्यक्त्वसहिता सेव्या सिद्धिसौख्यसुखप्रदा ॥२६७॥

---

१ कामः ख. २ करुणात्मनां क; करुणात्मजं ख । ३ युक्तस्य ख. । ४ सच्छास्त्रे ख. । ५ जन्तोः सुविद्यते ख. । ६ अस्मात् श्लोकात्पूर्वमयं श्लोकः ख—पुस्तके ।

कर्मणां ध्वंसने चित्तं रागं मोहादिनाशने ।
द्वेषं कषायवर्गं च नायोग्यो लब्धुमर्हति ॥ १ ॥

७ कर्म क. । ८ प्रज्ञासूया ख. ।

भयं याहि भवाद्भीमात् प्रीतिं च जिनशासने ।
शोकं पूर्वकृतात्पापाद्यदीच्छेद्धितमात्मनः ॥२६८॥
कुसंसर्गः सदा त्याज्यो दोषाणां प्रविधायकः ।
सगुणोऽपि जनस्तेन लघुतां याति तत्क्षणात् ॥२६९॥
सत्सङ्गो हि बुधैः कार्यः सर्वकालसुखप्रदः ।
तेनैव गुरुतां याति गुणहीनोऽपि मानवः ॥२७०॥
साधूनां खलसंगेन चेष्टितं मलिनं भवेत् ।
सैंहिकेय[1]समाशङ्कया भाव्यं भानोरपि क्षयः ? ॥२७१॥
रागादयो महादोषाः खलास्ते गदिता बुधैः ।
तेषां समाश्रयस्त्याज्यस्तत्त्वविद्भिः सदा नरैः ॥२७२॥
गुणाः सुपूजिता लोके गुणाः कल्याणकारकाः ।
गुणहीना हि लोकेऽस्मिन् महान्तोऽपि मलीमसाः॥२७३॥
सद्गुणैः गुरुतां याति कुलहीनोऽपि मानवः ।
निर्गुणः सत्कुलाढ्योऽपि लघुतां याति तत्क्षणात् ॥२७४॥
सद्वृत्तः पूज्यते देवैराखण्डलपुरःसरैः ।
असद्वृत्तस्तु लोकेऽस्मिन्निन्द्यतेऽसौ सुरैरपि ॥२७५॥
चारित्रं तु समादाय ये पुनर्भोगमागताः ।
ते साम्राज्यं परित्यज्य दास्यभावं प्रपेदिरे ॥२७६॥
शीलसंधारिणां पुंसां मनुष्येषु सुरेषु च ।
आत्मा गौरवमायाति परत्रेह च संततं ॥२७७॥
आपदो हि महाघोराः सत्त्वसाधनसंगतैः ।
निस्तीर्यन्ते[2] महोत्साहैः शीलरक्षणतत्परैः ॥२७८॥

---

१ सैंहिकेयात्समासक्त्या भयाभागोऽपि क्षया ख. । २ निस्तीर्यंते ख. ।

वरं तत्क्षणतो मृत्युः शीलसंयमधारिणाम् ।
न तु सच्छीलभंगेन साम्राज्यमपि जीवितम् ॥२७९॥
धनहीनोऽपि शीलाढ्यः पूज्यः सर्वत्र विष्टपे ।
शीलहीनो धनाढ्योऽपि न पूज्यः स्वजनेष्वपि ॥२८०॥
वरं शत्रुगृहे भिक्षा याचना शीलधारिणां ।
न तु सच्छीलभंगेन साम्राज्यमपि जीवितम् ॥ २८१ ॥
वरं सदैव दारिद्र्यं शीलैश्वर्यसमन्वितम् ।
न तु शीलविहीनानां विभवाश्चक्रवर्तिनः ॥२८२॥
धनहीनोऽपि सद्वृत्तो याति निर्वाणनाथतां ।
चक्रवर्त्यप्यसद्वृत्तो याति दुःखपरम्पराम् ॥२८३॥
सुखरात्रिर्भवेत्तेषां येषां शीलं सुनिर्मलम् ।
न सच्छीलविहीनानां दिवसोऽपि सुखावहः ॥२८४॥
देहं दहति कायाग्निस्तत्क्षणं समुदीरितम् ।
वर्धमानः समाभग्यं चिरकालसमार्जितम् ॥२८५॥
क्रोधेन वर्धते कर्म दारुणं भववर्धनम् ।
शिक्षा च क्षीयते सद्यस्तपसा समुपार्जितम् ॥२८६॥
सुदुष्टमनसा पूर्वं यत्कर्मसमुपार्जितम् ।
तस्मिन् फलप्रदेयास्ते कोऽन्येषां क्रोधमुद्वहेत् ॥२८७॥
विद्यमाने रणे यद्वच्चेतसो जायते धृतिः ।
कर्मणा योध्यमानेन किं विमुक्तिर्न जायते ॥२८८॥
स्वहितं यः परित्यज्य सयत्नं पापमाहरेत् ।
क्षमां न चेत्करोम्यस्य स कृतघ्नो न विद्यते ॥२८९॥

१ कल्पान्तमपि ख. । २ श्लोकोऽयं ख-पुस्तके नास्ति । ३ दिवसो न क
४ फलप्रदेयास्ति ख । ५ च. ख. ।

शत्रुभावस्थितान् यस्तु करोति वशवर्तिनः ।
प्रज्ञाप्रयोगसामर्थ्यात् स शूरः स च पंडितः ॥२९०॥

विवादो हि मनुष्याणां धर्मकामार्थनाशकृत् ।
वैरान् बन्धुजनो नित्यं वाहितुं कर्मणा जनाः॥२९१॥

धन्यास्ते मानवा नित्यं ये सदा क्षमया युताः ।
वंचमाना स ? वै लुब्धा विवादं नैवकुर्वते ॥२९२॥

वादेन बहवो नष्टा येऽपि द्रव्यमहोत्कटाः ।
वरमर्थपरित्यागो न विवादः खलैः सह ॥२९३॥

अहंकारो हि लोकाना विनाशाय न वृद्धये ।
यथा विनाशकाले स्यात् प्रदीपस्य शिखोज्वला ॥२९४॥

हीनयोनिषु बंभ्रम्य चिरकालमनेकधा ।
उच्चगोत्रे सकृत्प्राप्ते कोऽन्यो मानं समुद्वहेत् ॥ २९५॥

रागद्वेषौ महाशत्रू मोक्षमार्गमलिम्लुचौ ।
ज्ञानध्यानतपोरत्नं हरतः सुचिरार्जितम् ॥ २९६ ॥

चिरं गतस्य संसारे बहुयोनिसमाकुले।
प्राप्ता सुदुर्लभा बोधिः शासने जिनभाषिते ॥ २९७ ॥

अधुना तां समासाद्य संसारच्छेदकारिणीम् ।
प्रमादो नोचितः कर्तुं निमेषमपि धीमता ॥ २९८॥

प्रमादं ये तु कुर्वन्ति मूढा विषयलालसाः ।
नरकादिषु तिर्यक्षु ते भवन्ति चिरं नराः ॥ २९९ ॥

आत्मा यस्य वशे नास्ति कुतस्तस्य परे जनाः ।
आत्माधीनस्य शान्तस्य त्रैलोक्यं वशवर्तिनः ॥ ३०० ॥

१ बन्धुजन नापि नित्यं नाहितकर्मणा ख. । २ वर्तिनं ख ।

आत्माधीनं तु यत्सौख्यं तत्सौख्यं वर्णितं बुधैः ।
पराधीनं तु यत्सौख्यं दुःखमेव न तत्सुखं ॥ २०१ ॥
पराधीनं सुखं कष्टं राज्ञामपि महौजसां ।
तस्मादेतत् समालोच्य आत्मायत्तं सुखं कुरु ॥ २०२ ॥
आत्मायत्तं सुखं लोके परायत्तं न तत्सुखं ।
एतत् सम्यग्विजानन्तो मुंह्यन्ते[1] मानुषाः कथम् ॥२०३॥
नो संगाज्जायते सौख्यं मोक्षसाधनमुत्तमम् ।
संगाच्च जायते दुःखं संसारस्य निबन्धनम् ॥ २०४ ॥
पूर्वकर्मविपाकेन बाधायां यच्च शोचनम् ।
तदिदं तु स्वदष्टस्य जरच्चेडाहिताडनम् ॥ २०५ ॥
अन्यो हि बाधते दुःखं मानसं न विचक्षणे ।
पवनैर्नीयते तूलं मेरोः शृङ्गं न जातुचित् ॥ २०६॥
परज्ञानफलं वृत्तं न विभूतिर्गरीयसी ।
तथा[2] हि वर्धते कर्म सद्वृत्तेन विमुच्यते ॥२०७॥
संवेगः परमं कार्यं श्रुतस्य गदितं बुधैः ।
तस्माद्ये धनमिच्छन्ति ते त्विच्छंत्यमृताद्विषम् ॥ २०८॥
श्रुतं वृत्तं शमो येषां धनं परमदुर्लभम् ।
ते नरा धनिनः प्रोक्ताः शेषा निर्धनिनः सदा ॥२०९॥
को वा तृप्तिं समायातो भोगैर्दुरितबन्धनैः ।
देवो वा देवराजो वा चक्राङ्को वा नराधिपः ॥ २१० ॥
आत्मा वै सुमहत्तीर्थं यदासौ प्रशमे स्थितः ।
यदासौ प्रशमो नास्ति ततस्तीर्थनिरर्थकम् ॥२११॥

---

१ मुच्यन्ते क । जरत् चेन्याहिताडनं ख । २ यथा क. ।

शीलव्रतजले स्नातुं शुद्धिरस्य शरीरिणः ।
न तु स्नातस्य तीर्थेषु सर्वेष्वपि महीतले ॥२१२॥
रागादिवर्जितं स्नानं ये कुर्वन्ति दयापराः ।
तेषां निर्मलता योगैर्न[1] च स्नातस्य वारिणा ॥२१३॥
आत्मानं स्नापयेन्नित्यं ज्ञाननीरेण चारुणा ।
येन निर्मलतां याति जीवो जन्मान्तरेष्वपि ॥२१४॥
सर्वाशुचिमये काये शुक्रशोणितसंभवे ।
शुचित्वं येऽभिवाञ्छन्ति नष्टास्ते जडचेतसः ॥२१५॥
औदारिकशरीरेऽस्मिन् सप्तधातुमयेऽशुचौ ।
शुचित्वं येऽभिमन्यन्ते पशवस्तेन मानवः ॥२१६॥
सत्येन शुद्ध्यते वाणी मनो ज्ञानेन शुद्ध्यति ।
गुरुशुश्रूषया कायः शुद्धिरेष सनातनः ॥२१७॥
स्वर्गमोक्षोचितं नृत्वं मूढैर्विषयलालसैः ।
कृतं स्वल्पसुखस्यार्थे तिर्यङ्नरकभाजनम् ॥२१८॥
सामग्रीं प्राप्य सम्पूर्णां यो विजेतुं निरुद्यमः ।
विषयारिमहासैन्यं तस्य जन्मानिरर्थकम् ॥२१०॥
निरवद्यं वदेद्वाक्यं मधुरं हितमर्थवत् ।
प्राणिना चेतसोऽह्लादि मिथ्यावादंबहिष्कृतम्[2] ॥२२०॥
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं किं वाक्येऽपि दरिद्रता ॥२२१॥
व्रतं शीलतपोदानं संयमोऽर्हत्पूजनम् ।
दुःखविच्छित्तये सर्वं प्रोक्तमेतन्न संशयः ॥२२२॥

१ योगे क. योगैर्ये ख.। २ वादिक ख.।

तृणतुल्यं परद्रव्यं परं[1] च स्वशरीरवत् ।
पररामां समां मातुः पश्यन् याति परं पदम् ॥३२३॥
सम्यक्त्वसमतायोगे नैःसंग्यं[2] क्षमतां[3] तथा ।
कषायविषयासंगः कर्मणां निर्जरा परा ॥३२४॥
अयं तु कुलभद्रेण भवविच्छित्तिकारणम् ।
दब्धो बालस्वभावेन ग्रन्थः सारसमुच्चयः ॥३२५॥
ये भक्त्या भावयिष्यन्ति भवकारणनाशनम् ।
तेऽचिरेणैव कालेन प्राप्य? प्राप्स्यंति शाश्वतम् ॥३२६॥
सारसमुच्चयमेतद्ये पठन्ति समाहिताः ।
ते स्वल्पेनैव कालेन पदं यास्यन्त्यनामयं ॥३२७॥
नमः परमसद्ध्यानविघ्ननाशनहेतवे ।
महाकल्याणसम्पत्तिकारिणेऽरिष्टनेमये ॥३२८॥

**इति *श्रीकुलभद्रविरचितं *सारसमुच्चयचारित्रं समाप्तम् ।**

---

१ परं वंचः शरीरवत् क. । २ नैसंगं क. । ३ समता क. ।

* पुष्पमध्यगतः पाठः पुस्तकद्वयेऽपि नास्ति । ' इति सारसमुच्चग्रन्थसमाप्तं ' इति ख–पुस्तके पाठः ।

सिरिसुहचंदाइरियविरइया

# अंगपण्णत्ती ।

## द्वादशाङ्गप्रज्ञप्तिः ।

सिद्धं बुद्धं णिच्चं णाणाभूसं णमीय सुहयंदं ।
वोच्छे पुव्वपमाणमेगारहअंगसंजुत्तं ॥ १ ॥

सिद्धं बुद्धं नित्यं ज्ञानभूषणे नत्वा शुभचन्द्रम् ।
वक्ष्ये पूर्वप्रमाणमेकादशाङ्गसंयुक्तम् ॥

तिविहं पयं जिणेहिमत्थपयं खलु पमाणपयमुत्तं ।
तदियं मज्झपयं हु तत्थत्थपयं परूवेमो ॥ २ ॥

त्रिविधं पदं जिनैरर्थपदं खलु प्रमाणपदमुक्तम् ।
तृतीयं मध्यमपदं हि तत्रार्थपदं प्ररूपयामः ॥

जाणदि अत्थं सत्थं अक्खरवूहेण जेत्तियेणेव ।
अत्थपयं तं जाणह घडमाणय सिग्घमिच्चादि ॥ ३ ॥

जानाति अर्थं सार्थं अक्षरव्यूहेन यावतैव ।
अर्थपदं तज्जानीहि घटमानय शीघ्रमित्यादि ॥

छंदपमाणपबद्धं पमाणपयमेत्थ मुणह जं तं खु ।
मज्झपयं जं आगमभणियं तं सुणह भवियजणा ॥ ४ ॥

छन्दःप्रमाणप्रबद्धं प्रमाणपदमत्र जानीहि यत्तत् खलु ।
मध्यमपदं यदागमभणितं तच्छृणुत भव्यजनाः ! ॥

सोलससयचोत्तीसा कोडी तियसीदिलक्खयं अत्थ ।
सत्तसहस्सट्ठसयाऽडसीदऽपुणरुत्तपदवण्णा ॥ ५ ॥

षोडशशतचतुस्त्रिंशत्कोट्यः त्र्यशीतिलक्षाणि यत्र ।
सप्तसहस्राणि अष्टशतान्यष्टाशीतिपुनरुक्तपदवर्णाः
१६३४, ८३, ७, ८, ८८ मध्यमपदाक्षरसंख्या ।

**संखसहस्सपयेहिं संघादसुदं णिरूवियं जाण ।**
**इगिदरगदीण रम्मं तं संखेज्जेहिं पडिवत्ती ॥ ६ ॥**

संख्यातसहस्रपदैः संघातश्रुतं निरूपितं जानीहि ।
एकतरगतीनां रम्यं तत्संख्यातैः प्रतिपत्तिः ॥

**चउगइसरूवरूवयपडिसंखदेहिं अणियोगं ।**
**चोद्दसमग्गणसण्णाभेयविसेसेहि संजुत्तं ॥ ७ ॥**

चतुर्गतिस्वरूपरूपकप्रतिपत्तिसंख्यातैरनुयोगम् ।
चतुर्दशमार्गणासंज्ञाभेदविशेषैः संयुक्तं ॥

**चउरादीअणियोगे पाहुडपाहुडसुदं सया होदि ।**
**चउवीसे तम्हि हवे पाहुडयं वत्थुअहियारे ॥ ८ ॥**

चतुराद्यनुयोगे प्राभृतप्राभृतश्रुतं सदा भवति ।
चतुर्विंशतौ तस्मिन् भवेत् प्राभृतं वस्तुन्यधिकारे ॥

**वीसं वीसं पाहुडअहियारे एकवत्थु अहियारो ।**
**तहिं दस चोद्दस अट्ठट्ठारसयं बार बारं च ॥ ९ ॥**

विंशतौ विंशतौ प्राभृताधिकारे एकवस्त्वधिकारः ।
तत्र दश चतुर्दश अष्ट अष्टादश द्वादश द्वादश च ।

**सोलं च वीस तीसं पण्णारसयं च चउसु दस वत्थु ।**
**एदेहि वत्थुएहिं चउदसपुव्वा हवंति पुणो ॥ १० ॥**

षोडश च विंशतिः त्रिंशत् पंचदश च चतुर्षु दश वस्तूनि ।
एतैः वस्तुभिः चतुर्दशपूर्वाणि भवन्ति पुनः ॥

**पणणउदिसया वत्थू णवयसया तिसहस्सपाहुडया ।**
**चउदस पुव्वे सव्वे हवंति मिलिदा य ते तत्थ ॥ ११ ॥**

पंचनवतिशतानि वस्तूनि नवकशतानि त्रिसहस्रप्राभृतानि ।
चतुर्दश पूर्वाणि सर्वाणि भवन्ति मिलितानि च तानि तत्र ॥

वत्थू १९५ वत्थू एकं प्रति पाहुड २० । पाहुडसंख्या ३९००, पाहुड एकं प्रति पाहुड, ( पाहुड ) २४ जात अनुयोगसंख्या ९३, ६, ४०० अनुयोगे पाहुडसंख्या ।

**सयकोडी बारुत्तर तेसीदीलक्खमंगगंथाणं ।**
**अट्ठावण्णसहस्सा पयाणि पंचेव जिणदिट्ठं ॥ १२ ॥**

शतकोटिः द्वादशोत्तरा त्र्यशीतिलक्षाण्यङ्गग्रंथानां ।
अष्टपंचाशत्सहस्राणि पदानि पंचैव जिनदृष्टानि ॥

द्वादशाङ्गश्रुतपदानां संख्या ११२, ८३, ५८,००,५ ।

**पण्णत्तरि वण्णाणं सयं सहस्साणि होदि अट्ठेव ।**
**इगिलक्खमट्ठकोडि पइण्णयाणं पमाणं हु ॥ १३ ॥**

पंचसप्ततिः वर्णानां शतं सहस्राणि भवंति अष्टैव ।
एकलक्षं अष्टकोट्यः प्रकीर्णकानां प्रमाणं हि ॥

अङ्गबाह्यश्रुताक्षरसंख्या ८, ०१, ०१, १७५ ।

**पणदस सोलस पण पण णव णभ सग तिण्णि[1] चेव सगं[2] ।**
**सुण्णं[3] चउचउसगछचउचउअट्ठेकसव्व[4]सुदवण्णा ॥१४॥**

पंचदश षोडश पंच पंच नव नभः सप्त त्रीणि चैव सप्त ।
शून्यं चतुःचतुःसप्तषट्चतुःचतुरष्टैकसर्वश्रुतवर्णाः ॥

---

१ तिणि पुस्तके पाठः । २ सग इति पाठः पुस्तके । ३ सुणं पुस्तके पाठः । ४ सव इति पाठः पुस्तके ।

सर्वश्रुताक्षराणि—

१८४४६७४४०७३७०९५५१६१५ ।

आयारं पढमंगं तत्थट्ठारससहस्सपयमेत्तं ।
यत्थायरंति भव्वा मोक्खपहं तेण तं णाम ॥ १५ ॥

आचारं प्रथमांगं तत्राष्टादशसहस्रपदमात्रं ।
यत्राचरन्ति भव्या मोक्षपथं तेन तन्नाम ।

कहं चरे कहं तिट्ठे कहमासे कहं सये ।
कहं भासे कहं भुंजे कहं पावं ण बंधइ ॥ १६ ॥

कथं चरेत् कथं तिष्ठेत् कथमासीत कथं शयीत ।
कथं भाषेत कथं भुंजीत कथं पापं न बध्यते ।

जदं चरे जदं तिट्ठे जदमासे जदं सये ।
जदं भासे जदं भुंजे एवं पावं ण बंधइ ॥ १७ ॥

यतं चरेत् यतं तिष्ठेत् यतं आसीत यतं शयीत ।
यतं भाषेत यतं भुंजीत एवं पापं न बध्यते ॥

महव्वयाणि पंचेव समिदीओक्खरोहणं ।
लोओ आवसयाछक्कमवच्छण्हभूसया ॥ १८ ॥

महाव्रतानि पंचैव समितयोऽक्षरोधनं ।
लोच आवश्यकषट्कं अवस्त्रस्नानभूशयनानि ॥

अदंतवणमेगभत्ती ठिदिभोयणमेव हि ।
यदीणं यं समायारं वित्थरेणं परूवए ॥ १९ ॥

अदन्तमनैकभक्ते स्थितिभोजनमेव हि ।
यतीनां यं समाचारं विस्तारेणैव प्ररूपयेत् ॥

आचाराङ्गस्य पदानि १८००० । आचाराङ्गस्य श्लोकसंख्या, ९१९-५९२३११८७००० । आचाराङ्गस्य अक्षरसंख्या २९९२६९५४-१९८४०००० इति ।

आयारांगं गदं—इत्याचाराङ्गं गतं ।

---

सूदयडं विदियंगं छत्तीससहस्सपयपमाणं खु ।
सूचयदि सुत्तत्थं संखेवा तस्स करणं तं ॥ २० ॥

सूत्रकृत् द्वितीयाङ्गं षट्त्रिंशत्सहस्रपदप्रमाणं खलु ।
सूचयति सूत्रार्थं संक्षेपेण तस्य करणं तत् ॥

णाणविणयादिविग्घातीदाज्झयणादिसव्वसक्किरिया ।
पण्णायणा (य) सुकथा कप्पं ववहारविसकिरिया ॥ २१ ॥

ज्ञानविनयादिविघ्नातीतस्वाध्यायादिसर्वसत्क्रिया ।
प्रज्ञापना च सुकथा कल्प्यं व्यवहारवृषक्रिया ॥

छेदोवट्ठावणं जइण समयं यं परूवदि ।
परस्स समयं जत्थ किरियाभेया अणेयसे ॥ २२ ॥

छेदोपस्थापनं यतीनां समयं यत् प्ररूपयति ।
परस्य समयं यत्र क्रियाभेदान् अनेकशः ॥

पयपमाणं ३६००० । श्लोकप्रमाणं १८३९१८४६ ३७४००० अक्षरप्रमाणं ५८८५३९०८३९६८००० ।

इदि सूदयडं विदियंगं गदं—इति सूत्रकृद् द्वितीयाङ्गं गतं ।

---

बादालसहस्सपदं ठाणंगं ठाणभेयसंजुत्तं ।
चिट्ठंति ठाणभेया एयादी जत्थ जिणदिट्ठा ॥ २३ ॥

---

१ तस्य सूत्रस्य कृतं करणं । २ स्वसमयं जैनसमयं ।

द्वाचत्वारिंशत्सहस्रपदं स्थानाङ्गं स्थानभेदसंयुक्तं ।
तिष्ठन्ति स्थानभेदा एकादयो यत्र जिनदृष्टाः ॥

**संगहणयेण जीवो एको ववहारदो दु संसारिओ मुत्तो ।**
**सो तिविहो पुणुप्पादव्वयधोव्वसंजुत्तो ॥ २४ ॥**

संग्रहनयेन जीव एको व्यवहारतस्तु संसारी मुक्तः ।
स त्रिविधः पुनरुत्पादव्ययध्रौव्यसंयुक्तः ॥

**चउगइसंकमणजुदो पंचविहो पंचभावभेएण ।**
**पुव्वपरदक्खिणुत्तरउड्ढाधोगमणदो छद्धा ॥ २५ ॥**

चतुर्गतिसंक्रमणयुक्तः पंचविधः पंचभावभेदेन ।
पूर्वापरदक्षिणोत्तरोर्ध्वाधोगमनतः षोढा ॥

**सिय अत्थि णत्थि उहयं सिय वत्तव्वं च अत्थिवत्तव्वं ।**
**सिय वत्तव्वं णत्थि उभहो वत्तव्वमिदि सत्त ॥ २६ ॥**

स्यादस्ति, नास्ति, उभयः, स्यादवक्तव्यः, अस्त्यवक्तव्यः, ।
स्यादवक्तव्यो नास्ति, उभयोऽवक्तव्य इति सप्त ॥

**अट्ठविहकम्मजुत्तो अत्थि णवच्छ णवत्थगो जीवो ।**
**पुढविजलतेउवाउपत्तेयणिगोयवितिचपगा ॥ २७ ॥**

अष्टविधकर्मयुक्तः अस्ति नवधा नवार्थको जीवः ।
पृथ्वीजलतेजोवायुप्रत्येकनिगोदद्वित्रिचतुःपंचेन्द्रियाः ॥

**दहभेया पुण जीवा एयमजीवं तु पुग्गलो एक्को ।**
**अणुखंधादो दुविहो एवं सव्वत्थ णायव्वं ॥ २८ ॥**

दशभेदाः पुनः जीवा एकोऽजीवः तु पुद्गलः एकः ।
अणुस्कन्धतो द्विविध एवं सर्वत्र ज्ञातव्यं ॥

ठाणंगस्स पयप्पमाणं ४२००० । श्लोक २१४५७१५४१०३००० अक्षरप्रमाणं ६८६६२८९३१२९६००० ।

इदि ठाणांगं तिदियं गदं–इति स्थानाङ्गं तृतीयं गतम् ।

समवायंगं अडकदिसहस्समिगिलक्खमाणुपयमेत्तं ।
संगहणयेण दव्वं खेत्तं कालं पडुच्च भवं ॥ २९ ॥
समवायाङ्गं अष्टकृतिसहस्रं एकलक्षमानपदमात्रं ।
संग्रहनयेन द्रव्यं क्षेत्रं कालं प्रतीत्य भावं ॥
दीवादी अवियंति अत्था णज्जंति सरित्थसामण्णा ।
दव्वा धम्माधम्माजीवपदेसा तिलोयसमा ॥ ३० ॥
द्वीपादयो अवेयन्ते अर्था ज्ञायन्ते सदृशसामान्येन ।
द्रव्येण धर्माधर्मजीवप्रदेशाः त्रिलोकसमाः ॥
सीमंतणरय माणुसखेत्तं उडुइंदयं च सिद्धिसिलं ।
सिद्धट्ठाणं सरिसं खेत्तासयदो मुणेयव्वं ॥ ३१ ॥
सीमन्तनरकं मानुषक्षेत्रं ऋत्विन्द्रकं च सिद्धिशिला ।
सिद्धस्थानं सदृशं क्षेत्राश्रयतो मंतव्यं ॥
ओहिट्ठाणं जंबूदीवं सव्वत्थसिद्धि सम्माणं ।
णंदीसरवावीओ वाणिंदपुराणि सरिसाणि ॥ ३२ ॥
अवधिस्थानं जम्बूद्वीपः सर्वार्थसिद्धिः समानं ।
नन्दीश्वरवाप्यः वानिन्द्रपुराणि सदृशानि ॥
समओ समएण समो आवलिएणं समा हु आवलिया ।
कालेण पढमपुढवीणारय भोमाण वी (वा) णाणं ॥ ३३ ॥

१ स्थानाङ्गस्य पदप्रमाणं । २ द्रव्यापेक्षया इत्यर्थः । ३ एते पंच पंचचत्वारिंशल्लक्षप्रमिताः । ४ व्यन्तरेन्द्राणां पुराणि । ५ एतानि सर्वाणि स्थानानि एकलक्षयोजनप्रमितानि ।

समयः समयेन सम आवलिकया समा हि आवलिका।
कालेन प्रथमपृथ्वीनारकाणां भौमानां बानानां ॥

**सरिसं जहण्णआऊ सत्तमखिदिणारयाण उक्कस्सं।**
**सव्वट्ठाणं आऊ सरिसं उस्सप्पिणीपमुहं ॥ २४ ॥**

सदृशं जघन्यायुः सप्तमक्षितिनारकाणामुत्कृष्टं।
सर्वार्थस्थानां आयुः सदृशं उत्सर्पिणीप्रमुखं ॥

**भावे केवलणाणं केवलदंसणसमाणयं दिट्ठं।**
**एवं जत्थ सरित्थं वेंति जिणा सव्वअत्थाणं ॥ २५ ॥**

भावेन केवलज्ञानं केवलदर्शनसमानं दिष्टं।
एवं यत्र सदृशं जानन्ति जिना सर्वार्थान् ॥

समवायांगपदं १६४००० । श्लोक ८२७८५०७७९२६००० ।
अक्षर २६८११२२४९२६३२००० ।

इति समवायांगं चउत्थं गदं—इति समवायाङ्गं चतुर्थं गतं।

---

**दुगदुगअडतियसुण्णं विवायपण्णत्तिअंगपरिमाणं।**
**णाणाविसेसकहणं वेंति जिणा जत्थ गणिपण्हा ॥ २६ ॥**

द्विकद्विकत्रिकशून्यं विपाकप्रज्ञप्त्यङ्गपरिमाणं।
नानाविशेषकथनं ब्रुवन्ति जिना यत्र गणिप्रश्नान् ॥

**किं अत्थि णत्थि जीवो णिच्चोऽणिच्चोऽहवाह किं एगो।**
**वत्तव्वो किमवत्तव्वो हि किं भिण्णो ॥ २७ ॥**

किमस्ति नास्ति जीवो नित्योऽनित्योऽथवाथ किमेकः।
वक्तव्यः किमवक्तव्यो हि किं भिन्नः ॥

**गुणपज्जयादभिण्णो सट्ठिसहस्सा गणिस्स पण्हेवं।**
**जत्थत्थि तं वियाणपण्णत्तिमंगं खु ॥ २८ ॥**

गुणपर्यायाभ्याममिन्नः षष्टिसहस्राणि गणिनः प्रश्नाः ।
यत्र सन्ति तद्विपाकप्रश्नम्यंगं खलु ॥

विवायपण्णत्तिअंगपदं २२८० । श्लोक ११६४८१६९२७०२०-००। वर्ण ३७२७४१४१९८४६४००० ।

इदि विवागपण्णत्तिअंगं गदं—इति विपाकप्रश्नास्यंगं गतं ।

---

**णाणकहाछहंगं पयाइं पंचेव जत्थत्थि ।**
**छप्पण्णं च सहस्सा णाहकहाकहणसंजुत्तं ॥ ३९ ॥**

ज्ञातृकथाषष्ठाङ्गं पदानि पंचैव यत्र सन्ति ।
षट्पंचाशच्च सहस्राणि नाथकथाकथनसंयुक्तं ॥

**णाहो तिलोयसामी धम्मकहा तस्स तच्चसंकहणं ।**
**घाइकम्मखयादो केवलणाणेण रम्मस्स ॥ ४० ॥**

नाथः त्रिलोकस्वामी धर्मकथा तस्य तत्वसंकथनं ।
घातिकर्मक्षयात् केवलज्ञानेन रम्यस्य ॥

**तित्थयरस्स तिसंज्झे णाहस्स सुमज्झिमाय रत्तीए ।**
**बारहसहासु मज्झे छग्घडियादिव्वझुणीकालो ॥ ४१ ॥**

तीर्थंकरस्य त्रिसंध्यायां नाथस्य सुमध्यमायां रात्रौ ।
द्वादशसभासु मध्ये षड्घटिका दिव्यध्वनिकालः ॥

**होदि गणिचक्किमहवपण्हादो अण्णदावि दिव्वझुणि ।**
**सो दहलक्खणधम्मं कहेदि खलु भवियवरजीवे ॥ ४२ ॥**

भवति गणिचक्रिमघवप्रश्नतः अन्यदापि दिव्यध्वनिः ।
स दशलक्षणधर्मं कथयति खलु भव्यवरजीवे ॥

**णादारस्स य पण्हा गणहरदेवस्स णायमाणस्स ।**
**उत्तरवयणं तस्स वि जीवादी वत्थुकहणे सा ॥ ४३ ॥**

---

1 जीवादिवस्तुस्वभावकथनं ।

ज्ञातुश्च प्रश्नाः गणधरदेवस्य जिज्ञासमानस्य ।
उत्तरवचनं तस्यापि जीवादिवस्तुकथनं सा ॥

**अहवा णादाराणं धम्माणुकहादिकहणमेवं सा ।**
**तित्थगणिचक्कणरवरसक्काईणं च णाहकहा ॥ ४४ ॥**

अथवा ज्ञातॄणां धर्मानुकथादिकथनमेवं सा ।
तीर्थगणिचक्रिनरवरशक्रादीनां च नाथकथा ॥

ज्ञातृधर्मकथांगस्य पदानि ५५६००० । श्लोक २८४०५१८४९५-५४००० । वर्ण ९०९६५९१८५७२८००० ।

इति णाहधम्मकहाणाम छट्ठमंगं गदं–इति ज्ञातृधर्मकथानाम षष्ठाङ्गं गतं ।

**सत्तरिसहस्स लक्खा एयारह जत्थुवासयज्झयणे ।**
**उत्तं पयप्पमाणं जिणेण तं णमह भवियजणा ॥४५॥**

सततिसहस्रं लक्षाणि एकादश यत्रोपासकाध्ययने ।
उक्तं पदप्रमाणं जिनेन तं नमत भव्यजनाः ] ॥

**दंसणवयसामाइयपोसहसचित्तरायभत्ते य ।**
**बंभारंभपरिग्गहअणुमणमुद्दिट्ठ देसविरदेदे ॥४६॥**

दर्शनव्रतसामायिकप्रोषधसचित्तरात्रिभक्ताश्च ।
ब्रम्हारंभपरिग्रहानुमतोद्दिष्टा देशविरता एते ॥

**जत्थे यारहसड्ढा दाणं पूयं च संहसेवं च ।**
**वयगुणसीलं किरिया तेसिं मंता वि वुच्चंति ॥४७॥**

यत्रैकादशश्रद्धा दानं पूजा च संघसेवा च ।
व्रतगुणशीलानि क्रिया तेषां मंत्रा अपि उच्यन्ते ॥

उपासकाध्ययनस्य पदानि ११७०००० । श्लोकाः ५९७७३५०० ७१५५००० । अक्षर १९१२७५२०२२८९६०००० ।

इदि उवासयज्झयणं सत्तमं अंगं गदं–इत्युपासकाध्ययनं सप्तममङ्गं गतम् ।

**अंतयडे वरमंगं पयाणि तेवीसलक्ख सुसहस्सा ।**
**अट्ठावीसं जत्थ हि वण्णिज्जइ अंतकयणाहो ॥४८॥**

अन्तकृद्वरमङ्गं पदानि त्रयोविंशतिलक्षाणि सहस्राणि ।
अष्टाविंशतिः यत्र हि वर्ण्यते अन्तकृन्नाथः ॥

**पडितित्थं वरमुणिणो दह दह सहिऊण तिव्वमुवसग्गं ।**
**इंदादिरइयपूयं लद्धा मुंचंति संसारं ॥४९॥**

प्रतितीर्थं वरमुनयो दश दश सोढ्वा तीव्रमुपसर्गं ।
इन्द्रादिरचितपूजां लब्ध्वा मुञ्चन्ति संसारं ॥

**माहप्पं वरचरणं तेसिं वण्णिज्जए सया रम्मं ।**
**जह वड्ढमाणतित्थे दहावि अंतयडकेवलिओ ॥५०॥**

माहात्म्यं वरचरणं तेषां वर्ण्यते सदा रम्यं ।
यथा वर्धमानतीर्थे दशापि अन्तकृत्केवलिनः ॥

**मायंग रामपुत्तो सोमिल जमलीकणाम किक्कंबी ।**
**सुदंसणो बलीको य णमी अलंबद्ध पुत्तलया ॥५१॥**

मतंगो रामपुत्रः सोमिलः यमलीकनाम किष्कंविलः ।
सुदर्शनः बलिकश्च नमिः पालंबष्टः पुत्राः ॥

अन्तकृद्दशाङ्गस्य पदानि २३२८००० । श्लोकाः ११८९३९३-९८८५२००० । अक्षराणि ३८०५८८६०७६३२३४००० ।

इदि अंतयड दसांगमट्ठमं गदं—इत्यन्तकृद्दशाङ्गमष्टमं गतम् ।

---

**तिणहच्चउच्चउदुगणवपयाणि चाणुत्तरोववाददसे ।**
**विजयादिसु पंचसु य उववायिका विमाणेसु ॥५२॥**

त्रिनभश्चतुश्चतुर्द्विकनवपदानि चानुत्तरोपपाददशके ।
विजयादिषु पंचसु च औपपादिका विमानेषु ॥

**पडितित्थं सहिऊण हु दारुणउवसग्गलद्धमाहप्पा :**
**दह दह मुणिणो विहिणा पाणे मोत्तूण झाणमया ॥५३॥**

प्रतितीर्थं सोढ्वा हि दारुणोपसर्गं उपलब्धमाहात्म्याः ।
दश दश मुनयो विधिना प्राणान् मुक्त्वा ध्यानमयाः ॥

**विजयादिसु उववण्णा वण्णिज्जंते सुहावसुहबहुला ।**
**ते णमह वीरतित्थे उजुदासो सालिभद्दक्खो ॥५४॥**

विजयादिषूपपन्ना वर्ण्यन्ते स्वभावसुखबहुलाः ।
तान् नमत वीरतीर्थे ऋजुदासः शालिभद्राख्यः ॥

**सुणक्खत्तो अभयो वि य धण्णो वरवारिसेणणंदणया ।**
**णंदो चिलायपुत्तो कत्तइयो जह तह अण्णे ॥५५॥**

सुनक्षत्रोऽभयोऽपि च धन्यः वरवारिषेणनन्दनौ ।
नन्दः चिलातपुत्रः कार्तिकेयो यथा तथा[1] अन्येषु ॥

अनुत्तरोपपादाङ्गस्य पदानि ९२४४००० । श्लोकाः ४७२२६१७४४१४६००० । अक्षराणि १५११२३७५८१८६६७००० ।

इदि अणुत्तरोववादं णवमं अंगं गदं—इत्यनुत्तरोपपादं नवमं अङ्गं गतं ।

---

**पण्हाणं वायरणं अंगं पयाणि तियसुण्णसोलसियं ।**
**तेणवदिलक्खसंखा जत्थ जिणा बेंति सुणह जणा ॥५६॥**

प्रश्नानां व्याकरणमङ्गं पदानि त्रिशून्यषोडश ।
त्रिनवतिलक्षसंख्या यत्र जिना ब्रुवन्ति शृणुत जनाः ! ॥

**पण्हस्स दूदवयणणट्ठपमुट्ठिमणुत्थयसरूवस्स ।**
**धादुणरमूलजस्स वि अत्थो तियकालगोचरयो ॥ ५७ ॥**

प्रश्नस्य दूतवचननष्टप्रमुष्टिमनःस्थस्वरूपस्य ।
धातुनरमूलजास्यापि अर्थस्त्रिकालगोचरः ॥

---

१ यथा वर्धमानतीर्थे एते तथान्येषु तीर्थेषु अन्ये दश ।

धणधण्णजयपराजयलाहालाहादिसुहदुहं पोयं ।
जीवियमरणत्थो वि य जत्थ कहिज्जइ सहावेण ॥ ५८ ॥

धन्यधान्यजयपराजयलाभालाभादिसुखदुःखं ।
जीवितमरणार्थोऽपि च यत्र कथ्यते स्वभावेन ॥

आक्खेवणी कहाए कहिज्जइ पण्हदो सुभव्वस्स ।
परमदसंकारहिदं तित्थयरपुराणवत्तंतं ॥ ५९ ॥

आक्षेपणी कथा कथ्यते प्रश्नतः सुभव्यस्य ।
परमतशंकारहिते तीर्थंकरपुराणवृत्तान्ते ॥

पढमाणुयोगकरणाणुयोगवरचरणदव्वअणुयोगं ।
संठाणं लोयस्स य यदिसावयधम्मवित्थारं ॥ ६० ॥

प्रथमानुयोगकरणानुयोगवरचरणद्रव्यानुयोगानि ।
संस्थानं लोकस्य च यतिश्रावकधर्मविस्तारं ॥

पंचत्थिकायकहणं वक्खाणिज्जइ सहावदो जत्थ ।
विक्खेवणी वि य कहा कहिज्जइ जत्थ भव्वाणं ॥ ६१ ॥

पंचास्तिकायकथनं व्याख्यायते स्वभावतो यत्र ।
विक्षेपणी अपि च कथा कथ्यते यत्र भव्यानां ॥

पच्चक्खं च परोक्खं माणं दुविहं णया परे दुविहा ।
परसमयवादखेवो करिज्जई वित्थरा जत्थ ॥ ६२ ॥

प्रत्यक्षं च परोक्षं मानं द्विविधं नयाः परे द्विविधाः ।
परसमयवादक्षेपः क्रियते विस्तारेण यत्र ॥

दंसणणाणचरित्तं धम्मो तित्थयरदेवदेवस्स ।
तम्हा पभावतेजोवीरियवरम(र)णाणसुहआदि ॥६३॥

दर्शनज्ञानचरित्राणि धर्मः तीर्थंकरदेवदेवस्य ।
तस्मात् प्रभावतेजोवीर्यवरज्ञानसुखादयः ॥

**संवेजणीकहाए भणिज्जइ सयलभव्वबोहत्थं ।**
**णिव्वेजणीकहाए भणिज्जइ परम वेरग्गं ॥ ६४ ॥**

संवेजनीकथया भण्यते सकलभव्यबोधनार्थं ।
निर्वेजनीकथया भण्यते परमवैराग्यं ॥

**संसारदेहभोगा रागो जीवस्स जायदे तम्हा ।**
**असुहाणं कम्माणं बंधो तत्तो हवे दुक्खं ॥६५॥**

संसारदेहभोगा रागो जीवस्य जायते तस्मात् ।
अशुभानां कर्मणां बन्धः ततो भवेद्दुःखं ॥

**असुहकुले उप्पत्ती विरूवदालिद्दरोयबाहुल्लं ।**
**अवमाणं णरलोए परकम्मकरो महापावो ॥६६॥**

अशुभकुले उत्पत्तिः विरूपदारिद्र्यरोगबाहुल्यं ।
अपमानं नरलोके परकर्मकरो महापापः ॥

**एवंविहं कहाणं वायरणं वेज्ज पण्हवायरणे ।**
**दहमे अंगे णिच्चं करिज्जमाणं सया सुणह ॥६७॥**

एवंविधं कथानां व्याकरणं वेद प्रश्नव्याकरणे ।
दशमेऽङ्गे नित्यं क्रियमाणं सदा शृणुत ॥

प्रश्नव्याकरणाङ्गस्य पदानि ९३१६००० । श्लोकाः ४७५९४०११३३८९४००० । अक्षराणि १५१३००८३६२८४६०८०००

इदि पण्हवायरणं दहमं अंगं गदं-इति प्रश्नव्याकरणं दशमं अंगं गतम् ।

---

**चुलसीदिलक्ख कोडी पयाणि णिच्चं विवागसुत्ते य ।**
**कम्माणं बहुसत्ती सुहासुहाणं हु मज्झिमया ॥६८॥**

चतुरशीतिलक्षाणि कोटिः पदानि नित्यं विपाकसूत्रे च ।
कर्मणां बहुशक्तिः शुभाशुभानां हि मध्यमका ॥

तिव्वमंदाणुभावा दव्वे खेत्ते काले भावे य ।
उदयो विवायरूवो भणिज्जइ जत्थ वित्थारा ॥६९॥

तीव्रमन्दानुभावा द्रव्ये क्षेत्रे काले भावे च ।
उदयो विपाकरूपो भण्यते यत्र विस्तारेण ॥

विपाकसूत्रांगस्य पदानि १८४००००० । श्लोका: ९४००२७७०३५६००००० । वर्णा: ३००८०८८६५१३९२००००० ।

इदि विवागसुत्तंगं एकादसं गदं–इति विपाकसूत्रांगं एकादशं गतं ।

---

एयारंगपयाणि य कोडीचउपंचदहसुलक्खाइं ।
वि सहस्सादो वोच्छे पुव्वपमाणं समासेण ॥ ७० ॥

एकादशाङ्गपदानि च कोटिचतुष्कपंचदशलक्षाणि ।
अपि सहस्रे द्वे वक्ष्ये पूर्वप्रमाणं समासेण ॥

एकादशानामङ्गनां पदानि ४१५०२००० । श्लोका: २१२०२७-३३५६१४९२००० । अक्षराणि ६७८४८७४७३९६७७७६०००

इदि एक्कादसांगाणि पदाणि–इत्येकादशाङ्गानि गतानि ।

---

दिट्ठिप्पवादमंगं परियम्मं सुत्त पुव्वगं चेव ।
पढमाणुओग चूलिय पंचपयारं णमंसामि ॥ ७१ ॥

दृष्टिप्रवादमङ्गं परिकर्म सूत्रं पूर्वाङ्गं चैव ।
प्रथमानुयोगं चूलिका पंचप्रकारं नमामि ॥

तत्थ पयाणि पंच य णभ णभ छ पंच अट्ठ छड सुण्णं ।
अंक कमेण य णेयाणि जिणागमे णिच्चं ॥ ७२ ॥

तत्र पदानि पंच नभो नभ: षट् पंच अष्ट षट् अष्ट शून्यं ।
अंकं क्रमेण च ज्ञेयानि जिनागमे नित्यं ॥

दृष्टिवादाङ्गपदसंख्या १०८६८५६००५। श्लोकाः ५५५२५८०१८०७२९५४२७१०७। वर्णसंख्या १७७६८२५६५११६६१६६७४४०।

**दिट्ठीणं तिण्णि सया तेसट्ठीणं वि मिच्छवायाणं।**
**जत्थ णिराकरणं खलु तण्णामं दिट्ठिवादंगं ॥ ७३ ॥**

दृष्टीनां त्रिशतानि त्रिषष्टेः मिथ्यावादानां।
यत्र निराकरणं खलु तन्नाम दृष्टिवादाङ्गम् ॥

**तं जहा**—तद्यथा—

**किरियावायदिट्ठीणं कोक्कल–कंठेविद्धि–कोसिय–हरिमंसु–मांधाविय–रोमस–मुंड–अस्सलायणादीणं असीदिसदं ( १८० )**

क्रियावादिनां कौत्कल–कंठेविद्धि–कौशिक–हरिश्मश्रु–मांधविक–रोमश–मुंड–आश्वलायनादीनां अशीतिशतं ( १८० )।

**अकिरियावायदिट्ठीणं मरीचि–कविल–उलूय–गग्ग–वग्घभूइ–वद्दलि–माठर–मोग्गलायणादीणं चउरासीदि ( ८४ )**

अक्रियावाददृष्टीनां मरीचि–कपिल–उलूक–गार्ग्य–व्याघ्रभूति–वाद्वलि–माठर–मौद्गलायनादीनां चतुरशीतिः ( ८४ )।

**अण्णाणदिट्ठीणं सायल्ल–वक्कल–कुहुमि–सच्चमुग्गि–णारायण–कठ–मज्झंदिण–भोय–पेप्पलायन–बादरायण–सिट्ठिक्क–दइलिकायण–वसु–जेमणिपमुहाणं सगसट्ठी (६७)।**

आज्ञानदृष्टीनां शाकल्य–वल्कल–कुथुमि–सत्यमुग्रि–नारायण–कठ–माध्यंदिन–भोज–पैप्पलायन–बादरायण–स्विष्टिक–दैत्यकायन–वसु–जैमिनिप्रमुखानां सप्तषष्टिः ( ६७ )।

**वेणइयदिट्ठीणं वसिट्ठ–पारासर–जउकण्ण–वम्मीक–रोमहस्सणि–सच्चदत्त–वास–एलापुत्त–उवमण्ण–इंददत्त–अयत्थिप्पमुहाणं बत्तीसा ( ३२ )**

वैनयिकदृष्टीनां वशिष्ठ–पाराशर–जतुकर्ण–वाल्मीकि–रोमहर्षणि–सत्यदत्त–व्यास–एलापुत्र–औपमन्यव–ऐन्द्रदत्त–आगस्त्यादीनां द्वात्रिंशत् ( ३२ ) ।

इदि मिलिदूण तिसट्ठिउत्तरतिसदीकुवायनिरायरण प्ररूवयं ।
इति मिलित्वा त्रिषष्ठ्युत्तरत्रिशतकुवादनिराकरणं प्ररूपितं ।

---

इदि बारहअंगाणं समरणमिह भावदो मया णिच्चं ।
सुभचंदेण हु रइयं जो भावइ सो सुहं पावइ ॥७४॥
इति द्वादशाङ्गानां स्मरणमिह भावतो मया नित्यं ।
शुभचन्द्रेण हि रचितं यो भावयति स सुखं प्राप्नोति ॥
एयारसुदसमुद्दे जो दिव्वदि दिव्वभावेण ।
सो संसारदवाणलजालालीणो ण संपज्जइ ॥७५॥
एकादशश्रुतसमुद्रे यो दीव्यति[1] दिव्यभावेन ।
स संसारदावानलज्वालालीनो न सम्पद्यते ॥
दंसणणाणचरित्तं तवे य पावंति सासणे भणियं ।
जो भाविऊण मोक्खं तं जाणह सुदह माहप्पं ॥७६॥
दर्शनज्ञानचारित्रेण तपसा च प्राप्नुवन्ति शासने भणितं ।
यो भावयित्वा मोक्षं तज्जानीहि श्रुतस्य माहात्म्यं ॥
एयारसंगपयकयपरूवणं मए पमाददोसेण ।
भणियं किं पि विरुद्धं सोहंतु सुयोगिणो णिच्चं ॥७७॥
एकादशाङ्गपदकृतप्ररूपणं मया प्रमाददोषेण ।
भणितं किमपि विरुद्धं शोधयन्तु सुयोगिनो नित्यं ॥

इदि सिद्धंतसमुच्चये बारहअंगसमरणावराभिहाणे अंगपण्णत्तीए
अंगणिरूवणाणाम पढमो अहियारो सम्मत्तो ॥ १ ॥

---

1 कीडति ।

## चतुर्दशपूर्वाङ्गप्रज्ञप्तिः ।

परियम्मं पंचविहं परिये कम्माणि गणिदसुत्ताणि ।
जत्थ तदो तं भणियं सुणह पयारे हु तस्सावि ॥ १ ॥

परिकर्म पंचविधं परितः कर्माणि गणितसूत्राणि ।
यत्र ततस्तद्भणितं शृणुत प्रकारान् हि तस्यापि ॥

चंदस्सायु विमाणे परिया रिद्धी च अयण गमणं च ।
सयलद्धपायगहणं वण्णेदि वि चंदपण्णत्ती ॥ २ ॥

चन्द्रस्यायुः विमानानि परिवारमृद्धिं च अयनं गमनं च ।
सकलार्द्धपादग्रहणं वर्णयत्यपि चन्द्रप्रज्ञप्तिः ॥

छत्तीसलक्खपंचसहस्सपययाण चंदपण्णत्ती ।

षट्त्रिंशल्लक्षपंचसहस्रपदानां चंद्रप्रज्ञप्तिः ।

पद ३६०५००० । श्लोकाः १८४१७३९०६०५१०७५००
वर्ण ५८९३५६४९९३६२२४०००० ।

सहस्सतियं पणलक्खा पयाणि पण्णत्तियाकस्स ॥ ३ ॥

सहस्रत्रिकं पंचलक्षाणि पदानि प्रज्ञप्तावर्कस्य ॥

सूरस्सायु विमाणे परिया रिद्धी य अयणपरिमाणं ।
तत्तावतमेगहणं वण्णेदि वि सूरपण्णत्ती ॥ ४ ॥

सूर्यस्यायुः विमानानि परिवारमृद्धिं चायनपरिमाणं ।
तत्तावन्मात्रग्रहणं वर्णयति सूर्यप्रज्ञप्तिः ॥

पयाणि ५० ०००। श्लोकाः २५६९७४९६४६१६५०० 
अक्षर ८२२३१९८८६७६६४००० ।

जंबूदीवे मेरू एक्को कुलसेलछक्क वणसंडा।
छव्वीसं वीसं च दहा वि य वीसं वक्खारणग वस्सा? ॥५॥

जम्बूद्वीपे मेरुरेक: कुलशैलषट्कं वनखंडा:।
षड्विंशति: विंशतिश्च द्रहा अपि च विंशति: वक्षारनगा वर्षा:॥

चोत्तीसं भोगधरा छक्कं वेंतरसुराणमावासा।
जंबूसालमलिरुक्खा विदेउ चारि णाहिगिरी ॥ ६ ॥

चतुस्त्रिंशत् भोगधरा: षट्कं वैंतरसुराणमावासा:।
जंबूशाल्मलिवृक्षा विदेहा: चत्वारो नाभिगिरय: ॥

सुण्णणवसुण्णदुगणवसत्तरअंककमेण णईसंखा। १७९२०९०।
वण्णेदि जंबुदीवापण्णत्ती पयाणि जत्थत्थि ॥ ७ ॥

शून्यनवशून्यद्विकनवसप्तदशाङ्कक्रमेण नदीसंख्या:।
वर्ण्यन्ते जम्बूद्वीपप्रज्ञप्तौ पदानि यत्र सन्ति ॥

तियसुणपणवग्गतियलक्खा, दीवजलहिपण्णत्ती।
अड्ढाइ (जा) उधारसायरमिदं दीवजलहिस्स ॥८॥

त्रिकशून्यपंचवर्गत्रिकलक्षाणि, द्वीपजलधिप्रज्ञप्तौ।
सार्धद्वयोद्धारसागरमितं द्विपजलधीनां ॥

पदानि ३२५०००। श्लोक १६६०३७५०१९-८७५००।
वर्ण ५३१२२०००६२६००००० ।

विस्थारं सट्ठाणं तत्थठियजोइसाण ठाणाणं।
भोमाणं..........तत्थाऽकिट्टिमजिणाणं च ॥९॥

विस्तारं स्थानं तत्रस्थितज्योतिषां स्थानानां।
भोमानां........तत्राकृत्रिमजिनानां च ॥

पासादवासतोरणमंडवमुहमंडवादिमालाणं ।
दिवसायरपरियम्मे करेदि वित्थार वण्णणयं ॥१०॥
प्रासादव्यासतोरणमंडपमुखमंडपादिमालानां ।
द्वीपसागरपरिकर्मणि क्रियते विस्तारेण वर्णनं ॥

बावण्णं छत्तीसं लक्खसहस्सं पयस्स परिमाणं ।५२३६०००।
द्विपंचाशत् षट्त्रिंशल्लक्षसहस्रं पदानां परिमाणं ।

वक्खापण्णत्तीए तियसुण्णछक्किचउरंका ॥११॥ ८४३६०००।
व्याख्याप्रज्ञप्तौ त्रिकशून्यषट्त्रिकचतुरष्टाङ्काः ॥

जो अरूविरूविजीवाजीवाइणं च दव्वणिवहाणं ।
भव्वाभव्वाणं पि य भेयं परिमाण लक्खणयं ॥१२॥
या अरूपिरूपिजीवाजीवानां च द्रव्यनिवहानां ।
भव्याभव्यानामपि च भेदं परिमाणं लक्षणं ॥

सिद्धाणं खलु अणंतरपरंपरासिद्धिठाणपत्ताणं ।
अण्णेसिं वच्छण्णं वित्थारं करेदि पण्णत्ती ॥१३॥
सिद्धानां खलु अनन्तरपरंपरासिद्धिस्थानप्राप्तानां ।
अन्येषां विस्तीर्णं विस्तारं करोति प्रज्ञप्तिः ॥

पणपण्णत्तिपयाणि य णहाणि तिय पंचसुण्णइगिअट्ठ—
इगिकोडिजुदाणि पुणो एवं परियम्म सम्मत्तं ॥१४॥
पंचप्रज्ञप्तिपदानि च नभांसि त्रीणि पंचशून्यैकाष्टैक—
कोटियुतानि पुनरेवं परिकर्म समाप्तं ॥
पयाइं १८१०५०००।

---

अडसीदीलक्खपयं सुत्तं सूचेदि मिच्छदिट्ठीणं ।
वाए इदि खलु जीवो अबंधओ बंधओ वावि ॥ १५ ॥

अष्टाशीतिलक्षपदं सूत्रं सूचयति मिथ्यादृष्टीनां ।
वादे इति खलु जीवोऽबन्धको बन्धको वापि ॥

पयाणि ८८००००० ।

**णिक्कत्ता णिग्गुणओ अभोजओ सप्पयासओ णिच्चो ।**
**परप्पयासकरणो जीवो अत्थेव वा णत्थि ॥ १६ ॥**

निष्कर्ता निर्गुणोऽभोजकः स्वप्रकाशको नित्यः ।
परप्रकाशकरणो जीवोऽस्त्येव वा नास्ति ।

**एवं किरियाणाणादिविणयकुदिट्ठिवायाणं ।**
**वित्थारं जं वोच्छदि तस्स पयारं णिसामेह ॥ १७ ॥**

एवं क्रियाज्ञानादिविनयकुदृष्टिवादानां ।
विस्तारं यद्ब्रुवति तस्य प्रकारं निशाम्यत ॥

**अत्थि सदो परदो वि य णिच्चाणिच्चत्तणेण णवअट्ठा ।**
**कालीसरप्पणियदि सहावदो होंति तब्भेया ॥ १८ ॥**

अस्ति स्वतः परतोऽपि च नित्यानित्यत्वेन नवार्थाः ।
कालेश्वरात्मनियतिस्वभावतः भवन्ति तद्भेदाः ॥

**सव्वं कालो जणयदि भूदं सव्वं विणासदे कालो ।**
**जागत्ति हि सुत्तेसु वि ण सक्कदे वंचिदुं कालो ॥ १९ ॥**

सर्वं कालो जनयति भूतं सर्वं विनाशयति कालः ।
जागर्ति हि सुप्तेष्वपि न शक्यते वंचितुं कालः ॥

इदि कालवादो–इति कालवादः ।

---

**जीवो अण्णाणी खलु असमत्थो तस्स जं सुहं दुक्खं ।**
**सग्गं णिरयं गमणं सव्वं ईसरकयं होदि ॥ २० ॥**

---

'णायं गमगं सव्वं ईसरकयं होदि' पाठः पुस्तके । आगमानुसारेण परिवर्तितः ।

जीवोऽज्ञानी खलु असमर्थस्तस्य यत्सुखं दुःखं ।
स्वर्गे नरके गमनं सर्वं ईश्वरकृतं भवति ॥

ईसरवादो–ईश्वरवादः ।

---

**देवो पुरिसो एको:सव्वव्वावी परो:महप्पा य ।**
**सव्वंगविगूढो वि य सचेयणो णिग्गुणोऽकत्ता ॥ २१ ॥**

देवः पुरुष एकः सर्वव्यापी परो महात्मा च ।
सर्वाङ्गविगूढोऽपि च सचेतनो निर्गुणोऽकर्ता ॥

अप्पवादो–आत्मवादः ।

---

**जेण जदा जं तु जहा णियमेण य जस्स होइ तं तु तदा ।**
**तस्स तहा तेण हवे इदि वादो णियडिवादो दु ॥२२॥**

येन यदा यत्तु यथा नियमेन च यस्य भवति तत्तु तदा ।
तस्य तथा तेन भवेदिति वादो नियतिवादस्तु ॥

णियडिवादो–नियतिवादः ।

---

**सव्वं सहावदो खलु तिक्खत्तं कंटयाण को करई ।**
**विविहत्तं णरमियपसुविहंगमाणं सहावो य ॥२३॥**

सर्वं स्वभावतः खलु तीक्ष्णत्वं कंटकानां कः करोति ।
विविधत्वं नरमृगपशुविहंगानां स्वभावश्च ॥

सहाववादो–स्वभाववादः ।

---

**एवं चदुणवपणयाणं रयणं काऊणं असीदिसदकिरियावादाणं भंगा । तं जहा । कालादो जीवो सदो अत्थि १ कालादो जीवो परदो अत्थि २ कालादो जीवो णिच्चो अत्थि ३ कालादो जीवो अणिच्चो अत्थि ४ इदि अजीवादिसु अट्ठसु भंगा णादव्वा मासिदूण भंगा असीदिसदं १८० हवंति ।**

एवं चतुर्नवपंचानां रचनां कृत्वा अशीतिशतक्रियावादानां भंगाः । तद्यथा—कालतो जीवः स्वतोऽस्ति १ कालतो जीवः परतोऽस्ति २ कालतो जीवो नित्योऽस्ति ३ कालतो जीवोऽनित्योऽस्ति ४ इति अजीवादिषु अष्टसु भंगा ज्ञातव्याः....आश्रित्य भंगा अशीतिशतं १८० भवन्ति ।

1

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| काल | ईश्वर | आत्मा | नियति | स्वभाव | | | | |
| जीव | अजीव | पुण्य | पाप | आस्रव | संवर | निर्जरा | बन्ध | मोक्ष |
| स्वतः | परतः | नित्य | अनित्य | | | | | |
| अस्ति | | | | | | | | |

**अह अकिरियावाईणो वियप्पा**—अथ अक्रियावादिनां विकल्पाः—

**सत्तपयत्था वि सदो परदो णत्थित्ति पंतिचदुजादा ।**
**कालादिया वि भंगा सत्तरि अक्किरियवाईणं ॥ २४ ॥**

सप्तपदार्था अपि स्वतः परतो नास्तीति पंक्तिचतुष्कजाताः ।
कालादिका अपि भंगाः सप्ततिः अक्रियावादिनां ॥

**णियदीदो कालादो सत्तपदत्थाण पंतितियजादा ।**
**चउदसभंगा होंति हु एवं चुलसीदि विण्णेया ॥२५॥**

१ कालभेद ३६ ईश्वरभेद ३६ आत्मभेद ३६ नियतिभेद ३६ स्वभावभेद ३६ एवं १८० ।

नियतितः कालतः सप्तपदार्थानां [illegible] ।
चतुर्दशभंगा भवन्ति हि एवं चतुरशीतिर्विज्ञेया: ॥

**कालावो जीवो सदो णत्थि १ कालादो जीवो परदो णत्थि २ एवं सत्तरिः भंगा । णियडीदो जीवो णत्थि १ कालादो जीवो णत्थि २ एवं चोद्दसभंगा, सव्वे मिलिदा चुलीसीदी ८४ ।**

कालतो जीवः स्वतो नास्ति १ कालतो जीवः परतो नास्ति २ एवं सप्ततिः भंगाः। नियतितो जीवो नास्ति १ कालतो जीवो नास्ति २ एवं चतुर्दशभंगाः । सर्वे मिलित्वा चतुरशीतिः ८४ ।

| | | | | | | |
|---|---|---|---|---|---|---|
| काल | ईश्वर | आत्मा | नियति | स्वभाव | | |
| जीव | अजीव | आस्रव | संवर | निर्जरा | [illegible] | मोक्ष |
| स्वतः | परतः | | | | | |
| नास्ति | | | | | | |

| | | | | | | |
|---|---|---|---|---|---|---|
| नियति | काल | | | | | |
| जीव | अजीव | आस्रव | बन्ध | संवर | निर्जरा | मोक्ष |
| नास्ति | | | | | | |

**को जाणइ णव अत्थे सत्तमसत्तुभयमवत्त्वमेव इदि ।**
**अवयणजुद सत्तत्तयं इदि भंगा होंति तेसट्ठी ॥२६॥**

को जानाति नवार्थान् सत्वमसत्वमुभयमवक्तव्यमेवेति ।
अवचनयुतं सप्तत्रयं इति भंगा भवंति त्रिषष्टिः ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अस्ति | नास्ति | उभय | अवक्तव्य | अ० अ० | ना० अ० | अ० ना० अ० | | |
| जीव | अजीव | पुण्य | पाप | आस्रव | बन्ध | संवर | नि० | मोक्ष |

**अण्णाणवाइभेया जीवादण्णाणभावसंजुत्ता ।**
**तेसट्ठी जिणभणिया मिच्छाभावेण संतत्ता ॥२७॥**

अज्ञानवादिभेदाः जीवादज्ञानभावसंयुक्ताः १ ।
त्रिषष्टिः जिनभणिता मिथ्यात्वभावेन संतप्ताः ॥

**मणवयणदेहदाणगविणओ णिवदेवणाणिजदिउड्ढे ।**
**बाले मादरपिदरे कायव्वो चेदि अट्ठ चदु ॥२८॥**

मनोवचनदेहदानगविनयो नृपदेवज्ञानियतिवृद्धेषु ।
बाले मातापित्रोः कर्तव्यश्चेति अष्ट चतुः ॥

**एवं विणयवादो बत्तीसा ३२**–एवं वैनयिकवादः द्वात्रिंशत् ३२ ।

**एवं सच्छंददिट्ठीणं....वादाउलकारणं १ ।**
**तिसट्ठितिसया णेया सव्वसंसारकारणं ॥२९॥**

एवं स्वच्छंददृष्टीनां.......,............ ।
त्रिषष्टिः त्रिशतानि ज्ञेयानि सर्वसंसारकारणानि ॥

---

१ को जाणइ सत्तचऊ भावं सुद्धं खु दोणिपंत्तिभवा ।
चत्तारि होंति एवं अण्णाणीणं तु सत्तट्ठी ॥ १ ॥
को जानाति सत्वचतुष्कं भावं शुद्धं खलु द्विपंक्तिभवाः ।
चत्वारो भवन्त्येवं अज्ञानिनां तु सप्तषष्टिः ॥

पउरसेण विणा णत्थि थणक्खीराइसेवणं ।
आलसड्ढो णिरुस्साहो फलं किंचि ण भुंजई ॥३०॥
पौरुषेण विना नास्ति स्तनक्षीरादिसेवनं ।
आलस्याढ्यो निरुत्साहः फलं किंचिन्न भुंक्ते ॥

पुरिसवादो—पौरुषवादः ।

---

दइवा सिज्झदि अत्थो पोरिसं णिप्फलं हवे ।
एसो सालसमुत्तुंगो कण्णो हम्मइ संगरे ॥ ३१ ॥
दैवात् सिद्ध्यति अर्थः पौरुषं निष्फलं भवेत् ।
एष सालसमुत्तुंगः कर्णः हन्यते संगरे ॥

दइववादो—दैववादः ।

---

एक्केण चक्केण रहो ण यादि संजोगमेवेति वदंति तण्णा ।
अंधो य पंगू य वणं पविट्ठा ते संपजुत्ता णयरं पविट्ठा ॥३२॥
एकेन चक्रेण रथो न याति संयोगमेवेति वदन्ति तज्ज्ञाः ।
अन्धश्च पंगुश्च वनं प्रविष्टौ तौ सम्प्रयुक्तौ नगरे प्रविष्टौ ॥

संजोयवादो—संयोगवादः ।

---

लोयपसिद्धी सत्था पंचाली पंचपंडवत्थी ही ।
सहउट्ठिया ण रुज्झइ मिलिदेहिं सुरेहिं दुव्वारा ॥ ३३ ॥
लोकप्रसिद्धिः सार्था पंचाली पंचपांडवस्त्री हि ।
सकृदुत्थिता न रुद्ध्यते मिलितैः सुरैः दुर्वारा ॥

लोयवादो—लोकवादः ।

---

वयणवहा जावदिया णयवादा होंति चेव तावदिया ।
णयवादा जावदिया तावदिया होंति परसमया ॥ ३४ ॥

वचनपथा यावन्तो नयवादा भवन्ति चैव तावन्तः ।
नयवादा यावन्तो तावन्तो भवन्ति परसमयाः ॥

इदि सुत्तं गदं–इति सूत्रं गतं ।

---

पढमं मिच्छादिट्ठिं अव्वदिकं आसिदूण पडिवज्जं ।
अणुयोगो अहियारो वुत्तो पढमाणुयोगो सो ॥ ३५ ॥

प्रथमं मिथ्यादृष्टिं अव्युत्पन्नं आश्रित्य प्रतिपाद्यं ।
अनुयोगोऽधिकार उक्तः प्रथमानुयोगः सः ॥

चउवीसं तित्थयरा चक्कणो ? बारह छखंडभरहस्स ।
णवबलदेवा किण्हा णव पडिसत्तू पुराणाइं ॥ ३६ ॥

चतुर्विंशतिस्तीर्थंकरान् जयिनो द्वादश षट्खंडभरतस्य ।
नव बलदेवान् कृष्णान् नव प्रतिशत्रून् पुराणानि ॥

तेसिं वण्णंति पिया माई णयराणि चिण्ह पुव्वभवे ।
पंचसहस्सपयाणि य जत्थ हु सो होदि अहियारो ॥३७॥

तेषां वर्णयन्ति पितॄन् मातॄः नगराणि चिह्नानि पूर्वभवान् ।
पंचसहस्रपदानि च यत्र हि स भवति अधिकारः ॥

पयाणि ५००० ।

कोडिपयं उप्पादं पुव्वं जीवादिदव्वणियरस्स ।
उप्पादव्वयधुव्वादणेयधम्माण पूरणयं ॥३८॥

कोटिपदं उत्पादं पूर्वं जीवादिद्रव्यनिकरस्य ।
उत्पादव्ययध्रौव्याद्यनेकधर्माणां पूरणकं ॥

पयाणि १००००००० । तं जहा—

**दव्वाणं णाणाणयुवण्णयगोयरकमजोगवज्जसंभाविदुप्पादव्वयधुव्वाणि तियालगोयरा णव धम्मा हवंति। तप्परिणदं दव्वमवि णवहा। उप्पण्णमुप्पज्जमाणमुप्पस्समाणं, णट्ठं णस्समाणं, णंखमाणं, ठिदं तिट्ठमाणं विस्संतमिदि णवाणं तें धम्माणमुप्पण्णादीण पत्तेयं णवविहत्तणसंभवादो पयासीदिवियप्पधम्मपरिणदव्ववण्णणं यं करेदि तमुप्पादपुव्वं।**

द्रव्याणां नानानयोपनयगोचरक्रमयौगपद्यसंभवितोत्पादव्ययध्रौव्याणि त्रिकालगोचरा नवधर्मा भवन्ति। तत्परिणतं द्रव्यमपि नवधा। उत्पन्नं उत्पद्यमानं उत्पत्स्यमानं, नष्टं नश्यत् नंक्ष्यत्, स्थितं तिष्ठत् स्थास्यत् इति नवानां तेषां धर्माणां उत्पन्नादीनां प्रत्येकं नवविधत्वसंभवात् एकाशीतिविकल्पधर्मपरिणतद्रव्यवर्णनं यत्करोति तदुत्पादपूर्वम् ॥

**अग्गस्स वत्थुणो पि हि पहाणभूदस्स णाणमयणंतं।**
**सुअग्गायणीयपुव्वं अग्गायणसंभवं विदियं ॥३९॥**

अग्रस्य वस्तुनोऽपि हि प्रधानभूतस्य ज्ञानं अयनं।
स्वग्रायणीयपूर्वं अग्रायणसंभवं द्वितीयं ॥

**सत्तस(स)यसुणयदुणयपंचत्थिसुकायछक्कदव्वाणं।**
**तच्चाणं सत्तण्हं वण्णदि तं अत्थणियराणं ॥४०॥**

सप्तशतसुनयदुर्णयपंचास्तिकायषड्द्रव्याणां।
तत्वानां सप्तानां वर्णयति तदर्थनिकराणां ॥

**भेए लक्खणणियरे छण्णवदीलक्खपयपमाणमिणं।**
**वेंति जिणा तच्चत्थं पणमह णरा सुभावेण ॥ ४१ ॥**

भेदान् लक्षणनिकरान्, षण्णवतिलक्षपदप्रमाणमिदं।
जानन्ति जिनाः तत्वार्थं नमस्यत नराः ! सुभावेन ॥

पुव्वंतं अवरंतं धुवाधुवच्चवणलद्धिणामाणि ।
अद्धुव संपण हि च अत्थं भोमावयज्जं च ॥ ४२ ॥

पूर्वान्तं अपरांतं ध्रुवाध्रुवच्यवन लब्धिनामानि ।
.............................................॥

सव्वत्थकप्पणीयं णाणमदीदं अणागदं कालं ।
सिद्धिमुवज्जं वंदे चउदहवत्थूणि विदियस्स ॥ ४३ ॥

सर्वार्थकल्पनीयं ज्ञानमतीतं मनागतं कालः ।
सिद्धिं प्राप्तं वन्दे चतुर्दश वस्तूनि द्वितियस्य ॥

पंचमवत्थुचउत्थपाहुडयस्साणुयोगणामाणि ।
कियवेयणे तहेव फंसण कम्मपयडिकं तह ॥ ४४ ॥

पंचमवस्तुचतुर्थप्राभृतस्यानुयोगनामानि ।
.........तथैव स्पर्शनं कर्म प्रकृतिकं तथा ॥

बंधणणिबंधणपक्कमाणुक्कममहब्भुदयमोक्खा ।
सक्कम लेस्सा च तहा लेस्साए कम्म परिणामा ॥ ४५ ॥

बंधननिर्बंधनोपक्रमानुपक्रमाभ्युदय मोक्षाः ।
संक्रमः लेश्या च तथा लेश्यायाः कर्म परिणामाः ॥

सादमसादं दि ( वि ) ग्घं हस्सं भवं धारणीयसण्णं च ।
पुरुपोग्गलप्पणामं णिहत्तअणिहत्तणामाणि ॥ ४६ ॥

सातमसातं विघ्नं हास्यं भयं भारणीयसंज्ञं च ।
पुरुपुद्गलप्रमाणं निधत्यनिधत्यनामानि ॥

सणकाचिदमणकाचिदमहकम्मट्ठिदिपच्छिमखंधा ।
अप्पबहुत्तं च तहा तद्दाराणं च चउवीसं ॥ ४७ ॥

सकाचितानकाचितमथकर्मस्थितिपश्चिमस्कन्धाः ।
अल्पबहुत्वं च तथा तद्द्वाराणां च चतुर्विंशतिः ॥

**अण्णेसिं वत्थूणं पाहुडयस्साणुयोगयाणं च ।**
**णामाणं उवएसो कालविसेसेण णट्ठो हु ॥ ४८॥**

अन्येषां वस्तूनां प्राभृतस्यानुयोगानां च ।
नाम्नामुपदेशः कालविशेषेण नष्टो हि ॥

पयाणि ९६००००० ।

अग्गायणीयपुव्वं गदं—अग्रायणीयपूर्वं गतं ।

---

**विज्जाणुवादपुव्वं वज्जं जीवादिवत्थुसामत्थं ।**
**अणुवादो अणुवण्णणमिह तस्स हवेत्ति णंणमइ ॥४९॥**

वीर्यानुवादपूर्वं वीर्यं जीवादिवस्तुसामर्थ्यं ।
अनुवादोऽनुवर्णनमिह तस्य भवेदिति ननम्यत ॥

**तं वण्णदि अप्पबलं परविज्जं उहयविज्जमवि णिच्चं ।**
**खेत्तबलं कालबलं भावबलं तवबलं पुण्णं ॥५०॥**

तद्वर्णयति आत्मबलं परवीर्यं उभयवीर्यमपि नित्यं ।
क्षेत्रबलं कालबलं भावबलं तपोबलं पूर्णं ॥

**दव्वबलं गुणपज्जयविज्ज विज्जाबलं च सव्वबलं ।**
**सत्तरिलक्खपयेहिं पुण्णं पुव्वं तदीयं खु ॥५१॥**

द्रव्यबलं गुणपर्ययवीर्यं विद्याबलं च सर्वबलं ।
सप्ततिलक्षपदैः पूर्णं पूर्वं तृतीयं खलु ॥

पयाणि ७०००००० ।

इदि विज्जाणुवादपुव्वं गदं—इति वीर्यानुवादपूर्वं गतं ।

---

**सियअत्थिणत्थिपमुहा तेसिं इह रूवणं पवादोत्ति ।**
**अत्थि यदो तो तम्मा अत्थिणत्थिपवादपुव्वं च ॥५२॥**

स्यादस्तिनास्तिप्रमुखास्तेषां इह रूपणं प्रवाद इति ।
अस्ति....................अस्तिनास्तिप्रवादपूर्वं च ॥

**णियदव्वखेत्तकालभावे सिय अत्थि वत्थुणिवहं च ।**
**परदव्वखेत्तकाले भावे सिय णत्थि आसित्ता ॥५३॥**

निजद्रव्यक्षेत्रकालभावात् स्यादस्ति वस्तुनिवहं च ।
परद्रव्यक्षेत्रकालभावात् स्यान्नास्ति आश्रित्य ॥

**सियअत्थिणत्थि कमसो सपरदव्वादिचउजुदं जुगवं ।**
**सियऽवत्तव्वं सेयरदव्वं खेत्तं च भावं च ॥५४॥**

स्यादस्तिनास्ति क्रमशः स्वपरद्रव्यादिचतुर्युतं युगपत् ।
स्यादवक्तव्यं स्वपरद्रव्यं क्षेत्रं च भावं च ॥

**सिय[1] आसिदूण अत्थि चावत्तव्वं सदव्वदो जुगवं ।**
**सपरदव्वादीदो सिय णत्थि अव्वत्तमिदि जाणे ॥५५॥**

स्यादाश्रित्य अस्ति चावक्तव्यं स्वद्रव्यतो युगपत् ।
स्वपरद्रव्यादितः, स्यान्नास्ति अवक्तव्यमिति जानीहि ॥

**परदव्वखेत्तकालं भावं पडिवज्ज जुगव दव्वादो ।**
**सिय अत्थि णत्थि अवरं कमेण णेयं च सपरं च ॥ ५६ ॥**

परद्रव्यक्षेत्रकालान् भावं प्रतिपद्य युगपत् द्रव्यतः ।
स्यादस्ति नास्ति अपरं क्रमेण ज्ञेयं च स्वपरं च ॥

**दव्वं खेत्तं कालं भावं जुगवं समासिदूणा य ।**
**एवं णिच्चादीणं धम्माणं सत्तभंगविही ॥ ५७ ॥**

द्रव्यं क्षेत्रं कालं भावं युगपत् समाश्रित्य च ।
एवं नित्यादीनां धर्माणां सप्तभंगविधिः ॥

---

1 अग्रेण सह संबन्धः ।

**विहिणिसेहावत्तव्वभंगाणं पत्तेयदुसंजोयतिसंजोयजादाणं तिण्णि-तिण्णि एगसंजोयाणं मेलणं सत्तभंगी पण्हवसादु एकम्मि वत्थुम्मि अविरोहेण सहवंति णाणाणयमुक्खगोणभावेण जं परूवेदि ।**

विधिनिषेधावक्तव्यभंगानां प्रत्येकद्विसंयोगत्रिसंयोगजातानां त्रित्र्येकसं-ख्यानां मेलनं सप्तभंगी प्रश्नवशात् एकस्मिन् वस्तुनि अविरोधेन संभवंती नानानयमुख्यगौणभावेन यत्प्ररूपयति ।

**तत्थपयाणि बुहेण य णच्चंते सट्ठिलक्खमाणाणि ।**
**णाणाणयणिरूवणपराणि सत्तस्स भंगस्स ॥ ५७ ॥**

तत्र पदानि बुधैश्च ज्ञायन्ते षष्ठिलक्षमानानि ।
नानानयनिरूपणपराणि सप्तानां भंगानां ॥

पदाणि ६०००००० ।

इदि अत्थिणत्थिपवादपुव्वं गदं—इत्यस्तिनास्तिप्रवादपूर्वं गतं ।

---

**णाणप्पवादपुव्वं मदिसुदओही सुणाणणाणाणं ।**
**मणपज्जयस्स भेयं केवलणाणस्स रूवं च ॥ ५९ ॥**

ज्ञानप्रवादपूर्वं मतिश्रुतावधिसुज्ञानाज्ञानानां ।
मनःपर्ययस्य भेदान् केवलज्ञानस्य रूपं च ॥

**कहदि हु पयप्पमाणं कोडी रूऊणगा हि मदिणाणं ।**
**अवगहईहावायाधारणगा होंति तब्भेया ॥ ६० ॥**

कथयति पदप्रमाणं कोटि रूपोनां हि मतिज्ञानं ।
अवग्रहेहावायधारणा भवन्ति तद्भेदाः ॥

**विसयाणं विसईणं संजोगे दंसणं वियप्पवदं ।**
**अवगहणाणं तत्तो विसेसकंखा हवे ईहा ॥ ६१ ॥**

विषयाणां विषयिणां संयोगे दर्शनं, विकल्पवत् ।
अवग्रहज्ञानं ततो विशेषाकांक्षा भवेदीहा ॥

**तत्तो सुणिण्णओ खलु होदि अवाओ दु वत्थुजादस्स ।**
**कालंतरे वि णिण्णिदसमरणहेऊ तुरीयं तु ॥ ६२ ॥**

ततः सुनिर्णयः खलु भवति अवायस्तु वस्तुजातस्य ।
कालान्तरेऽपि निर्णीतस्मरणहेतुस्तुर्यं तु ॥

**इंदियअणिंदियेहिं वेंजणअत्थादवग्गहो दुविहो ।**
**चक्खुस्स माणसस्स य पढमो ण वञ्जग्गहो कमसो ॥ ६३ ॥**

इन्द्रियानिन्द्रियैरर्थं व्यञ्जनार्थाभ्यामवग्रहो द्विविधः ।
चक्षुषः मनसश्च प्रथमो न चावग्रहः क्रमशः ॥

**बहु बहुविहं च खिप्पाणिस्सिदणुत्तं धुवं च इदरं च ।**
**पडि एक्केक्के जादे तिसयं छत्तीसभेयं च ॥ ६४ ॥**

बहु बहुविधं च क्षिप्रं अनिसृतं अनुक्तं ध्रुवं इतरच्च ।
प्रति एकैकस्मिन् जाते त्रिशतं षट्त्रिंशद्भेदं च ॥

मदिणाण—मतिज्ञानम् ।

---

**सुदणाणं अत्थादो अत्थंतरगहणमेव मदिपुव्वं ।**
**दव्वसुदं भावसुदं णियमेणिह सद्दजं पमुहं ॥ ६५ ॥**

श्रुतज्ञानमर्थात् अर्थान्तरग्रहणमेव मतिपूर्वं ।
द्रव्यश्रुतं भावश्रुतं नियमेनेह शब्दजं प्रमुखं ॥

**पज्जायक्खरपदसंघायं पडिवत्तियाणियोगं च ।**
**पाहुड पाहुडपाहुड वत्थू पुव्वं समासेहिं ॥ ६६ ॥**

पर्यायाक्षरपदसंघातं प्रतिपत्ति अनुयोगं च ।
प्राभृतं प्राभृतप्राभृतं वस्तु पूर्वं समासैः ॥

**वीसविहं तं तेसिं आवरणविभेयतो हि णियमेण ।**
**सुहुमणिगोदस्स हवे अपुण्णस्स पढमसमयम्हि ॥ ६७ ॥**

विंशतिविधं तत्तेषां आवरणविभेदतो हि नियमेन ।
सूक्ष्मनिगोदस्य भवेत् अपूर्णस्य प्रथमसमये ॥

**लद्धक्खरपज्जायं णिच्चुग्घाडं लहुं णिरावरणं ।**
**उवरुवरिवड्ढिजुत्तं वीसवियप्पं हु सुदणाणं ॥६८॥**

लब्ध्यक्षरपर्यायं नित्योद्घाटं लघु निरावरणं ।
उपर्युपरिवृद्धियुक्तं विंशतिविकल्पं हि श्रुतज्ञानं ॥

इदि सुदणाणं—इति श्रुतज्ञानं ।

---

**भवगुणपच्चयविहियं ओहीणाणं तु अवहिगं समये ।**
**सीमाणाणं रूवीपदत्थसंघादपच्चक्खं ॥६९॥**

भवगुणप्रत्ययविहितं अवधिज्ञानं तु अवधिगं समये ।
सीमाज्ञानं रूपिपदार्थसंघातप्रत्यक्षं ॥

**देसोही परमोही सव्वोही होदि तत्थ तिविहं तु ।**
**गुणपच्चयगो णियमा देसोही णरतिरक्खाणं ॥७०॥**

देशावधिः परमावधिः सर्वावधिर्भवति तत्र त्रिविधस्तु ।
गुणप्रत्ययको नियमात् देशावधिः नरतिरश्चां ॥

**अवरं देसोहिस्स य णरतिरिए हवदि संजदम्हि वरं ।**
**भवपच्चयगो ओही सुरणिरयाणं च तित्थाणं ॥७१॥**

अवरं देशावधेश्च नरतिर्यक्षु भवति संयते वरं ।
भवप्रत्ययकोऽवधिः सुरनारकाणां च तीर्थकराणां ॥

**णाणाभेयं पढमं एयवियप्पं तु बिदियमोही खु ।**
**परमोही सव्वोही चरमसरीरिस्स विरदस्स ॥७२॥**

नानाभेदं प्रथमं एकविकल्पस्तु द्वितीयोऽवधिः खलु ।
परमावधिः सर्वावधिः चरमशरीरिणः विरतस्य ॥

**अणुगामी देसादिसु तमणणुगामी य हीयमाणो वि ।**
**वड्ढंतो वि अवट्ठिद अणवट्ठिद होंति छब्भेया ॥७३॥**

अनुगामी देशादिषु तेष्वननुगामी च हीयमानोऽपि ।
वर्धमानोऽपि अवस्थितोऽनवस्थितो भवन्ति षड्भेदाः ॥

इदि ओहिणाणं—इत्यवधिज्ञानं ।

---

**मणपज्जयं तु दुविहं रिजुमदि पढमं तु तत्थ विउलमदी ।**
**संजमजुत्तस्स हवे जं जाणइ तं खु णरलोए ॥७४॥**

मनःपर्ययस्तु द्विविध ऋजुमतिः प्रथमस्तु तत्र विपुलमतिः ।
संयमयुक्तस्य भवेत् यज्जानाति तत् खलु नरलोके ॥

इदि मणपज्जयं—इति मनःपर्ययः ।

---

**सव्वावरणविमुक्कं लोयालोयप्पयासगं णिच्चं ।**
**इंदियकमपरिमुक्कं केवलणाणं णिरावाहं ॥ ७५ ॥**

सर्वावरणविमुक्तं लोकालोकप्रकाशकं नित्यं ।
इन्द्रियक्रमपरिमुक्तं केवलज्ञानं निराबाधं ॥

इदि केवलणाणं—इति केवलज्ञानं ।

---

**कुमदि कुसुदं विभंगं अण्णाणतियं वि मिच्छअणपुव्वं ।**
**सच्चादिभावमुक्कं भवहेदुं सम्मभावचुदं ॥ ७६ ॥**

कुमतिः कुश्रुतं विभंगं अज्ञानत्रयमपि मिथ्यात्वपूर्वं ।
सत्यादिभावविमुक्तं भवहेतुः सम्यक्त्वभावच्युतं ॥

रूऊणकोडिपयं णाणपवादं अणेयणाणाणं ।
णाणाभेयपरूवणपरं णमंसामि भावजुदो ॥ ७७ ॥
रूपोनकोटिपदं ज्ञानप्रवादं अनेकज्ञानानां ।
नानाभेदप्ररूपणपरं नमामि भावयुक्तः ॥

पयाणि ९९९९९९९ ।

इदि णाणपवादं गदं—इति ज्ञानप्रवादं गतं ।

---

सच्चपवादं छट्ठं वाग्गुत्ति चावि वयणसक्कारो ।
वयणपओगं बारहभासा खलु वत्तबहुभेये ॥ ७८ ॥
सत्यप्रवादं षष्ठं वाग्गुप्तिश्चापि वचनसंस्कारः ।
वचनप्रयोगो द्वादशभाषाः खलु वक्तृबहुभेदाः ॥

बहुविहमिसाभिहाणं दसविहसच्चं मया परूवेदि ।
जीवाण बोहणत्थं पयाणि छसुत्तरा कोडी ॥७९॥
बहुविधमृषाभिधानं दशविधसत्यं मया प्ररूप्यते ।
जीवानां बोधनार्थं पदानि षडुत्तरा कोटिः ॥

तंजहा। असच्चणिव्वत्ती मोणं वा वाग्गुत्ती, वयणसक्कारकारणाइं उरकंठसिरजिब्भामूलदंतणासिकातालुओट्ठणामाणि अट्ठट्ठाणाणि, पिट्ठदाईसिपिट्ठदाविवियदाईसिविवियदासंविवियदरूवा पंचपयत्ता वयणसक्कारकारणाणि, सिट्ठदुट्ठरूवो वयणपओगो तल्लक्खणसत्थं सक्कायाइवायरणं । बारह भासा—हणभणेण किंयमिदि अणट्ठकहणमब्भक्खाणं णाम १ परोप्परविरोहहेदु कलहवाया २ पिट्ठदो दोससूयणं पेसुण्णवाया ३ धम्मत्थकाममोक्खाऽसंबद्धवयमसंबद्धालाओ ४ इंदियविसयेसु रइउप्पाइया वाया रदिवाया ५ तेसु अरदिउप्पादिया वाया अरदिवाया ६ परिग्गहाज्जणसंरक्खणाइआसत्तिहेदु वयणमुवाहिवयणं ७ ववहारे वंचणाहेदु वयणं णियडिवयणं ८ तवणाणादिसु अवणियवयणमवणविवयणं ९ थेयहेदुवयणं मुसा-

**वयणं १० सम्मग्गोवदेसकं वयणं सम्मदंसणवयणं ११ मिच्छाम-ग्गोवदेसकं वयणं मिच्छादंसणवयणमिदि १२ ।**

तद्यथा । असत्यनिवृत्तिर्मौनं वा वाग्गुप्तिः । वचनसंस्कारकारणानि उरःकंठशिरोजिव्हामूलदन्तनासिकाताल्वोष्ठनामानि अष्टस्थानानि, स्पृष्टतेषत्स्पृष्टताविवृततेषद्विवृततासंविवृतताख्पाः पंचप्रयत्ना वचनसंस्कारणानि। शिष्टदुष्टरूपो वचनप्रयोगः तल्लक्षणशास्त्रं संस्कृतादिव्याकरणं । द्वादशभाषा इदमनेनकृतमिति अनिष्टकथनमभ्याख्यानं नाम १ परस्परविरोधहेतुः कलहवाक् २ पृष्ठतो दोषसूचनं पैशून्यवाक् ३ धर्मार्थकाममोक्षासम्बद्धवचनमसंबद्धालापः ४ इन्द्रियविषयेषु रत्युत्पादिका या वाक् रतिवाक् ५ तेष्वरत्युत्पादिका या वाक् अरतीवाक् ६ परिग्रहार्जनसंरक्षणाद्यासक्तिहेतु वचनं उपाधिवचनं ७ व्यवहारे वंचनाहेतु निकृतिवचनं ८ तपोज्ञानादिषु अविनयवचनं अप्रणतिवचनं ९ स्तेयहेतु वचनं मृषावचनं १० सन्मार्गोपदशकं वचनं सम्यग्दर्शनवचनं । ११ मिथ्यामार्गोपदेशकं वचनं मिथ्यादर्शनवचनमिति १२ ॥

**वत्तारा बहुभेया बींदियपमुहा हवंति मूसवयो ।**
**बहुविहमसच्चवयणं दव्वादिसमासियं णेयं ॥८०॥**

वक्तारो बहुभेदा द्वीन्द्रियप्रमुखा भवन्ति मृषावाक् ।
बहुविधमसत्यवचनं द्रव्यादिसमाश्रितं ज्ञेयं ॥

**दसविहसच्चं जणवद सम्मिदि ठवणा य णाम रूवे य ।**
**संभावणे य भावे पडुच्च ववहार उवमाए ॥८१॥**

दशविधसत्यं जनपदं सम्मतिः स्थापना च नाम रूपं ।
संभावना च भावः प्रतीत्य व्यवहारं उपमा ॥

**भत्तं राया सम्मादिं पडिमा तह होदि एस सुरदत्तो ।**
**किण्हो जंबूदीवं पल्लट्टदि पाववज्जवयो ॥८२॥**

भक्तं राजा सम्मतिः प्रतिमा तथा भवत्येव सुरदत्तः ।
कृष्णः जम्बूद्वीपं परिवर्तयति पापवर्ज्यवचनं ॥

**हस्सो रज्झदि कूरो पल्लोवममेवमादिया सच्चा ।**
**आमंतणि आणवणी पुच्छणि जाचणी य पणवण्णी ॥८३॥**

हृस्वः रध्यति क्रूरः पल्योपममेवमादिकानि सत्यानि ।
आमंत्रणी आज्ञापनी पृच्छनी याचनी प्रज्ञापनी ॥

**पच्चक्खाणी संसयवयणी इच्छाणुलोमिया तत्र ।**
**णवमी अणक्खरगदा एवं भासा परूवेदि ॥८४॥**

प्रत्याख्यानी संशयवचनी इच्छानुलोमिका तत्र ।
नवमी अनक्षरगता एवं भाषाः प्ररूपयति ॥

पयाणि १००००००६ ।

इदि सच्चपवादपुव्वं गदं—इति सत्यप्रवादपूर्वं गतं ।

---

**अप्पपवादं भणियं अप्पसरूवप्परूवयं पुव्वं ।**
**छव्वीसकोडिपयगयमेवं जाणंति सुपयत्था ॥८५॥**

आत्मप्रवादं भणितं आत्मस्वरूपप्ररूपकं पूर्वं ।
षड्विंशतिकोटिपदगतमेवं जानन्ति सुपदस्थाः ॥

**जीवो कत्ता य वत्ता य पाणी भोत्ता य पोग्गलो ।**
**वेदी विण्हू सयंभू सरीरी तह माणओ ॥८६॥**
**सत्तो जंतू य माणी य माई जोगी य संकुडो ।**
**असंकुडो य खेत्तण्हू अंतरप्पा तहेव य ॥८७॥**

जीवः कर्ता च वक्ता च प्राणी भोक्ता च पुद्गलः ।
वेदः विष्णुः स्वयंभूः शरीरी तथा मानवः ॥

सक्ता जन्तुश्च मानी च मायी योगी च संकुचितः ।
असंकुचितः क्षेत्रज्ञः अन्तरात्मा तथैव च ॥

ववहारेण जीवदि दसपाणेहिं, णिच्छयणयेण य केवलणाणदं-सणसम्मत्तरूवपाणेहिं, जीविहिदि जीविदपुव्वो जीवदित्ति जीवो । ववहारेण सुहासुहं कम्मं णिच्छयणयेण चिप्पज्जयं च करेदित्ति कत्ता । णो किमवि करेदि इदि अकत्ता । सच्चमसच्चं च वत्तित्ति वत्ता । णिच्छयदो अवत्ता । णयदुगुत्तपाणा अस्स अत्थि इदि पाणी । कम्मफलं सस्सरूवं च भुं॰दि इदि भोत्ता । कम्मपोग्गलं पूरेदि गालेदि य पोग्गलो । णिच्छ॰॰ो अपोग्गलो । सव्वं वेद इदि वेदो । ववणसीलो विण्हू । सयंभुवणसीलो सयंभू । सरीरमस्स-त्थित्ति सरीरी । णिच्छयदो असरीरी । माणवादिपज्जयजुत्तो मा-णवो । णिच्छएण अमाणवो । एवं सुरो असुरो तिरिच्छो अति-रिच्छो णारयो अणारयो च इदि णादव्वं । परिग्गहेसु सजदित्ति सत्ता । णिच्छयदो असत्ता । णाणाजोणिसु जायइत्ति जंतू । णिच्छ-येण अजंतू । माणो अहंकारो अस्सत्थित्ति माणी । णिच्छयदो अ-माणी । मायास्सत्थित्ति मायी । णिच्छयदो अमायी । जोगो मण-वयणकायलक्खणो अस्सत्थित्ति जोगी । णिच्छयदो अजोगी । जह-ण्णेण संकुइदपदेसो संकुडो । समुग्घादे लोयं वावइत्ति असंकुडो । खेत्तं लोयालोयं सस्सरूवं च जाणदित्ति खेत्तण्हू । अट्ठकम्माब्भंत-रवत्तीसभावदो वेदणाब्भंतरवत्तीसभावदो च अंतरप्पा । एवं मुत्तो अमुत्तो । एवमादि वण्णेदि सत्तमपुव्वं ।

व्यवहारेण जीवति दशप्राणैः, निश्चयनयेन च केवलज्ञानदर्शनसम्य-क्त्वरूपप्राणैः । जीविष्यति जीवितपूर्वो जीवतीति जीवः । व्यवहारेण शुभाशुभं कर्म निश्चयनयेन चित्पर्यायं च करोतीति कर्ता । न किमपि करोतीत्यकर्ता । सत्यमसत्यं च वक्तीति वक्ता । निश्चयतोऽवक्ता । नय-द्विकोक्तप्राणा यस्य सन्तीति प्राणी । कर्मफलं स्वस्वरूपं च भुंक्ते इति

भोक्ता । कर्मपुद्गलान् पूरयति गालयति च पुद्गलः । निश्चयतोऽपुद्गलः । सर्वं वेत्तीति वेदः । व्यापनशीलो विष्णुः । स्वयंभवनशीलो स्वयंभूः । शरीरमस्यास्तीति शरीरी । निश्चयतोऽशरीरी । मानवादिपर्याययुक्तो मानवः । निश्चयेनामानवः । एवं सुरोऽसुरः, तिर्यञ्चोऽतिर्यंचः, नारकोऽनारकश्च इति ज्ञातव्यः । परिग्रहेषु सजतीति सक्ता । निश्चयतोऽसक्ता । नानायोनिषु जायते इति जन्तुः । निश्चयेनाजन्तुः । मानोऽहंकारोस्यास्तीति मानी । निश्चयतोऽमानी । मायास्यास्तीति मायी । निश्चयतोऽमायी । योगो मनवचनकायलक्षणोऽस्यास्तीति योगी । निश्चयतोऽयोगी । जघन्येन संकुचितप्रदेशः संकुचितः । समुद्घाते लोकं व्याप्नोतीत्यसंकुचितः । क्षेत्रं लोकालोकं स्वस्वरूपं च जानातीति क्षेत्रज्ञः । अष्टकर्माभ्यन्तरवर्तिस्वभावतश्चेतनाभ्यन्तरवर्तिस्वभावतश्चान्तरात्मा । एवं मूर्तोऽमूर्तः । एवमादिकं वर्णयति सप्तमं पूर्वं ।

पयाणि २६०००००००० ।

इदि अप्पपवादं गदं—इत्यात्मप्रवादं गतं ।

---

**कम्मपवादपरूवण कम्मपवादं सया णमंसामि ।**
**इगिकोडीअडसीदीलक्खपयं अट्ठमं पुव्वं ॥ ८८ ॥**

कर्मप्रवादप्ररूपणं कर्मप्रवादं सदा नमामि ।
एककोट्यष्टाशीतिलक्षपदं अष्टमं पूर्वं ॥

**आवरणस्स विभेयं वेयणीयं मोहणाउ णामं च ।**
**गोत्तं च अंतरायं अट्ठवियप्पं च कम्ममिणं ॥ ८९ ॥**

आवरणस्य विभेदं वेदनीयं मोहनीयमायुः नाम च ।
गोत्रं चान्तरायं अष्टविकल्पं च कर्मेदं ॥

अडदालसयं उत्तरपयडीदो असंखलोयभेयं च ।
बंधुदयुदीरणावि य सत्तं तेसिं परूवेदि ॥ ९० ॥

अष्टचत्वारिंशच्छतं उत्तरप्रकृतितः असंख्यलोकभेदं च ।
बंधोदयोदीरणा अपि च सत्वं तेषां प्ररूपयति ॥

पयडि:ट्ठिदि अणुभागो पदेसबंधो हु चउविहो बंधो ।
तेसिं च ठिदि णेया जहण्णइदरप्पभेयेण ॥९१॥

प्रकृतिस्थित्यनुभागप्रदेशबन्धो हि चतुर्विधो बन्धः ।
तेषां च स्थितिः ज्ञेया जघन्येतरप्रभेदेन ॥

अणुभागो पयडीणं सुहासुहाणं च चउविहो होदि ।
गुडखंडसक्करामिदसरिसो य रसो सुहाणं पि ॥९२॥

अनुभागः प्रकृतीनां शुभाशुभानां च चतुर्विधो भवति ।
गुडखंडशर्करामृतसदृशश्च रसः शुभानामपि ॥

णिंबकंजीरविसहालाहलसरिसचउविहो णेयो ।
अणुभायो असुहाणं पदेसबंधो वि बहुभेयो ॥९३॥

निंबकंजीरविषहालाहलसदृशश्चतुर्विधो ज्ञेयः ।
अनुभागोऽशुभानां प्रदेशबन्धोऽपि बहुभेदः ॥

लयदारुट्ठिसिलासमभेया ते विल्लिदारणं तस्स ।
इगिभागो बहुभागाट्ठिसिला देसघादिघादीणं ॥९४॥

लतादार्वस्थिशिलासमभेदास्ते वल्लीदार्वनन्तस्य ।
एकभागो बहुभागा अस्थिशिला देशघातिघातिनां ॥

पयाणि १८०००००० ।

इदि कम्मपवादपुव्वं गदं—इति कर्मप्रवादपूर्वं गतं ।

**पच्चक्खाणं णवमं चउसीदिलक्खपयप्पमाणं तु ।**
**तत्थ वि पुरिसविसेसा परिमिदकालं च इदरं च ॥९५॥**

प्रत्याख्यानं नवमं चतुरशीतिलक्षपदप्रमाणं तु ।
तत्रापि पुरुषविशेषात् परिमितकालं च इतरच्च ॥

**णाम ठवणा दव्वं खेत्तं कालं पडुच्च भावं च ।**
**पच्चक्खाणं किज्जइ सावज्जाणं च बहुलाणं ॥ ९६ ॥**

नाम स्थापना द्रव्यं क्षेत्रं कालं प्रतीत्य भावं च ।
प्रत्याख्यानं क्रियते सावद्यानां च बहुलानां ॥

**उववासविहिं तस्स वि भावणभेयं च पंचसमिदिं च ।**
**गुत्तितियं तह वण्णदि उववासफलं विसुद्धस्स ॥९७॥**

उपवासविधिं तस्यापि भावनाभेदं च पंचसमितिं च ।
गुप्तित्रयं तथा वर्णयति उपवासफलं विशुद्धस्य ॥

**अणागदमदिक्कंतं कोडिजुदमखंडिदं ।**
**सायारं च णिरायारं परिमाणं तहेतरं ॥९८॥**

अनागतमतिक्रान्तं कोटियुतमखंडितं ।
साकारं च निराकारं परिमाणं तथेतरत् ॥

**तहा च वत्तणीयातं सहेदुगमिदि ठिदं ।**
**पच्चक्खाणं जिणेंदेहिं दहभेयं पकित्तिदं ॥ ९९ ॥**

तथा च........सहेतुकमिति स्थितं ।
प्रत्याख्यानं जिनेन्द्रैः दशभेदंप्रकीर्तितं ॥

**चउव्विहं तं हि विणयसुद्धं अणुवादसुद्धमिदि जाणे ।**
**अणुपालणसुद्धं चिय भावविसुद्धं गहीदव्वं ॥ १०० ॥**

चतुर्विधं तद्धि विनयशुद्धं अनुवादशुद्धमिति जानीहि ।
अनुपालनशुद्धं चैव भावविशुद्धं गृहीतव्यं ॥

पयाणि ८४००००० ।

इदि पच्चक्खाणपुव्वं गदं—इति प्रत्याख्यानपूर्वं गतं ।

---

**विज्जाणुवादपुव्वं पयाणि इगिकोडि होंति दसलक्खा ।**
**अंगुट्ठपसेणादी लहुविज्जा सत्तसयमेत्थ ॥१०१॥**

विद्यानुवादपूर्वं पदानि एककोटिः भवन्ति दशलक्षाणि ।
अंगुष्ठप्रसेनादीः लघुविद्याः सप्तशतान्यत्र ॥

**पंचसया महविज्जा रोहिणिपमुहा पकासये चावि ।**
**तेसिं सरूवसत्तिं साहणपूयं च मंतादिं ॥१०२॥**

पंचशतानि महाविद्या रोहिणीप्रमुखाः प्रकाशयति चापि ।
तासां स्वरूपशक्तिं साधनपूजां च मंत्रादिकं ॥

**सिद्धाणं फललाहे भोमंगयणंगसद्दछिण्णाणि ।**
**सुमिणंलक्खणविंजणअट्ठणिमित्ताणि जं कहइ ॥१०३॥**

सिद्धानां फललाभान् भौमगगनाङ्गशब्दच्छिन्नानि ।
स्वप्नलक्षणव्यंजनानि अष्टौ निमित्तानि यत्कथयति ॥

पयाणि ११००००००० ।

इदि विज्जाणुवादपुव्वं—इति विद्यानुवादपूर्वं ।

**कल्लाणवादपुव्वं छव्वीससुकोडिपयप्पमाणं तु ।**
**तित्थहरचक्कवट्टीबलदेउसमद्धचक्कीणं ॥ १०४ ॥**

कल्याणवादपूर्वं षड्विंशतिसुकोटिपदप्रमाणं तु ।
तीर्थकरचक्रवर्तिबलदेवसमर्द्धचक्रिणां ॥

गब्भावदरणउच्छव तित्थयरादीसु पुण्णहेदू च ।
सोलहभावणकिरिया तवाणि वण्णेदि (स)विसेसं ॥१०५॥

गर्भावतरोत्सवानि तीर्थकरादिषु पुण्यहेतूंश्च ।
षोडशभावनाक्रियाः तपांसि वर्णयति सविशेषं ॥

वरचंदसूरगहणगहणक्खत्तादिचारसउणाई ।
* तेसिं च फलाइं पुणो * वण्णेदि सुहासुहं जत्थ ॥१०६॥

वरचन्द्रसूर्यग्रहणग्रहनक्षत्रादिचारशकुनादि ।
तेषां च फलादि पुनः वर्णयति शुभाशुभं यत्र ॥

पयाई २६०००००० ।

इदि कल्लाणवादपुव्वं–इति कल्याणवादपूर्वं ।

पाणावायं पुव्वं तेरहकोडीपयं णमंसामि ।
जत्थ वि कायचिकिच्छापमुहट्ठंगायुवेयं च ॥१०७॥

प्राणावायं पूर्वं त्रयोदशकोटिपदं नमामि ।
यत्रापि कायचिकित्साप्रमुखाष्टाङ्गं आयुर्वेदं च ॥

भूदीकम्मजंगुलिपक्कमाणसाहया परे भेया ।
ईडापिंगलादिपाणा पुढवीआउग्गिवायूणं ॥ १०८ ॥

भूतिकर्मजांगुलिप्रक्रमसाधका परे भेदाः ।
इडापिंगलादिप्राणाः पृथिव्यप्त्रग्निवायूनां ॥

तत्ताणं बहुभेयं दहपाणपरूवणं च दव्वाणि ।
उवयारअवयारयरूवाणि य तेसिमेवं खु ॥ १०९ ॥

तत्त्वानां बहुभेदं दशप्राणप्ररूपणं च द्रव्याणि ।
उपकारापकाररूपाणि च तेषामेवं खलु ॥

वण्णिज्जइ गइभेया जिणवरदेवेहि सव्वभासाहिं ।
वर्ण्यंते गतिभेदैः जिनवरदेवैः सर्वभाषाभिः ।

पयाणि १३००००००० ।

पाणवायं गदं—प्राणावायं गतं ।

किरियाविसालपुव्वं णवकोडिपयेहिं संजुत्तं ॥ ११० ॥
क्रियाविशालपूर्वं नवकोटिपदैः संयुक्तं ॥

संगीदसत्थछेदालंकारादी कला बहत्तरी य ।
चउसट्ठी इत्थिगुणा चउसीदी जत्थ सिप्पाणं ॥१११॥
संगीतशास्त्रच्छंदोलङ्कारादि यः कलाः द्वासप्ततिः ।
चतुःषष्टिः स्त्रीगुणाः चतुरशीतिः यत्र शिल्पानां ॥

विण्णाणाणि सुगब्भाधाणादी अडसयं च पणवग्गं ।
सम्मद्दंसणकिरिया वण्णिज्जंते जिणिंदेहिं ॥११२॥
विज्ञानानि सुगर्भाधानादयः अष्टशतं च पंचवर्गं ।
सम्यग्दर्शनक्रियाः वर्ण्यंते जिनेन्द्रैः ॥

णिच्चणिमित्ताकिरिया वंदणसम्मादिया मुणिंदाणं ।
लोगिगलोगुत्तरभवकिरिया णेया सहावेण ॥११३॥
नित्यनिमित्तक्रिया वंदनासाम्यादिका मुनीन्द्राणां ।
लौकिकलोकोत्तरभवक्रिया ज्ञेयाः स्वभावेन ॥

पयाणि ९००००००० ।

इदि किरियाविसालं—इति क्रियाविशालं ।

तिलोयविंदसारं कोडीबारह दसग्घपणलक्खं ।
जत्थ पयाणि तिलोयं छत्तीसं गुणिदपरियम्मं ॥११४॥

त्रिलोकबिन्दुसारं कोट्यो द्वादश दशपंचलक्षाणि ।
यत्र पदानि त्रिलोकं षड्त्रिंशत् गणितपरिकर्म ॥

अडववहारात्थि पुणो अंकविपासादि चारि बीजाइं ।
मोक्खसरूवगमणकारणसुहधम्मकिरियाओ ॥११५॥

अष्टव्यवहारान् पुनः अंकविपासादीनि चत्वारि बीजानि ।
मोक्षस्वरूपगमनकारणसुखधर्मक्रियाः ॥

लोयस्स विंदवयवा वण्णिज्जंते च एत्थ सारं च ।
तं लोयविंदुसारं चोद्दसपुव्वं णमंसामि ॥११६॥

लोकस्य बिन्दवोऽवयवा वर्ण्यंते यत्र सारं च ।
तल्लोकबिन्दुसारं चतुर्दशपूर्वं नमामि ॥

पयाणि १२५०००००० ।

तिलोयबिंदुसारं गदं—त्रिलोकबिन्दुसारं गतं ।

---

इदि णाणभूसपट्टे सूरिं सिरिविजयकित्तिणामगुरुं ।
णमिऊण सूरिमुक्खो कहइ इणं सुद्धसुहचंदो ॥ ११७ ॥

इति ज्ञानभूषणपट्टे सूरिं श्रीविजयकीर्तिनामगुरुं ।
नत्वा सूरिमुख्यः कथयति इमां शुद्धशुभचंद्रः ॥

इदि अंगपण्णत्तीए सिद्धंतसमुच्चये बारहअंगसमरणावराभिहाणे बिदियो अहियारो ॥ २ ॥

---

# चूलिकाप्रकीर्णकप्रज्ञप्तिः ।

तच्चूलियासु भेया पंच वि तह जलगया हवे पढमा ।
जलथंभण जलगमणं वण्णदि विण्हिस्स भक्खं जं ॥१॥

तच्चूलिकासु भेदाः पंचापि तथा जलगता भवेत्प्रथमा ।
जलस्थंभनं जलगमनं वर्णयति वन्हेः भक्षणं यत् ॥

वेसणसेवणमंतंतंतवचरणपमुहविहिभेए ।
णहणहदुगणवअडणवणहदुण्णि पयाणि अंककमे ॥२॥

प्रवेशनसेवनमंत्रतंत्रतपश्चरणप्रमुखविधिभेदान् ।
नभोनभोद्विकनवाष्टनवनभोद्विकानि पदानि अंकक्रमेण ॥

पयाणि २०९८९२०० ।

जलगदचूलिया–जलगतचूलिका ।

---

मेरुकुलसेलभूमीपमुहेसु पवेससिग्घगमणादि– ।
कारणमंतंतंतवचरणणिरूवया रम्मा ॥३॥

मेरुकुलशैलभूमिप्रमुखेषु प्रवेशशीघ्रगमनादि– ।
कारणमंत्रतंत्रतपश्चरणनिरूपिका रम्या ॥

तित्तियपयमेत्ता हु थलगयसण्णामचूलिया भणिया ।
मायागया च तेत्तियपयमेत्ता चूलिया णेया ॥४॥

तावत्पदमात्रा हि स्थलगतसन्नामचूलिका भणिता ।
मायागता च तावत्पदमात्रा चूलिका ज्ञेया ॥

मायारूवमहिंदजालविकिरियादिकारणगणस्स ।
मंततवतंतयस्स य णिरूवगा कोदुयाकलिदा ॥५॥

मायारूपेन्द्रजालविक्रियादिकारणगणानां ।
मंत्रतपस्तंत्राणां च निरूपिका········कलिता ॥

**रूवगया पुण हरिकरितुरंगरुरुणरतरुमियवसहाणं ।**
**ससवग्घादीणं पि य रूवपरावत्तहेदुस्स ॥६॥**

रूपगता पुनः हरिकरितुरगरुरुनरतरुमृगवृषभाणां ।
शशव्याघ्रादीनामपि च रूपपरावर्तनहेतूनां ॥

**तवचरणमंततंतंयंतस्स परूवगा य वयसिला—।**
**चितकट्ठलेव्वुक्खणणादिसु लक्खणं कहदि ॥७॥**

तपश्चरणमंत्रतंत्रयंत्राणां प्ररूपका च········शिला—।
चित्रकाष्ठलेप्योत्खननादिसुलक्षणं कथ्यते ॥

**पारदपरियट्टणयं रसवायं धादुवायक्खणं च ।**
**या चूलिया कहेदि णाणाजीवाण सुहहेदू ॥८॥॥**

पारदपरिवर्तनं रसवादं धातुवादाख्यानं च ।
या चूलिका कथ्यते नानाजीवानां सुखहेतोः ॥

**आयासगया पुण गयणे गमणस्स सुमंततंतयंताइं ।**
**हेदूणि कहदि तवमपि तेत्तियपयमेत्तसंबद्धा ॥९॥**

आकाशगता पुनः गगने गमनस्य सुमंत्रतंत्रयंत्राणि ।
हेतूनि कथयति तपोऽपि तावत्पदमात्रसम्बद्धा ॥

इदि पंचपयारचूलिया सरिसया गदा—इति पंचप्रकारचूलिका सदृशा गता ।

---

**चउद्दस पइण्णाया खलु सामइपमुहा हि अंगबाहिरिया ।**
**ते वोच्छे अंतरियहेदू············हि सुभव्वजीवस्स ॥१०॥**

चतुर्दश प्रकीर्णकाः खलु सामायिकप्रमुखा हि अंगबाह्याः ।
तान् वक्ष्ये············हेतु·······हि सुभव्यजीवस्य ॥

एयत्तणेण अप्पे गमणं परदव्वदो दु णिव्वत्ती ।
उवयोगस्स पइत्ती स समायोऽदो उच्चदे समये ॥११॥

एकत्वेन आत्मनि गमनं परद्रव्यतस्तु निवृत्तिः ।
उपयोगस्य प्रवृत्तिः स समायै आत्मोच्यते समये ॥

णादा चेदा दिट्ठाहमेव इदि अप्पगोचरं झाणं ।
अह सं मज्झत्थे गदि अप्पे आयो दु सो भणिओ ॥१२॥

ज्ञाता चेतयिता दृष्टाहमेव इत्यात्मगोचरं ध्यानं ।
अथ सं मध्यस्थे गतिरात्मनि आयस्तु स भणितः ॥

तत्थ भवं सामइयं सत्थं अवि तप्परूवगं छविहं ।
णाम ट्ठवणा दव्वं खेत्तं कालं च भावं तं ॥१३॥

तत्र भवं सामायिकं शास्त्रमपि तत्प्ररूपकं षड्विधं ।
नाम स्थापना द्रव्यं क्षेत्रं कालश्च भावस्तत् ॥

तत्थ इट्ठाणिट्ठणामेसु रायदोसणिव्वात्ति सामाइयमिदि अहिहाणं वा णाम सामाइयं ॥ १ ॥

तत्रेष्टानिष्टनामसु रागद्वेषनिवृत्तिः सामायिकमिति अभिधानं वा नाम सामायिकम् ॥१॥

मणुण्णमणुण्णासु इत्थिपुरिसाइआयारट्ठावणासु कट्ठलेवचित्तादिपडिमासु रायदोसणियट्टी इणं सामाइयमिदि वा ट्ठवमाणयं किंचि वत्थू वा ठावणा सामाइयं ॥ २ ॥

मनोज्ञामनोज्ञासु स्त्रीपुरुषाद्याकारस्थापनासु काष्ठलेपचित्रादिप्रतिमासु रागद्वेषनिवृत्तिः इदं सामायिकमिति वा स्थाप्यमानं किंचिद्वस्तु वा स्थापना सामायिकं ॥ २ ॥

इट्ठाणिट्ठेसु चेदणाचेदणदव्वेसु रायदोसणियट्टी सामाइयसत्थाणुवजुत्तणायगो तस्सरीरादि वा दव्वसामाइयं ॥ ३ ॥

इष्टानिष्टेषु चेतनाचेतनद्रव्येषु रागद्वेषनिवृत्तिः सामायिकशास्त्रानुपयुक्तज्ञायकः तच्छरीरादि वा द्रव्यसामायिकं ॥ ३ ॥

**णामगामणयरवणादिखेत्तेसु इट्ठाणिट्ठेसु रायदोसणियत्ती खेत्तसामाइयं ॥ ४ ॥**

नामग्रामनगरवनादिक्षेत्रेषु इष्टानिष्टेषु रागद्वेषनिवृत्तिः क्षेत्रसामायिकं ॥ ४ ॥

**वसंताइसु उडुसु सुक्ककिण्हाणं पक्खाणं दिणवारणक्खत्ताइसु य तेसु कालविसेसेसु तं णियत्ती कालसामाइयं ॥ ५ ॥**

वसंतादिषु ऋतुषु शुक्लकृष्णयोः पक्षयोः दिनवारनक्षत्रादिषु च तेषु कालविशेषेषु तन्निवृत्तिः कालसामायिकं ॥ ५ ॥

**णामभावस्स जीवादितच्चविसयुवयोगरूवस्स पज्जायस्स मिच्छादंसणकसायादिसंकिलेसणियत्ती सामाइयसत्थुवजुत्तजाणगो तप्पज्जायपरिणदं सामाइयं वा भावसामाइयं ॥ ६ ॥**

नामभावस्य जीवादितत्त्वविषयोपयोगरूपस्य पर्यायस्य मिथ्यादर्शनकषायादिसंक्लेशनिवृत्तिः सामायिकशास्त्रोपयुक्तज्ञायकः तत्पर्यायपरिणतं सामायिकं वा भावसामायिकं ॥६॥

सामाइयं गदं—सामायिकं गतं ।

---

**चउविसजिणाण णामठवणदव्वखेत्तकालभावेहिं ।**
**कल्लाणचउत्तीसादिसयाडपाडिहेराणं ॥ १४ ॥**

चतुर्विंशतिजिनानां नामस्थापनाद्रव्यक्षेत्रकालभावैः ।
कल्याणचतुस्त्रिंशदतिशयाष्टप्रातिहार्याणां ॥

**परमोरालियदेहसम्मोसरणाण धम्मदेसस्स ।**
**वण्णणमिह तं थवणं तप्पडिबद्धं च सत्थं च ॥ १५ ॥**

परमौदारिकदेहसमवशरणानां धर्मदेशस्य ।
वर्णनमिह तत्स्तवनं तत्प्रतिबद्धं च शास्त्रं च ॥
एवं गदं—स्तवं गतं ।

---

सा वंदणा जिणुत्ता वंदिज्जइ जिणवराणमिय एक्कं ।
चेत्तचेत्तालयादिथई च दव्वादिबहुभेया ॥ १६ ॥
सा वन्दना जिनोक्ता वन्द्यते जिनवराणां एकः ।
चैत्यचैत्यालयादिस्तुतिश्च द्रव्यादिबहुभेदा ॥
एवं वंदणा—एवं वंदना ।

---

पडिकमणं कयदोसणिरायरणं होदि तं च सत्तविहं ।
देवसियराइक्खियचउमासियमेववच्छरियं ॥ १७ ॥
प्रतिक्रमणं कृतदोषनिराकरणं भवति तच्च सप्तविधं ।
दैवसिकरात्रिकपाक्षिकचातुर्मासिकसांवत्सरिकं ॥
इज्जावहियं उत्तमअत्थं इदि भरहखेत्तादि ।
दुस्समकालं च तहा छहसंहणणऽड्डुपुरिसमासिज्ज ॥१८॥
ईर्यापथिकं उत्तमार्थमिति भरतक्षेत्रादि ।
दुःषमकालं च तथा षट्संहननाढ्यपुरुषमाश्रित्य ॥
दव्वादिभेदभिण्णं सत्थं अवि तप्परूवयं तं (तु) ।
यदिवग्गेहि सदावि य णादव्वं दोसपरिहरणं ॥ १९ ॥
द्रव्यादिभेदभिन्नं शास्त्रमपि तत्प्ररूपकं तत्तु ।
यतिवर्गैः सदापि च ज्ञातव्यं दोषपरिहरणं ॥
इदि पडिक्कमणं—इति प्रतिक्रमणं ।

---

**वेणइयं णादव्वं पंचविहं णाणदंसणाणं च ।**
**चारित्ततवुवचारह विणओ जत्थ परूविज्जइ ॥ २० ॥**

वैनयिकं ज्ञातव्यं पंचविधं ज्ञानदर्शनयोश्च ।
चारित्रतपउपचाराणां विनयः यत्र प्ररूप्यते ॥

**विणयो सासणधम्मो विणओ संसारतारओ विणओ ।**
**मोक्खपहो वि य विणओ कायव्वो सम्मदिट्ठीणं ॥ २१ ॥**

विनयः शासनधर्मः विनयः संसारतारकः विनयः ।
मोक्षपथोऽपि च विनयः कर्तव्यः सम्यग्दृष्टिभिः ॥

विणओ गदो—विनयो गतः ।

---

**किदिकम्मं जिणवयणधम्मजिणालयाण चेत्तस्स ।**
**पंचगुरूणं णवहा वंदणहेदुं परूवेदि ॥ २२ ॥**

कृतिकर्म जिनवचनधर्मजिनालयानां चैत्यस्य ।
पंचगुरूणां नवधा वन्दनाहेतुं प्ररूपयति ॥

**साधीणतियपदिक्खणतियणदिचउसरसुबारसावत्ते ।**
**णिच्चणिमित्तकिरियाविहिं च बत्तीस दोसहरं ॥ २३ ॥**

स्वाधीनत्रिकप्रादक्षिण्यत्रिनतिचतुःशिरोद्वादशावर्ताः ।
नित्यनैमित्तिकक्रियाविधिं च द्वात्रिंशद्दोषहरं ॥

इदि किदिकम्मं—इति कृतिकर्म ।

---

**जदिगोचारस्स विहिं पिंडविसुद्धिं च जं परूवेदि ।**
**दसवेयालियसुत्तं दह काला जत्थ संवुत्ता ॥ २४ ॥**

यतिगोचरस्य विधिं पिंडविशुद्धिं च यत् प्ररूपयति ।

दशवैकालिकसूत्रे दश काला यत्र समुक्ताः ॥

इदि दहवेकालियं–इति दशवैकालिकं ।

---

उत्तराणि अहिज्जंति उत्तरज्झयणं मदं जिणिंदेहिं ।

बावीसपरीसहाणं उवसग्गाणं च सहणविहिं ॥ २५ ॥

उत्तराणि अधीयन्ते उत्तराध्ययनं मतं जिनेन्द्रैः ।

द्वाविंशतिपरीषहानां उपसर्गाणां च सहनविधिं ॥

वण्णेदि तप्फलमवि एवं पण्हे च उत्तरं एवं ।

कहदि गुरु सीसयाणं पइण्णिय अट्ठम तं खु ॥ २६ ॥

वर्णयति तत्फलमपि एवं प्रश्ने च उत्तरं एवं ।

कथयति गुरुः शिष्येभ्यः प्रकीर्णकं अष्टमं तत्खलु ॥

इदि उत्तरज्झयणं–इत्युत्तराध्ययनं ।

---

कप्पव्ववहारो जहिं ववहिज्जइ जोग कप्पमाजोग्गा ।

सत्थं अवि इसिजोग्गं आयरणं कहदि सव्वत्थ ॥ २७ ॥

कल्पव्यवहारः यत्र व्यवह्रियते योग्यं कल्प्यं अयोग्यं ।

शास्त्रमपि ऋषियोग्यं आचरणं कथयति सर्वत्र ॥

एवं कप्पववहारो गदो–एवं कल्पव्यवहारो गतः ।

---

कप्पाकप्पं तं चिय साहूणं जत्थ कप्पमाकप्पं ।

वण्णिज्जइ आसिचा दव्वं खेत्तं भवं कालं ॥ २८ ॥

कल्प्याकल्प्यं तदेव साधूनां यत्र कल्प्यमकल्प्यं ।
वर्ण्यते आश्रित्य द्रव्यं क्षेत्रं भवं कालं ॥
इदि कप्पाकप्प–इति कल्प्याकल्प्यं ।

महकप्पं णायव्वं जिणकप्पाणं च सव्वसाहूणं ।
उत्तमसंहडणाणं दव्वक्खेत्तादिवत्तीणं ॥ २९ ॥
महाकल्प्यं ज्ञातव्यं जिनकल्पानां च सर्वसाधूनां ।
उत्तमसंहननानां द्रव्यक्षेत्रादिवर्तिनां ॥
तियकालयोगकप्पं थविरकप्पाण जत्थ वण्णिज्जइ ।
दिक्खासिक्खापोसणसल्लेहणअप्पसक्कारं ॥ ३० ॥
त्रिकालयोगकल्प्यं स्थविरकल्पानां यत्र वर्ण्यते ।
दीक्षाशिक्षापोषणसल्लेखनात्मसंस्काराणि ॥
उत्तमठाणगदाणं उक्किट्ठाराहणाविसेसं च ।
उत्तमस्थानगतानां उत्कृष्टाराधनाविशेषं च ।
इदि महाकप्पं गद–इति महाकल्प्यं गतं ।

पुंडरियणामसत्थं णमामि णिच्चं सुभावेण ॥ ३१ ॥
पुंडरीकनामशास्त्रं नमामि नित्यं सुभावेन ।
भावणविंतरजोइसकप्पविमाणेसु जत्थ वण्णिज्जइ ।
उप्पत्तीकारण खलु दाणं पूयं च तवयरणं ॥ ३२ ॥
भावनव्यन्तरज्योतिष्ककल्पविमानेषु यत्र वर्ण्यते ।
उत्पत्तिकारणं खलु दानं पूजा च तपश्चरणं ॥
सम्मत्तसंजमादिं अकामणिज्जरणमेवं जत्थ पुणो ।
तमुवादट्ठाणवेहवसुहसंपत्ती च जीवाणं ॥ ३३ ॥

सम्यक्त्वसंयमादि अकामनिर्जरा एव यत्र पुनः ।

तदुत्पादस्थानवैभवसुखसंपत्तिश्च जीवानां ॥

इदि महपुंडरीयं-इति महापुंडरीकं ।

---

णीसेहियं हि सत्थं पमाददोसस्स दूरपरिहरणं ।

पायच्छित्तविहाणं कहेदि कालादिभावेण ॥ २४ ॥

निषेधिका हि शास्त्रं प्रमाददोषस्य दूरपरिहरणं ।

प्रायश्चित्तविधानं कथयति कालादिभावेन ॥

आलोयण पडिकमणं उभयं च विवेयमेव वोसग्गं ।

तव छेयं परिहारो उवठावण मूलमिदि णेया ॥ २५ ॥

अलोचनं प्रतिक्रमणं उभयं च विवेक एव व्युत्सर्गः ।

तपश्छेदः परिहारः उपस्थापना मूलमिति ज्ञेयं ॥

दहभेया वि य छेदे दोसा आकंपियं दस एदे ।

अणुमाणिय जं दिट्ठं बादर सुहमं च छिण्णं च ॥ २६ ॥

दशभेदा अपि च छेदे दोषा आकंपितं दश एते ।

अनुमानितं यद्दृष्टं बादरं सूक्ष्मं च छिन्नं च ॥

सद्दावुलियं बहुजणमव्वत्तं चावि होदि तस्सेवी ।

दोसणिसेयविमुत्तं इदि पायच्छित्तं गहीदव्वं ॥ २७ ॥

---

१ महपुंडरीयं अस्य स्थाने पुंडरीयं इत्येव भाव्यं । महापुंडरीकस्य लक्षणं पुस्तकाच्युतं अस्मद्दृष्टिदोषाद्वा गतमिति न जानीमः । लिखितपुस्तकं त्वधुना अस्मत्समीपे नास्ति । २१-५-२२ । तल्लक्षणं हि-महच्च तत्पुंडरीकं च महापुंडरीकं शास्त्रं तच्च महर्धिकेषु इन्द्रप्रतीन्द्रादिषु उत्पत्तिकारणतपोविशेषाद्याचरणं वर्णयति ।

महपुंडरियं सत्थं वण्णिज्जइ जत्थ महड्ढिदेवेसु ।

इंदपडिंदाईसूपत्तीकारणतवोविसेसाइआयरणं ॥ १ ॥

शब्दाकुलितं बहुजनमल्यक्तं चापि भवति तत्सेवी ।
दोषनिषेकाविमुक्तं इति प्रायश्चित्तं गृहीतव्यं ॥

**एवं दहछेया वि य तद्दोसा तहगिहा वि तब्भेया ।**
**वण्णिज्जंते स जत्थ वि णिसीदिकाएसु वित्थारा ॥ ३८ ॥**

एवं दशान्छेदा अपि च तद्दोषा तथाविधा अपि च तद्भेदाः ।
वर्ण्यन्ते तत्रापि निसीतिकासु विस्तारेण ॥

इदि णिसेहियपइण्णयं—इति निषेधिकाप्रकीर्णकं ।

**एवं पइण्णयाणि य चोद्दस पडिदाणि एत्थ संखेवा ।**
**सद्दहदि जो वि जीवो सो पावइ परमणिव्वाणं ॥ ३९ ॥**

एवं प्रकीर्णकानि च चतुर्दश प्रतीतानि अत्र संक्षेपात् ।
श्रद्दधाति योपि जीवः स प्राप्नोति परमनिर्वाणं ॥

एवं चोद्दसपइण्णया—एवं चतुर्दशप्रकीर्णकानि ।

**सुदणाणं केवलमवि दोण्णि वि सरिसाणि होंति बोहादो ।**
**पच्चक्खं केवलमवि सुदं परोक्खं सया जाणे ॥ ४० ॥**

श्रुतज्ञानं केवलमपि द्वे अपि सदृशे भवतो बोधतः ।
प्रत्यक्षं केवलमपि श्रुतं परोक्षं सदा जानीहि ॥

**इदि उसहेण वि भणियं पण्हादो उसहसेणजोइस्स ।**
**सेसावि जिणवरिंदा सगणिं पडि तह समक्खंति ॥ ४१ ॥**

इति वृषभेणापि भणितं प्रश्नतः वृषभसेनयोगिनः ।
शेषा अपि जिनवरेन्द्राः स्वगणिनः प्रति तथा समाख्यान्ति ॥

**सिरिवड्ढमाणमुहकयविणिग्गयं बारहंगसुदणाणं ।**
**सिरिगोयमेण रइयं अविरुद्धं सुणह भवियजणा ॥ ४२ ॥**

श्रीवर्धमानमुखकजविनिर्गतं द्वादशाङ्गश्रुतज्ञानं ।
श्रीगौतमेन रचितं अविरुद्धं शृणुत भव्यजनाः ॥

सिरिगोदमेण दिण्णं सुहम्मणाहस्स तेण जंबुस्स ।
विण्हू णंदीमित्तो तत्तो य पराजिदो य(त)त्तो ॥ ४३ ॥

श्रीगौतमेन दत्तं सुधर्मनाथस्य तेन जम्बूनाम्नः ।
विष्णुः नन्दिमित्रः ततश्चऽपराजितः ततः ॥

गोवद्धणो य तत्तो भद्दबाहू अंतकेवली कहिओ ।
बारहअंगविदण्हू पंचेदे कलियुगे जादा ॥ ४४ ॥

गोवर्धनश्च ततः भद्रबाहुः अन्तकेवली कथितः ।
द्वादशाङ्गविदः पंचैते कलियुगे जाताः ॥

दसपुव्वाणं वेदा विसाहसिरिपोट्ठिलो तदो सूरी ।
खत्तिय जयसो विजयो बुद्धिल्लसुगंगदेवा य ॥ ४५ ॥

दशपूर्वाणां वेत्तारौ विशाखश्रीप्रौष्ठिलौ ततः सूरी ।
क्षत्रियः जयसः विजयः बुद्धिल्लसुगंगदेवौ च ॥

सिरिधम्मसेणसुगणी तत्तो एगादसंगवेत्तारा ।
णक्खत्तो जयपालो पंडू धुवसेण कंसगणी ॥ ४६ ॥

श्रीधर्मसेनसुगणी तत एकादशाङ्गवेत्तारः ।
नक्षत्रः जयपालः पांडुः ध्रुवसेनः कंसगणी ॥

अग्गमअंगि सुभद्दो जसभद्दो भद्दबाहु परमगणी ।
आइरियपरंपराइ एवं सुदणाणमावहदि ॥ ४७ ॥

अग्रिमाङ्गी सुभद्रः यशोभद्रः भद्रबाहुः परमगणी ।
आचार्यपरंपरया एवं श्रुतज्ञानं आवहति ॥

---

१ नागसेनसिद्धार्थधृतिषेणेति त्रीणि नामानि पुस्तकादूतानीत्यवभाति । २ प्रथमाङ्गवेत्तारः । ३ लोहार्यश्चेति ।

कालविसेसा णट्ठं सुदणाणं अप्पबुद्धिधरणादो ।
तं अंसं संवहदि धम्मुवदेसस्स सद्धे दु ॥ ४८ ॥

कालविशेषात् नष्टं श्रुतज्ञानं अल्पबुद्धिधरणतः ।
तदंशं संवहति धर्मोपदेशस्य श्रद्धानेन तु ॥

आइरियपरंपराइं आगदअंगोवदेसणं पढइ ।
सो चढइ मोक्खसउहं भव्वो बोहप्पहावेण ॥ ४९ ॥

आचार्यपरंपरया आगताङ्गोपदेशने पठति ।
स चटति मोक्षसौधं भव्यो बोधप्रभावेन ॥

सिरिसयलकित्तिपट्टे आसेसी भुवणकित्तिपरमगुरू ।
तप्पट्टकमलभाणू भट्टारओ बोहभूसणओ ॥ ५० ॥

श्रीसकलकीर्तिपट्टे आसीत् भुवनकीर्तिपरमगुरुः ।
तत्पट्टकमलभानुः भट्टारकः बोधभूषणः ॥

सिरिविजकित्तिदेओ णाणासत्थप्पयासओ धीरो ।
बुहसेवियपयजुयलो तप्पयवरकलभसलो य ॥ ५१ ॥

श्रीविजयकीर्तिदेवो नानाशास्त्रप्रकाशको धीरः ।
बुधसेवितपदयुगलः तत्पदवरकलभ........ ॥

तप्पयसेवणसत्तो तेविज्जो उहयभासपरिवेई ।
सुहचंदो तेण इणं रइयं सत्थं समासेण ॥ ५२ ॥

तत्पदसेवनसक्तः त्रैविद्यः उभयभाषापरिसेवी ।
शुभचन्द्रस्तेनेदं रचितं शास्त्रं समासेन ॥

सत्थविरुद्धं किं पि य जं तं सोहंतु सुदहरा भव्वा ।
परउवयारणिविट्ठा परकज्जयरा सुहाविट्ठा ॥ ५३ ॥

शास्त्रविरुद्धं किमपि च यत्तत् शोधयन्तु श्रुतधरा भव्याः ।
परोपकारनिविष्टाः परकार्यंकराः सुभावाढ्याः ॥

**जो णाणहरो भव्वो भावइ जिणसासणं परं दिव्वं ।**
**अचलपयं सो पावइ सुदणाणुवदेसियं सुद्धं ॥ ५७ ॥**

यो ज्ञानधरो भव्यो भावयति जिनशासनं परं दिव्यं ।
अचलपदं स प्राप्नोति श्रुतज्ञानोपदेशितं शुद्धं ॥

**इदि अंगपण्णत्तीए सिद्धंतसमुच्चये बारहअंगसमराणावराभिहाणे तइओ परिच्छेदो सम्मत्तो ॥ ३ ॥**

इदि अंगपण्णत्ती सम्मत्ता ।

---

**सं. १८६४ पूषवदी १५ सुरतबंदरे चन्द्रप्रभचैत्यालये लिखितं पंडितरूपचन्द्रेण स्वज्ञानावरणीयकर्मक्षयार्थं । शुभं भवतु, कल्याणमस्तु ।**

# अथ श्रुतावतारः।

अत्र भरतक्षेत्रे वांमिदेशे वसुंधरानामनगरी भविष्यति। तत्र नरवाहनो राजा, तस्य सुरूपा राज्ञी, तस्यां पुत्रमलभमानो राजा हृदि खेदं करिष्यति। अत्र प्रस्तावे सुबुद्धिनामा श्रेष्ठी तस्य नृपस्योपदेशं दास्यति। यदि देव! पद्मावतीपादारविंदपूजां करिष्यसि। तदा पुत्रं त्वं प्राप्नोषि अत एव श्रेष्ठिना प्रोक्तं तदेव राजा करिष्यति ततः पुत्रो भविष्यति। तस्य पुत्रस्य पद्म इति नाम विधास्यति। राजा ततश्चैत्यालयं करिष्यति सहस्रकूटं दशसहस्रस्तंभोद्धृतं चतुःशालं, वर्षे वर्षे यात्रां करिष्यति। वसंतमासे श्रेष्ठ्यपि राजप्रसादात्पदे पदे जिनमंदिरैर्मंडितां महीं करिष्यति। अत्रांतरे मधौ प्राप्ते समस्तोपि संघस्तत्रागमिष्यति। राजा श्रेष्ठिना सह जिनालयं निष्पाद्य पूजां च नगरीमध्ये महामहोत्सवेन रथं भ्रामयित्वा ततो जिनप्रांगणे स्थापयिष्यति। निजमित्रं मगधस्वामिनं मुनींद्रं दृष्ट्वा वैराग्यभावनाभावितो नरवाहनोपि श्रेष्ठिना सुबुद्धिनाम्ना सह जैनीं दीक्षां करिष्यति। अत्रांतरे कश्चिल्लेखवाहः समागमिष्यति। जिनान् प्रणम्य मुनीनां वंदनां कृत्वा धरसेनगुरोर्वंदनां प्रतिपाद्य लेखं समर्पयिष्यति। तत्रत्यास्ते मुनयस्तं गृहीत्वा वाचनां करिष्यंति। तद्यथा। गिरिनगरसमीपे गुहावासी धरसेनमुनीश्वरोऽग्रायणीयपूर्वस्य यः पंचमवस्तुकस्तस्य तुर्यप्राभृतस्य शास्त्रस्य व्याख्यानप्रारंभं करिष्यति। धरसेनभट्टारकः कतिपयदिनैर्नरवाहनसद्बुद्धिनाम्नोः पठनाकर्णनचिंतनक्रियां कुर्वतोराषाढश्वेतैकादशीदिने शास्त्रं परिसमाप्तिं यास्यति एकस्य भूता रात्रौ बलिविधिं करिष्यंति, अन्यस्य दंतचतुष्कं सुंदरं। भूतबलिप्रभावाद्भूतबलिनामा नरवाहनो मुनिर्भविष्यति समदंतचतुष्टयप्रभावात् सद्बुद्धिः पुष्पदंतनामा मुनिर्भविष्यति। आत्मनो निकटमरणं ज्ञात्वा धरसेन एतयोर्मा क्लेशो भवतु इति मत्वा तन्मुनिविसर्जनं करिष्यति।

तन्मुनिद्वयं अंकुलेसुरपुरे गत्वा मत्वा षडंगरचनां कृत्वा शास्त्रेषु लिखाप्य लेखकान् संतोष्य प्रचुरदानेन ज्येष्ठस्य शुक्लपंचम्यां तानि शास्त्राणि संघसहितानि नरवाहनः पूजयिष्यति षडंगनामानं दत्वा निजपाठितं पुष्पदंतसमीपं नरवाहनस्तं पुस्तकसहितं प्रेषयिष्यति निजपाठितदर्शितपुस्तकं तं षडंगनामानं दृष्ट्वा पुष्पदंतः स्वहृदि तोषं करिष्यति नानापुस्तकसमूहं लिखाप्य सोपि पंचमीतिथ्यंगमालोकमानो मुनिभिः समंततः स्थास्यति। अत्रांतरे ग्रीष्मकाले मासे पुष्पदंतो विचित्रमंडपरचनां करिष्यति। पुस्तकपूजानिमित्तं सिद्धांत- पुस्तकं धृत्वा समस्तानन्यान्पट्टकोपरिचरपट्टैः पिधाय क्रियां कृत्वा ततः श्रुतस्तोत्रं करिष्यति। व्रतसमितिगुप्तिमुनिव्रतभाषणं आचारांगमष्टादशसहस्रपदैर्भक्त्याभिवंदे इत्यादिस्तोत्रं विधाय यावत्पुष्पदंताचार्य्यः स्थास्यति तावद्भव्यजनैः पृष्टः सम्यगुपवासफलं भव्यानामग्रे भणिष्यति। ये केचित्प्राणिनः शुक्लपंचमीदिने उपवासं श्रुतार्थं कुर्वंति ते खेचरोरगसुरासुरसुखानि भुक्त्वा तृतीये भवे निर्व्वाणं व्रजंति तद्वचः श्रुत्वा श्रावकाः श्राविकाश्च तं विधिं लास्यंति। अत्रांतरे सूर्योस्तंगमिष्यति चंद्रोदयो भविष्यति प्रभाते जाते भूयोपि भव्यश्रावकाः श्रुतपूजां कृत्वा गृहं गत्वा साधुभ्यो भोजनं वितीर्य्य स्वयं भोजनं करिष्यति अमुना प्रकारेण दिनत्रयं श्रुतपूजां कृत्वा ततः पुष्पदंतो मुनिः पुस्तकान्पुस्तकस्थाने स्थापयिष्यति। सिद्धांतपुस्तकसृष्टिं कृत्वा नरवाहनमुनिः पुष्पदंतः पापानि विधूय वीतरागं वीरं स्मृत्वा स्वर्गं यास्यति यथा षट्खंडागमरचनाकारकौ भूतवलिभट्टारकस्तथा पुष्पदंतोपि विंशतिप्ररूपणानां कर्त्ता। पुनरिंद्रभूतिगणिना निगदितं भोः श्रेणिक! षट्खंडागमसूत्रोत्पत्तिं विमुच्येदानीं प्राभृतसूत्रोत्पत्तिं कथयामि श्रूयतां—ज्ञानप्रवादपूर्वस्य नामत्रयोदशमो वस्तुकस्तदीयतृतीयप्राभृतवेत्ता गुणधरनामगणी मुनिर्भविष्यति सोपि नागहस्तिमुनेः पुरतस्तेषां सूत्राणामर्थान्प्रतिपादयिष्यति तयोर्गुणधरनागहस्तिनामभट्टारकयोरुपकंठे पठित्वा तानि सूत्राणि यतिनायकाभिधो मुनिस्तेषां गाथासूत्राणां वृत्तिरूपेण षट्सहस्रप्रमाणं चूर्णिनामशास्त्रं करिष्यति। तेषां चूर्णिशास्त्राणां समुद्धरणनामा मुनि-

द्वादशसहस्रप्रमितां सद्टीकां रचयिष्यति निजनामालंकृतं इति सूरि-परंपरया द्विविधसिद्धांतो व्रजन् मुनीन्द्रकुंदकुंदाचार्यसमीपे सिद्धांतं ज्ञात्वा कुंदकीर्तिनामा षट्खंडानां मध्ये प्रथमत्रये खंडानां द्वादशसहस्रप्रमितं परिकर्म्म नाम शास्त्रं करिष्यति षट्खंडेन विना तेषां खंडानां सकलभाषाभिः पद्धतिनामग्रंथं द्वादशसहस्रप्रमितं श्यामकुंदनामा भट्टारकः करिष्यति तथा च षट्खंडस्य सप्तसहस्रप्रमितां पंजिकां च। द्विविधसिद्धांतस्य व्रजतः समुद्धरणे समंतभद्रनामा मुनीन्द्रो भविष्यति सोपि पुनः षट्खंडपंचखंडानां संस्कृतभाषयाष्टषष्टिसहस्रप्रमितां टीकां करिष्यति द्वितीयसिद्धांतटीकां शास्त्रे लिखापयन् सुधर्म्मनामा मुनिर्वारयिष्यति द्रव्यादिशुद्धेर्भावात् इति द्विविधं सिद्धांतं व्रजंतं शुभनंदिभट्टारकपार्श्वे श्रुत्वा ज्ञात्वा च वप्पदेवनामा मुनीन्द्रः प्राकृतभाषया अष्टसहस्रप्रमितां टीकां करिष्यति। अत्रांतरे एलाचार्यभट्टारकपार्श्वे सिद्धांतद्वयं वीरसेननामा मुनिः पठित्वाऽपराण्यपि अष्टादशाधिकाराणि प्राप्य पंचखंडे षट्खंडं संकल्प्य संस्कृतप्राकृतभाषया सत्कर्म्मनामटीकां द्वासप्ततिसहस्रप्रमितां धवलनामांकितां लिखाप्य विंशतिसहस्रकर्म्मप्राभृतं विचार्य वीरसेनो मुनिः स्वर्गं यास्यति। तस्य शिष्यो जिनसेनो भविष्यति सोपि-चत्वारिंशत्सहस्रैः कर्म्मप्राभृतं समाप्तिं नेष्यति, अमुना प्रकारेण षष्टिसहस्रप्रमिता जयधवलनामांकिता टीका भविष्यति।

इति श्रीपंचाधिकारनामशास्त्रे विबुधश्रीधरविरचिते श्रुतावतारप्ररूपणं नाम चतुर्थः परिच्छेदः।

# अथ शलाकानिक्षेपणनिष्काशनविवरणं ।

अर्हंतं तत्पुराणं जिनमुनिचरणान् देवतां क्षेत्रपालं
छायासूनोर्निशायामभिषवनविधैः पूजयित्वा जलाद्यैः ।
जातां हेम्नः शलाकां कुशकुसुममयीं कन्यया दापयित्वा
तत्प्रातः पूजयित्वा पुनरथ शकुनं वीक्ष्यते तत्पुराणं ॥१॥
अत्युग्रशुभकार्य्यार्थं शनिवारो न याति चेत्
अन्यस्मिन्वासरे सौम्ये पुराणं प्रार्चयेत्सुधीः ॥२॥
दुर्व्वचः श्रवणे चैव दुर्निमित्तावलोकने
क्षुते प्रदीपनिर्व्वाणे पुराणं नार्चयेत्ततः ॥३॥
अष्टाब्दां वा दशाब्दामजनितरजसं कन्यकां वा नवोढा-
मभ्यंगस्नानभूषां मलयजवसनालंकृतां पूजयित्वा ।
मंत्रैर्वागदेवतायास्त्रिगुणितनवकं मंत्रयित्वा शलाकां
तद्दोर्भ्यां दापयित्वा तदनु च दलयोः कार्य्यमालोच्य
मध्ये ॥ ४ ॥
कन्या न लभते यत्र न प्रौढा लभते यदा
शलाकां श्रावकः शुद्धः पुराणे प्रक्षिपेत्तदा ॥५॥
प्राक्पत्रे पूर्व्वपंक्तौ वा पद्ये पूर्व्वाक्षराणि च
सप्त हित्वा पठेच्छ्लोकमिति केषां मतं मतं ॥ ६ ॥

---

१ ॐ ह्रीं श्रीं श्रीं ह्रीं क्लीं ब्लैं ह्रौं ह्रः श्रीसरस्वति मरालवाहने वीणापुस्त-कमालापद्ममंडितचतुर्भुजे मौक्तिकहारावलिराजितोरोजसरोजकुड्मलयुगले वद वद वाग्वादिनि सर्वजनसंशयापहारिणि श्रीमद्भारति देवि । तुभ्यं नमोस्तु, इति श्री सरस्वतीमंत्रः ।

प्राक्पत्रसंपुटस्थांते पंक्तौ श्लोकाक्षराणि च
सप्त हित्वा पठेच्छ्लोकं पुराणं दोषवर्ज्जितं ॥७॥
यः पूर्व्वार्द्धविसर्गवानपि तथा लिट्संयुतः सर्व्वथा
वैराग्यास्तुतिरोगशोकमरणश्रमादिदोषान्वितः ।
पूर्व्वाद्यंतगतो भवालिसहितस्त्यक्त्वान्यजन्माश्रयो
मानोनः प्रतिषेधवान्न शकुने श्लोकः प्रशस्तो भवेत् ॥८॥
रिक्तपत्रमपि जीर्णमक्षरं शीर्णपत्रमपि कूटलेखनं
सुप्रशस्तमपि पश्चमीदृशं ह्यामनंति न तु नीतिवेदिनः॥९॥
पारावारपुरर्त्तुशैलसलिलक्रीडाकुमारोदयो
ध्यानाल्हादविवाहभोगविजयश्रीचंद्रसूर्य्योदयः ।
मंत्रालोचननायकाभ्युदययुक्पट्टाभिषेकोत्सवाः
शास्त्रावर्णनया पुराणशकुने पुण्यानुबंधोदयः ॥१०॥
धर्म्मो राजा तथा शाखा प्रजा चेति चतुर्व्विधा
ज्येष्ठशुक्लस्य पंचम्यां शलाका दृश्यते बुधैः ॥११॥

धर्म्मः श्वेतः १ राजा रक्तः २ शाखा हरिता ३ प्रजा पीता ४ ॥ छ ॥

इति शलाकावर्णनं संपूर्णं समाप्तं पूर्व्वाचार्य्यविरचितं लोकशुभाशुभकथकं ॥ छ ॥
श्रेयोस्तु श्रीप्रशस्तेः शकुनप्रकाशकानां ।

———————

# श्रीमत्पंडिताशाधरविरचिता

# कल्याणमाला ।

पुरुदेवादिवीरान्तजिनेन्द्राणां ददातु नः ।
श्रीमद्गर्भादिकल्याणश्रेणी निश्रेयसः श्रियम् ॥ १ ॥
शुचौ कृष्णे द्वितीयायां वृषभो गर्भमाविशत् ।
वासुपूज्यस्तथा षष्ठ्यामष्टम्यां विमलः शिवम् ॥२॥
दशम्यां जन्मतपसी नमेः शुक्ले तु सन्मतेः ।
षष्ठ्यां गर्भो भवन्नेमेः सप्तम्यां मोक्षमाविशत् ॥३॥
सुव्रतः श्रावणे कृष्णे द्वितीयायां दिवच्युतः ।
कुन्थुर्दशम्यां शुक्ले तु द्वितीये सुमतिस्थितौ ॥४॥
जन्मनिष्क्रमणे षष्ठ्यां नेमेः पार्श्वः सुनिर्वृतः ।
सप्तम्यां पूर्णिमायां तु श्रेयान्निःश्रेयसं गतः ॥५॥
भाद्रे कृष्णस्य सप्तम्यां गर्भं शान्तिरवातरत् ।
गर्भावतरणं षष्ठ्यां सुपार्श्वस्य सितेऽभवत् ॥६॥
पुष्पदन्तस्य निर्वाणं शुक्लाष्टम्यामजायत ।
श्रितः शुक्लचतुर्दश्यां वासुपूज्यः परं पदम् ॥७॥
आश्विनेऽभूद्द्वितीयायां कृष्णे गर्भो नमेः सिते ।
नेमे प्रतिपद्विज्ञानं सिद्धोऽष्टम्यां च शीतलः ॥८॥
अनन्तः कार्तिके कृष्णे गर्भेऽभूत्प्रतिपद्दिने ।
चतुर्थ्यां शंभवाधीशः केवलज्ञानमापिवान् ॥९॥

पद्मप्रभस्त्रयोदश्यां प्राप्तो जन्मव्रते शिवम् ।
दर्शे वीरो द्वितीयायां कैवल्यं सुविधिः स्थितः ॥१०॥
पष्ठ्यां गर्भोऽभवन्नेमेर्द्वादश्यां केवलोद्भवः ।
अरनाथस्य पक्षान्ते संभवेशस्य जन्म च ॥११॥
मार्गे दशम्यां कृष्णेऽगाद्वीरो दीक्षां जनिव्रते ।
सुविधेः पक्षान्ते शुक्ले दशम्यां त्वरदीक्षणम् ॥१२॥
एकादश्यां जनुर्दीक्ष मल्लेशानं नमेस्तथा ।
अरजन्म चतुर्दश्यां पक्षान्ते सम्भवं व्रतम् ॥१३॥
पौपकृष्णे द्वितीयायां मल्लिः कैवल्यमासदत् ।
चन्द्रप्रभस्तथा पार्श्व एकादश्यां जनिव्रते ॥१४॥
शीतलस्तु चतुर्दश्यां कैवल्यमुदमीमिलत् ।
शान्तिनाथो दशम्यान्तु शुक्ले कैवल्यमापिवान् ॥१५॥
एकादश्यान्तु कैवल्यमजितेशोऽभिनन्दनः ।
चतुर्दश्यां पूर्णिमायां धर्मेश लभते स्म तत् ॥१६॥
माघे पद्मप्रभः कृष्णे षष्ठ्यां गर्भमवातरत् ।
शीतलस्य जनुर्दीक्षे द्वादश्यां वृषभस्य तु ॥१७॥
मोक्षोऽभवच्चतुर्दश्यां दर्शे श्रेयांसकेवलम् ।
शुक्लपक्षे द्वितीयायां वासुपूज्यस्य केवलम् ॥१८॥
चतुर्थ्यां विमलो जन्मदीक्षे पष्ठ्यां च केवलम् ।
नवम्यामजितो दीक्षां दशम्यां जन्म चासदत् ॥१९॥
अभिनन्दननाथस्य द्वादश्यां जन्मनिष्क्रमौ ।
धर्मस्य जन्मतपसी त्रयोदश्यां बभूवतुः ॥२०॥
चतुर्थ्यां फाल्गुने कृष्णे मुक्तिं पद्मप्रभो गतः ।

षष्ठ्यां सुपार्श्वः कैवल्यं सप्तम्यां चाप निर्वृतिम् ॥२१॥
सप्तम्यामेव कैवल्यमोक्षौ चन्द्रप्रभोऽभजत् ।
नवम्यां सुविधिर्गर्भमेकादश्यां तु केवलम् ॥२२॥
वृषो जन्मतपो ... सुविधिः ।
द्वादश्यां वासुपूज्यस्तु चतुर्दश्यां जनिव्रते ॥२३॥
अरः शुक्ले तृतीयायां गर्भं मल्लिस्तु निर्वृतिम् ।
पंचम्यां प्रापदष्टम्यां गर्भं श्रीसंभवोऽपि च ॥२४॥
चैत्रे चतुर्थ्यां कृष्णेऽभूत्पार्श्वनाथस्य केवलम् ।
पंचम्यां चन्द्रभो गर्भमष्टम्यां शीतलोऽश्रयत् ॥२५॥
नवम्यां जन्मतपसी वृषभस्य बभूवतुः ।
कैवल्यमप्यमावास्यां मोक्षोऽनन्तस्य चाभवत् ॥२६॥
शुक्लप्रतिपदा गर्भे मल्लिः कुन्थुस्तृतीयया ।
ज्ञाने जिनोऽभूत्पंचम्यां मोक्षे षष्ठ्यां च सम्भवः ॥२७॥
एकादश्यां जनिज्ञानमोक्षान्सुमतिरुद्भवम् ।
वीरः प्रासत्त्रयोदश्यां पद्माभोऽत्येन्हि केवलम् ॥२८॥
पार्श्वः कृष्णे द्वितीयायां वैशाखे गर्भमाविशत् ।
नवम्यां सुव्रतो ज्ञानं दशम्यां च जनिव्रते ॥२९॥
धर्मो गर्भं त्रयोदश्यां चतुर्दश्यां नमिः शिवम् ।
शुक्ले प्रतिपदि प्राप कुन्थुर्जन्मतपः शिवम् ॥३०॥
प्रापोऽभिनन्दनः षष्ठ्यां शुक्लायां गर्भमोक्षणम् ।
नवम्यां सुमतिर्वीरो दशम्यां ज्ञानमक्षयम् ॥३१॥
श्रेयान् ज्येष्ठे सिते षष्ठ्यां दशम्यां विमलोऽपि च ।
गर्भं समाश्रितोऽनन्तो द्वादश्यां जन्मनिष्क्रमौ ॥३२॥

शान्तिः श्रितश्चतुर्दश्यां जन्मदीक्षाशिवश्रियः ।
अमावास्या दिने गर्भमवतीर्णो जिनेश्वरः ॥२३॥
शुक्ले चतुर्थ्यां निर्वाणं प्राप्तो धर्मो जिनेश्वरः ।
सुपार्श्वनाथो द्वादश्यां जनिप्रव्रजिते स्थितः ॥२४
इतीमां वृषभदीनां पुण्यस्कल्याणमालिकां ।
करोति कण्ठे भूषां यः स स्यादाशाधरेडितः ॥२५॥

इत्याशाधरविरचिता कल्याणमाला समाप्ता ।

समाप्तोऽयं ग्रन्थः ।